[illegible] दीक्षा प्रकरण
[illegible] प.१५
... नवधा भक्ति : षोडशधापि भक्ति: प्र
... विधुरी [illegible] प्रमाण
उद्धं पुंड्र महात्म ॥ पुंड्र के धारण
करने की पद्धति इसी में है सी चार
[illegible] पत्र ७० पर [illegible] १०८ तक है
धारण के महातम [illegible] महातम वि
धि पत्र ८० पर है ॥

अष्टाक्षर मंत्र का अर्थ पत्र ८४
पर है [illegible] अर्थ में प.८४ पर

श्रीमल हरिप्रबोध [illegible] के
लं [illegible] धर्मकर्म [illegible] कानिर्णय
[illegible] पत्र १०५ पर है

१०७ [illegible] की [illegible] और [illegible] दान
के [illegible] तिथि [illegible] है [illegible] पत्र २८
[illegible] महात्म प.१०९ 1
[illegible] महात्म पत्र
१११ पर है
तुलसी माला महातम पत्र ११५
पर है
गोपी चंदन महातम पत्र ११६
पर है
एकादशी महातम तथा निर्णय
धः पत्र ११७ पर है
[illegible] भक्ति [illegible] साधन
[illegible] पत्र ७८ [illegible] कि [illegible]
५२तक ४८ से
[illegible]
[illegible] पत्र से साप [illegible]
प.१०.६०

[illegible] (vertical text in left margin)

श्रीरामाय नमः॥ श्रीमद्गुरुचरणकमलेभ्यो नमः। नमस्कृत्य गुरुभ्योहं कुर्वे पुराणसंग्रहं। भक्तानं
करं देवं परमात्मानमच्युतं॥१॥ विघ्नेशान्निर्विघ्नत्वं चोमाधवप्रसादतः॥ रामभक्तिरसासक्तं रुद्रं च
दर्थं नुमः॥२॥ अथ सर्वेषां विष्णुभक्तावधिकारः तत्रापि ब्राह्मणानां विशेषतः॥ सर्वपुराणादिषु सि
द्धः तद्करणे तेषां पातित्यश्रुतेः॥ अन्यदेवतानां च रजस्तमोभिभूतत्वात्तेषामभजनीयत्वश्रुते
तेषां तत्फलश्रवणात्। तथा हि॥ पद्मे उत्तरखंडांते दिलीपवसिष्ठसंवादे मंदरे मनोः सत्रे मुनीनां स
मवाये निर्धारितं॥ दिलीप उवाच॥ कथितं भवता ब्रह्मन्सर्वं धर्ममशेषतः। सामान्यं च विशिष्टं च स्वरूपं
परजीवयोः॥३॥ स्वर्गापवर्गौ कथितौ साधनं च तयोरपि। धन्योस्म्यहं द्विजश्रेष्ठ त्वत्प्रसादात्सदागु
रो॥४॥ कथां मन्यां द्विजश्रेष्ठ प्रष्टुमिच्छामि त्वां कुतूहलात्॥ कथयस्व यथातथ्यं मयि वात्सल्यगौरवा
त्॥५॥ महाभागवतश्रेष्ठो रुद्रस्त्रिपुरहंतकः। कस्माद्धि गर्हितं रूपं प्राप्तवान्सह भार्यया॥६॥ योनिलिं
गस्वरूपं च कथं स्यात्सुमहात्मनः॥ पंचवक्त्रश्चतुर्बाहुः शूलपाणिस्त्रिलोचनः॥७॥ कथं विगर्हि
तं रूपं प्राप्तवान्द्विजपुंगव॥ एवं सर्वं समाचक्ष्व मित्रावरुणनंदन॥८॥ श्रीवसिष्ठ उवाच॥ शृणु
राजन्प्रवक्ष्यामि यन्मां पृष्टोसि भो नृप। विमुक्त रुद्रयोः पुंसां बुद्धिः प्रेमयसि जायते॥९॥ स्वायंभ

राम
१

द्रुसत्वगुणं ते यस्मिन्त्सं विद्यते मुने ॥२४॥ स एव पूज्यो विप्राणां नेतरस्तु कदाचन । सुद्धसत्वमयः सा
क्षाद्रुद्रत्वं यः सभविष्यति ॥२५॥ तीर्थप्रसादं वा लोके विप्राणां सभविष्यति । देवतानां पितॄणां च तस्याद्भ
तं तु पावनं ॥२६॥ तस्मात्वं हि मुनिश्रेष्ठ विबुधानां निवासनं ॥ व्रिशं कुरु मुनिश्रेष्ठ सर्वलोकहितं प्रभो
॥२७॥ एवमुक्तस्ततस्तूर्स्वं कैलासं मुनिसत्तमः ॥ जगाम वामदेवेन यत्रास्ते वृषभध्वज ॥२८॥ स दृष्ट्वा रमु
पागम्य शंकरस्य महात्मनः ॥ शूलहस्तं महारौद्रं नंदिं दृष्ट्वाब्रवीद्द्विजः ॥२९॥ संप्राप्तोहं त्वगुर्विप्रोहं रुद्र
द्रं सुरोत्तमं ॥ निवेदयस्व मां शीघ्रं शंकराय महात्मने ॥३०॥ तस्य तद्वचनं श्रुत्वा नंदी सर्वगणेश्वरः ॥ उवाच
परुषं वाक्यं महर्षिममितौजसं ॥३१॥ अप्रसाद्य ध्रुवं भो त्वं स्पदेव्या क्रीडति शंकरः ॥ निवर्तस्व निवर्तस्व
द्विजो विद्धि महंति ॥३२॥ एवं निराकृतस्तेन तत्रातिष्टन्महातपाः ॥ बहूनि दिवसान्यस्मिन्नरहद्वारि मुनी
श्वरः ॥३३॥ ततः क्रोधसमाविष्टो भृगुः प्रोवाच शंकरं । निविष्टस्तमसारूढो मां न जानाति शंकरः ॥३४॥ ना
रीसंगममत्तोसौ यस्मान्मामवमन्यते । योनिलिंगस्वरूपं वै तस्मात्तस्य भविष्यति ॥३५॥ ब्राह्मणो मां न जा
नाति समीपसमुपागतं ॥ अब्राह्मण्यत्वमापन्नो ह्यपूज्योसौ द्विजन्मनां ॥३६॥ तस्मान्न जलमश्नीयात्त
तस्मै दत्तं हविस्तथा । निर्माल्यमस्य तत्सर्वं भविष्यति न संशयः ॥३७॥ एवं शप्त्वा महातेजाः शंकरं लो
कपूजितं ॥ उवाच गणमत्युग्रं नंदिं शूलधरं नृप ॥३८॥ रुद्रभक्ता भवेयुर्ये लोके भस्मलिंगास्थिधारिणः ॥
ते पाखंडत्वमापन्नाः वेदबाह्या भवंतु वै ॥३९॥ एवं शप्त्वा मुनिस्तत्र रुद्रं त्रिपुरहंतकं । जगाम ब्रह्म

स्कं. व.
पु. सं.
२
राम
२

यो मनुः पूर्वं मंदरे पर्वतोत्तमे ॥ जगाम मुनिभिः सार्द्धं दीर्घसत्रमनुत्तमं ॥ १० ॥ तस्मिन्समागताः सर्वे मुन
यः संशितव्रताः । नानाशास्त्रविदः श्रेष्ठाः बालसूर्यानलप्रभा ॥ ११ ॥ सर्ववेदविदो विप्राः सर्वधर्मपरा
यणाः । वर्त्तमाने महासत्रे मुनयः क्षीणकल्मषाः ॥ १२ ॥ अन्विष्य देवतातत्वं मिथः प्रोचुस्तपोधनाः
विप्राणां वेदविदुषां कः पूज्यो देवतावरः ॥ १३ ॥ ब्रह्मविष्णुमहेशानां कस्तो मुक्तिदो नृणां । कस्य पा
दोदकं सेव्यं मुक्तौ क्लिष्टं च पावनं ॥ १४ ॥ कोऽव्ययः परमं धाम परमात्मा सनातनः ॥ कस्य प्रसादात्तीर्थं
च पत्रणां तृप्तिकांदं भवेत ॥ १५ ॥ तेषां समुपविष्टानां इति वादो महानभूत । रुद्रमेकमिति प्रोचुः केचिद
त्र महर्षयः । १६ ब्रह्मैव पूज्य इत्येके केचिदत्र तपोधनाः । सूर्यमेवात्मनां पूज्यमित्यन्ये प्राहुरुत्तमा ॥ १७ ॥
योऽसौ सर्वगतः श्रीमान्वासुदेवः परात्परः । अनादिनिधनो विष्णुः स एव परमेश्वरः ॥ १८ ॥ संपूज्यो देवता
श्रेष्ठ इत्यन्ये मुनिसत्तमाः ॥ तेषां विवदतां तत्र मनुः स्वायंभुवोऽब्रवीत ॥ १९ ॥ शुद्धसत्वमयो योऽसौ क
ल्याणगुणवान्प्रभुः ॥ पुंडरीकेक्षणः श्रीमान् श्रीपतिः पुरुषोत्तमः ॥ २० ॥ विप्राणां वेदविदुषां एक एव
स्थितः प्रभुः ॥ विप्राणां नेतरे पूज्या रजस्तमविमिश्रिताः ॥ २१ ॥ इति तस्य वचः श्रुत्वा सर्वे एव महर्षयः
मनुं तपोनिधिं विप्रं प्रोचुः प्रांजलयस्तथा ॥ २२ ॥ ऋषय ऊचुः ॥ अस्माकं संशयं छेत्तुं त्वं समर्थो
सि सुव्रत ॥ ब्रह्मविष्णुमहेशानामंतरं वं ब्रूहि सुव्रत ॥ २३ ॥ ज्ञात्वा तेषां समीपं तु दृष्ट्वा तत्र यातु विग्रहान । श्रु

भक्त्यासमर्चयामास दिव्यस्त्रक्चंदनादिभिः ॥५६॥ तं दृष्ट्वा मुनिशार्दूलो हर्षपूर्णाश्रुलोचनः । उत्था
यासनमारुह्य तं प्रणाममद्यानिधिं ॥५७॥ कृतांजलिपुटो भूत्वा हर्षात्प्राह महातपाः ॥ श्रीभृगुरुवाच ॥
अहो रूपमहो शांतिरहो दयमहो रुचिः ॥५८॥ अहो सुनिर्मलाकांतिरहो सत्त्वो गुणोऽम्हेर ॥ नैसर्गिकं शुभं स
३ त्त्वं तवैव गुणवारिधे ॥५९॥ नान्येषां विद्यते किंचित्सर्वेषां त्रिदिवौकसां ॥ ब्रह्मण्यस्त्व शरण्यस्त्वं त्वमेव पुरु
षोत्तम ॥६०॥ ब्राह्मणानां त्वमेवेशो नान्यः पूज्यः सुरः क्वचित् । ये चेयंति सुरानन्यांस्त्वां विना पुरुषोत्तम
६१ ते पाषंडत्वमापन्नाः सर्वलोकविगर्हिताः ॥ विप्राणां विद्धि विदुषां त्वमेवेज्यो जनार्दनः ॥६२॥ नान्यः
व॰ कश्चित्सुराणां तु पूजनीयः कदाचन ॥ आकुंजो ब्रह्मरुद्राद्या जगत्सनो विनिस्थिताः ॥६३॥ त्वमेव सत्त्व
पु॰सं गुणवान्पूजनीयो मुजन्मनां ॥ त्वत्पादसलिलं सेव्यं पितॄणां च दिवौकसां ॥६४॥ सर्वेषां भूसुराणां च मुक्ति
३ दं कल्मषापहं ॥ त्वदुक्तं किष्णशेषं वै पितॄणां च दिवौकसां ॥६५॥ भूसुराणां च सेव्यं स्यान्नान्येषां तु क
दाचन । इतरेषां तु देवानां मन्नं पुष्पं जलं तथा ॥६६॥ अस्पृश्यं तु भवेत्सर्वं निर्माल्यं सुरयासमं । तस्माद्दे
ब्राह्मणैर्नित्यं पूजयित्वा सनातनं ॥६७॥ त्वत्तीर्थं भुक्तमन्नं ये भजंते वा निशं बुधाः । नान्यं देवं तु वीक्ष्यंत राम
ब्राह्मणेन च पूजयेत् ॥६८॥ नान्यप्रसादं भुंजीत नान्यदायतनं विशेत् । न ददाति हि यो विप्रः पितॄ
णां श्राद्धकर्मणि ॥६९॥ त्वदुक्तमन्नं तीर्थं च तत्सर्वं निष्फलं भवेत् ॥ कल्पकोटिसहस्राणि कल्प ३
कोटिशतानि च ॥७०॥ पतंति पितरस्तस्य नरके पूयशोणिते ॥ निवेदितं तव विभो ये उद्धे हविर्दाति

स्य

लोकं वै सर्वलोकनमस्कृतं ॥४०॥ तत्र स देवैः सहासीनं ब्रह्माणं परमेष्ठिनं ॥ दृष्ट्वा प्रांजलिना देवं प्रण
नाम महामतिः ॥४१॥ ब्रह्मण्यपुरतस्तस्य तस्थौ भूतो महातपाः ॥ तं दृष्ट्वा मुनिशार्दूलं रजोगुणसमन्वितः
॥४२॥ नार्चयामास धाता सो महर्षिं समुपागतं ॥ प्रत्युत्थानं प्रियं वाक्यं न कृतं तस्य वेधसा ॥४३॥ ऐश्वर्यगौ
रवमहत्वात्तस्यै तत्रांबुजासनः ॥ तं दृष्ट्वा रजसोद्रिक्तं महर्षिः पंकजासनं ॥४४॥ व्याजहार महातेजा वाक्यं लो
कपितामह ॥ रजसा महतोद्रिक्तो यस्मान्मामवमन्यसे ॥४५॥ तस्मात्त्वं सर्वलोकानामपूज्यत्वं समाप्नुहि ॥ ए
वं शप्त्वा महात्मानं ब्रह्माणं लोकपूजितं ॥४६॥ जगाम सहसा विप्रो भगवन्मंदिरं भृगुः ॥ प्रविश्य वैष्णवं लो
कं जलाध्येन्तरे तटे ॥४७॥ तत्र स्थितैर्महाभागैः पूज्यमानो यथार्हतः ॥ तत्रानिवार्यमाणस्तु निवेशं या
तः पुरं द्विजः ॥४८॥ प्रविश्य तस्मिन्विमले विमाने रविसंनिभे ॥ शयानं नागपर्यंके ददर्श कमलापतिं ॥४९॥
लक्ष्मीकरसरोजाभ्यां न्यज्यमानपदद्वयं ॥ तं दृष्ट्वा मुनिशार्दूलो भृगुः कोपसमन्वितः ॥५०॥ सव्यपादं प्र
चिक्षेप विष्णोर्वक्षसि सोभिते ॥ तूर्णमुत्थाय भगवान्धन्योस्मीति वदन्मुदा ॥५१॥ हस्ताभ्यां चरणं तस्य
पीडयामास हर्षितः ॥ शनैर्मर्दित्वा तत्पादं मधुरं वाक्यमब्रवीत् ॥५२॥ धन्योस्म्यद्यैव विप्रर्षे कृतकृत्यो
स्मि सर्वदा ॥ त्वत्पादस्पर्शनाद्देहे मंगलं मे भविष्यति ॥५३॥ समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुल
धूमकेतवः ॥ अपारसंसारसमुद्रसेतवः पुनंतु मां ब्राह्मणपादपांशवः ॥५४॥ विप्रपादरजो यस्य देहे तिष्ठ
ति सर्वदा ॥ गंगादि सर्वतीर्थानि तस्य तिष्ठंत्यसंशयं ॥५५॥ इत्युक्त्वा महपोत्थाय देव्या सार्द्धं जनार्दनः ॥

सर्ववेदविदोपिहि ॥८७॥ नामरूपगुणैः श्रीशवारितैरपि दुःसहैः ॥ परत्र सूचकं सत्वं तव वेदितुमीश्वर
॥८८॥ महर्षिभिः प्रेषितोहमागतोस्मि तवांतिकं ॥ तव शीलगुणं ज्ञातुं चरणं मम केशव ॥८९॥ दत्तं वक्षसि
गोविंद तत्क्षंतव्यं कृपानिधे ॥ एवमुक्तो भृगुर्देवं प्रणम्य च मुहुर्मुहुः ॥९०॥ दिव्यैर्महर्षिभिस्तत्र पूज्यमानो म
हात्मभिः ॥ पुनर्जगाम हृष्टात्मा यज्ञभूमिं शुभाकृतिं ॥९१॥ समागतं महात्मानं तं दृष्ट्वा महर्षयः ॥ प्रत्यु
त्थाय नमस्कृत्य पूजां चक्रुर्विधानतः ॥९२॥ तेषां विज्ञापयामास तत्सर्वं मुनिपुंगवः ॥ रजस्तमगुणोद्र
क्तौ विधीशानौ सुरोत्तमौ ॥९३॥ शप्तौ मया न पूज्यौ तौ विप्राणां मुनिसत्तमाः ॥ ब्रह्मण्यत्वमापन्नः ग
र्हितं रूपमास्थितः ॥९४॥ शप्तः कैलाशशिखरे शंकरस्तु मयावृतः ॥ शुद्धसत्वमयो विष्णुः कल्याणसा
गरः ॥९५॥ नारायणः परं ब्रह्म विप्राणां देवतं हरिः ॥ ब्रह्मण्यः श्रीपतिर्विष्णुर्वासुदेवो जनार्दनः ॥९६॥ ब्रह्म
ण्यः पुंडरीकाक्षो गोविंदो हरिरच्युतः ॥ स एव पूज्यो विप्राणां नेतरः पुरुषर्षभ ॥९७॥ मोहाद्यः पूजये
दन्यं स पाखंडी भविष्यति ॥ स्मरणादपि कृष्णस्य विमुक्तिः पापिनामपि ॥९८॥ तस्य पादोदकं सेव्यं भुक्तोच्छि
ष्टं च पावनं ॥ स्वर्गापवर्गदं नॄणां ब्राह्मणानां विशेषतः ॥९९॥ विष्णोर्निवेदितं नित्यं देवेभ्यो जुहुयाद्धविः
पितृभ्यश्चैव तद्दद्यात्सर्वमानंत्यमश्नुते ॥१००॥ न दद्याद्धरेर्भुक्तं पितॄणां श्राद्धकर्मणि ॥ अश्नंति पित
रस्तस्य विण्मूत्रं च सततं द्विजाः ॥१॥ तस्माद्विष्णोः प्रसादो वै सेवितव्यो द्विजन्मनां ॥ इतरेषां तु देवानां निर्माल्यं ग
र्हितं भवेत् ॥२॥ सकृदेवाहि योश्नाति ब्राह्मणो ज्ञानदुर्बलः ॥ निर्माल्यं शंकरादीनां स चांडालो भवेद्ध्रुवं ॥३॥
कल्पकोटिसहस्राणि पच्यते नरकाग्निना ॥ निर्माल्यं [illegible] रुद्रादीनां दिवौकसां ॥४॥ रहस्य

च ॥७१॥ देवतानां च पितॄणां च त्वत्प्रसादान्त्वमश्नुते ॥ तस्मात्त्वमेव विप्राणां पूज्यो नान्योस्ति कश्चन ॥
उ२ ॥७२॥ मोहाद्यः पूजयेदन्यान्स पाखंडी भविष्यति ॥ त्वं हि नारायणः श्रीमान्वासुदेवः सनातनः ॥७३॥ वि
ष्णुः सर्वगतो नित्यः परमात्मा महेश्वरः ॥ त्वमेव सेव्यो विप्राणां ब्राह्मणेषु द्धसत्ववान् ॥७४॥ पूज्यत्वाद्ब्राह्म
णानां वै शुद्धसत्वगुणादपि सर्वपापवदेवानां ब्राह्मणत्वमवाप्नुहि ॥७५॥ त्वामेव हि सदा विप्रा भजंति
पुरुषोत्तमं ॥ ब्राह्मणास्तेव भक्ता अन्तु नान्यास्तत्र न संशयः ॥७६॥ ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसू
दनः ॥ ब्रह्मण्यः पुंडरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥७७॥ ब्रह्मण्यो भगवान्कृष्णो वासुदेवोऽच्युतो हरिः ॥ ब्र
ह्मण्यो नारसिंहः स्यात्तथा नारायणोऽव्ययः ॥७८॥ ब्रह्मण्यः श्रीधरः श्रीशो गोविंदो वामनस्तथा ॥ ब्रह्मण्यो य
ज्ञवाराहः केशवः पुरुषोत्तमः ॥७९॥ ब्रह्मण्यो राघवः श्रीमान्रामो राजीवलोचनः ॥ ब्रह्मण्यः पद्मनाभः स्या
त्तथा दामोदरः प्रभुः ॥८०॥ ब्रह्मण्यो माधवो यज्ञस्तथा विष्णुस्त्रिविक्रमः ॥ ब्रह्मण्यश्च हृषीकेशः पीतवासा
जनार्दनः ॥८१॥ नमो ब्रह्मण्यदेवाय पद्मनाभाय शार्ङ्गिणे ॥ नारायणाय श्रीशाय पुंडरीकेक्षणाय च ॥८२॥ न
मो ब्रह्मण्यदेवाय सर्गस्थित्यंतहेतवे ॥ विश्वैककल्याणगुणपूर्णाय परमात्मने ॥८३॥ प्रद्युम्नायानिरुद्धा
य तथा संकर्षणाय च ॥ नमो ब्रह्मण्यदेवाय सर्ववेदस्वरूपिणे ॥८४॥ वाराहवपुषे नित्यं त्रयीनाथाय ते
नमः ॥ नमो ब्रह्मण्यदेवाय नागपर्यंकशायिने ॥८५॥ राजीवदलनेत्राय राघवाय नमो नमः ॥ मायया
मोहिताः सर्वे देवाश्च ऋषयस्तथा ॥८६॥ न जानंति महात्मानं सर्वलोकेश्वरं प्रभो ॥ त्वां न जानंति भगवन्

रुद्रः शृणु मे गदतो वचः ॥ यो यज्ञैरिज्यते देवो यस्मात्सर्वमिदं जगत् ॥१९॥ उत्पन्नं सर्वदा यस्मिल्ली
यते स चराचरं ॥ नारायणः परो देवः सत्वरूपो जनार्दनः ॥२०॥ त्रिधात्मानं स भगवान्ससर्ज परमेश्वरः ॥ र
जस्तमोभ्यां युक्तोऽरं मेऽङ्ग सत्वादिकं विभुः ॥२१॥ स यज्ञेनाभिकमलं ब्रह्माणं कमलासनं ॥ रजसा तम
सा युक्तं सोपि मां त्वसृजत्प्रभुः ॥२२॥ यत्सत्वं सो हरिर्देवो यो हरिस्तत्परं पदं ॥ ये सत्वरजसी सोपि ब्रह्मा
5 कमलसंभवः ॥२३॥ यो ब्रह्मा स च देवस्तु यो देवः स चतुर्मुखः ॥ यद्रजस्तमसी सोऽपि तं सोऽहं नास्त्यत्र संश
यः ॥२४॥ सत्वं रजस्तमश्चैव त्रितयं चैतदुच्यते ॥ सत्वेन मुच्यते जंतुः सत्वं नारायणात्मकं ॥२५॥ रजसा वार्षी
तं० वं० सत्वयुक्तेन भवेत्सच्छीरजोऽधिकाः ॥ तच्च पैतामहं वृत्तं सर्वशास्त्रेषु पठ्यते ॥२६॥ यद्देवाद्यं कर्मस्यात्त्वा
पु.सं त्रेमुद्दिश्य सेव्यते ॥ तं रौद्रमिति विख्यातं कनिष्ठं गदितं नृणां ॥२७॥ यद्धीनं रजसा कर्म केवलं तामसं तु
५ यत् ॥ तद्दुर्गतिपरं नृणामिह लोके परत्र च ॥२८॥ नारायणः स भगवान्यज्ञरूपी विभाव्यते ॥ कृते ना
रायणः शुद्धः सूक्ष्ममूर्तिमुपास्यते ॥२९॥ त्रेतायां यज्ञरूपेण पंचरात्रैस्तु द्वापरे ॥ कलौ मत्कृत
मार्गेणैव कुरूपेण तामसैः ॥३०॥ ईज्यते देव्यवुद्धासः परमात्मा जनार्दनः ॥ न तस्मात्परतो देवो भ राम
विता न भविष्यति ॥३१॥ यो विष्णुः स स्वयं ब्रह्मा यो ब्रह्मा सोऽहमेव च ॥ वेदत्रयेपि यज्ञेस्मिन्याज्यं वेदे ५
षु निश्चयः ॥३२॥ अत्रानंतरमियं कथानुसंधेया रुद्रेणोक्ता विस्तरभयान्न लिखिता कासौच्यते
॥३३॥ अगस्त्यं प्रति रुद्रेणोक्ता मिति हरेर्भक्तिर्नीमिर्न्नवकल्पते इतीति किं पूर्वं सर्वपि हरिं पूज्यमु

रक्षःपिशाचान्नं मद्यमांससुरासमं । तद्ब्राह्मणैर्न भोक्तव्यं देवानां भुजितं हविः ॥ ५ ॥ तस्मादन्यं परित्य
ज्य विष्णुमेव सनातनं । पूजयिष्यध्वं द्विजश्रेष्ठा यावज्जीवमतंद्रिता ॥ ६ ॥ तद्धि सोपरमं धाम मन्यं तेगतसं
शयाः । तापादिपंचसंस्कारैरन्विष्टाः सुमचेतसः ॥ ७ ॥ अप्राकृता हरिं सम्यगर्चयध्वं द्विजर्षभाः ।
चक्रांकिततनुर्विप्रा भवंत्यप्राकृता भुभाः ॥ ८ ॥ चक्रलांछनहीनास्तु प्राकृतास्तामसाः स्मृताः
तस्मात्प्राकृतिसंसर्गी पापो पद्दहनं हरेः ॥ ९ ॥ प्रतप्तं विभृयाद्ब्रह्मन् शंखं च भुजमूलयोः । ऊर्द्ध्वपुंड्राणि
चांगेषु धृत्वा शास्त्रोक्तमार्गतः ॥ १० ॥ अर्चयेन्मंत्ररत्नेन विधिना पुरुषोत्तमं । तस्य प्रसादसेवां च कुर्या
न्नित्यमतंद्रितः ॥ ११ ॥ तस्यावरणपूजायां त्रिदशानर्चयेत्सदा । तमेव सर्वयज्ञानां भोक्तारं परमेश्वरं ॥
१२ ॥ ज्ञात्वा वोज्जुहुयाद्दद्याज्जपेद्ध्येत्सततं द्विजः ॥ श्रीवशिष्ठ उवाच ॥ एवमुक्तास्ततेसर्वे ऋषयः
वेदपारगाः ॥ नमस्कृत्य महाशंभुं त्र्यंबकं ऊचुः प्रांजलयस्तदा ॥ १३ ॥ भगवत्संशयच्छेत्ता त्वमेव द्वि
जसत्तम । त्वमेव लोकगतिर्बुद्धिस्त्वमेव परमा गतिः ॥ १४ ॥ त्वमेव परमं धर्मस्त्वमेव परमं तपः । त्वत्प्र
सादाद्वयं विप्रा भविष्यामो हि नान्यथा ॥ १५ ॥ एवं स्तुत्वा महाशंभुं विप्रं सर्व एव महर्षयः । तस्मात्तं
प्राप्तं मंत्रावैपूजयामासुरच्युतामिति ॥ १६ ॥ वाराहे च ॥ भद्राश्वे अगस्त्यिवादे । अगस्तिसत्रे रुद्राख्यो देवाः स सं
नत्कुमारादयः ऋषयो ह्याजग्मुः ॥ तानगस्तिः पप्रच्छ भगवंतां कहइयस्य इति तदा रुद्र उवाच ॥ १७ ॥ अस्मा एव
तु विदुधासर्वे तत्र यादेव वैयोमलाः ॥ [illegible] संप्रेमेव च ॥ १८ ॥ त्वं चागस्त्य महा

स्वर्ग ऽणं मनुर्विष्णुयमो गिरा ॥४७॥ वसिष्ठदक्षसंवर्त्तशतातपपराशराः ॥ आपस्तंबोशनोव्यासः कात्यायनिबृह-
स्पती ॥४८॥ गौतमः शंखलिखितौ हारीतोत्रिहरस्तथा ॥ एते विष्णुं समाराध्य ज्ञाता धर्मोपदेशतः ॥४९॥ अ-
भ्यर्च्य विष्णुं धर्मात्मा गोब्राह्मणहिते रतः ॥ प्रजाः पालयितुं शक्तः पार्थिवो यो जितेंद्रियः ॥५१॥ गारुडे
प्रतरवंडांते सूतवाक्यं ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिंदीवरश्यामो हृदयस्थो ज-
नार्दनः ॥५२॥ धर्मो जयति नाधर्मः सत्यं जयति नानृतं ॥ क्षमा जयति न क्रोधो विष्णुर्जयति नासुराः
॥५३॥ विष्णुर्माता पिता विष्णुर्विष्णुः स्वजनबांधवाः ॥ येषामेव स्थिरा भक्तिर्न तेषां दुर्गतिर्भवेत् ॥५४॥ मंग-
लं भगवान्विष्णुर्मंगलं गरुडध्वजः ॥ मंगलं पुंडरीकाक्षः मंगलायतनो हरिरिति ॥५५॥ वृहन्नारदी-
सं.व. येतृतीये नारदवाक्यं ॥ यो भारतभुवं प्राप्य विष्णुपूजापरो भवेत् ॥ न तस्य सदृशश्चास्ति यथावैरवितेज-
पु.सं. सः ॥ हरिकीर्तनशीलो वा तद्भक्तानां प्रियोपि वा ॥५७॥ शुश्रूषुर्वापि महतां स वंद्योस्माभिरुत्तमः ॥ हरि-
६ पूजारतो वापि हरिपूजोद्यतोपि वा ॥५८॥ हरिध्यानपरो वापि स वंद्योस्माभिरुत्तमः ॥ नारायणेति कृष्णेति
वासुदेवेति चाब्रुवन् ॥५९॥ अहिंसादिपरः शांतः स वंद्योस्माभिरुत्तमः ॥ वासुदेवपरो धर्मो वासुदेवपरं त-
पः ॥६०॥ वासुदेवपरं ज्ञानं तस्मादन्यं न विद्यते ॥ वासुदेवात्मकं सर्वं जगत्स्थावरजंगमं ॥६१॥ आब्रह्मस्तंभ- राम
पर्यंतं तस्मादन्यं न विद्यते ॥ स एव धाता त्रिपुरांतकश्च स एव देवासुरसिद्धसंघाः ॥ स एव ब्रह्मांडमिदं ततो- ६
न्यं न किंचिदस्ति व्यतिरिक्तरूपं ॥६२॥ यस्मात्परं नापरमस्ति किंचिद्यस्मादणीयान्न तथा महीयान् ॥ व्या-
प्तं हि तेनेदमिदं विचित्रं तं देवमीशं प्रणमेत्सुधार्थीति ॥६३॥ स्कांदे च ब्रह्मखंडांते कथा ॥ तथा हि ॥ दैत्यस

मा

क्तिं व्रजंति ॥ ३४ ॥ तदा देवैः हरिः ध्यात्वा आविर्भूत उवाच किं कार्यं तं देवा ऊचुः ॥ देव सर्वे मुक्तिं गच्छंति सृ
ष्टिः कथं भविता ॥ ३५ ॥ नरके को वसेत तान्पुनराह हरिः ॥ त्रियुगे बहवो मामुपेष्यंति अन्ययुगे कश्चि
दित्युक्त्वा मामाह । रुद्र जनमोहाय शास्त्राणि कुर्वित्यात्मा गोपितस्त्वहं च त्वया कासितः ॥ ३६ ॥ तदा मत्कृतै
शास्त्रैर्मोहिता मां भजंति न तामिति कथां कृत्वा पुनरास्य उवाच । कस्मिन्काले भगवान्प्रधानस्तदा वाच
रुद्रः ॥ ३७ ॥ विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते ॥ वेदसिद्धांतमार्गेषु तन्न जानंति मोहिताः ॥ ३८ ॥ विशप्रवेश
नेधा तु तत्र प्रभु प्रत्ययादनु विष्णुर्यः सर्वदेवेषु परमात्मा सनातनः ॥ ३९ ॥ योऽसौ विष्णुस्तु दशधा कीर्त्यते चै
कधा द्विजाः सदैव कार्याणि सदा कुरुते परमेश्वरः ॥ ४० ॥ मनुष्यभावमाश्रित्य संभवामि युगे युगे । लोक
मार्गप्रवृत्त्यर्थं देवकार्यार्थसिद्धये इति ॥ ४१ ॥ गरुडेऽपि हरस्त्वेवं नैव निश्चितं । तत्त्वतो हि ॥ हरे कथय देवेश
देवदेवः क ईश्वरः ॥ ४२ ॥ को ध्येयः को ह्यत्र पूज्यः के व्रतैस्तुष्यते परः । के धर्माः के च नियमाः कथ्यतां धर्मपू
जय ॥ ४३ ॥ केनाचारेण तुष्टः स्यात्किं तद्रूपं च तस्य वै श्रीहरिरुवाच । शृणु रुद्र प्रवक्ष्यामि ब्रह्मणाञ्च
सुरेसह ॥ अहं देवानां सर्वेषां एक एवेश्वरेश्वरः ॥ ४४ ॥ अहं ध्येयश्च पूज्यश्च स्तुत्योऽहं स्तुतिभिः सुरैः ॥ अहं
हि पूजितो रुद्र ददामि परमां गतिं ॥ ४५ ॥ नियमैस्त्वव्रतैरेव आचारेण च मानवैः ॥ वासुदेवो जगद्धाता
ध्येयो विष्णुर्मुमुक्षुभिः ॥ ४६ ॥ वासुदेवोहमस्मीति आत्मा ध्येयो हरिर्हरः । याज्ञवल्क्यः पुरा ह्येवं ध्या
त्वा विष्णुं सुरेश्वरं ॥ ४७ ॥ तस्मात्सर्वमपि देवेशं विष्णुं चिंतय शंकर ॥ याज्ञवल्क्येनोक्तं ॥ वक्तारो धर्मशाखा

वेधर्मंसनातनं॥ वैष्णवानांतुविप्राणांयद्यदाचरणंशुभं॥७७॥ वर्त्तनोब्राह्मणाःश्रेष्ठाः वैष्णवांशेन
चोदिताः॥ इतरेचत्रयोवर्णाब्राह्मणाविष्णुसूनूना॥७८॥ तस्माज्ज्ञवैष्णवाविप्राप्रकल्पयेद्द्विजसत्त प्र॰२
माः॥ अवैष्णवत्वंविप्राणांमहापातकसंमतं॥७९॥ अवैष्णवस्तुयोविप्रःसर्वकर्मसुगर्हितः॥ रौरवंन
रकंप्राप्यचांडालीयोनिमाप्नुयात॥८०॥ नित्यनैमित्तिकंकाम्यंत्रिविधंश्रुतिचोदितं॥ अवैष्णवानां
विप्राणांकर्मतन्निष्फलंभवेत॥८१॥ योमहाविष्णुमन्येनहीनदेवेनदुर्मतिः॥ साधारणंसकृद्ब्रूतेसो
स॰व॰ न्त्यजोनांत्यजोंत्यजोंत्यजः॥८२॥ योविष्णुशेषमात्मानमन्यशेषंप्रपद्यते॥ सचांडालोमहापापी
रौरवंनरकंव्रजेत॥८३॥ अवैष्णवत्वंविप्राणामात्मनाशस्यकारणं॥ तस्मात्तुवैष्णवत्वंहिविप्राणांश्रु
पु॰से ८ तिनोदितं॥८४॥ नदासावासुदेवस्यसर्वलोकेश्वरस्यये॥ तेषांहिनरकेवासःकल्पायुतशतैरपि॥८५॥
चतुर्वेदीतियोविप्रोवासुदेवंनविंदति॥ वेदभारभराक्रांतःसवैब्राह्मणगर्दभः॥८६॥ यत्ररुद्राब्जनेत्रा
त्तेपुराणेषुस्मृतिष्वपि॥ तदब्रह्मण्यविषयमेवमाहप्रजापतिरिति॥८७॥ काशीखंडेनैमिषारण्येऋ
षीन्द्रष्ट्वाव्यासवाक्यं॥ विलोक्यसमुनिर्व्यासःस्तान्सर्वान्गिरिशात्मनः॥ उत्क्षिप्यतर्ज्जनीमुच्चैःप्रोवा
चेदंपुनःपुनः॥८८॥ परीत्तिमीथ्यवाग्जालंसंनिश्चित्यासकृद्बहु॥ इदमेकंपरिज्ञातंसेव्यःसर्वेश्वरोह राम
रिः॥८९॥ वेदेरामायणेचैवपुराणेषुचभारते॥ आदिमध्यावसानेषुहरिरेकोत्रनापरः॥९०॥ सत्यंसत्यं ८
पुनःसत्यंचसत्यंनमृषाब्रुवः॥ नवेदात्परंशास्त्रंनचदेवोच्युतात्परं॥९१॥ लक्ष्मीशःसर्वदोनान्यो

पस्तमंतान्रुद्रो वरमदात् । तदा पार्वत्या पृष्टः देवदुष्टान्कथं वरमदाः ॥ कथं वा त्वद्दत्तवरान् विष्णुर्जघा
नेति पृष्ट उवाच रुद्रः ॥ ६४ ॥ सात्त्विका राजसाश्चैव तामसाश्चेति वै त्रिधा ॥ भवंति लोकास्तेष्वेते तमःप्राया
दुरासदाः ॥ ६५ ॥ मां भजंते मुकुंदो हि तज्जगत्सादनोद्यताः । वरं ददामि यत्तेषां भक्तिस्तत्रानुकारणं ॥ ६६ ॥
विष्णुर्नाशयन्निहन्त्येतांस्तत्त्वं देवि निबोध मे ॥ अहं हरिश्च यज्ञिनो गुणभागोत्र कारणं ॥ ६७ ॥ परमार्थाद्
५स्मा भिन्नौ च रहस्यं परमं ह्यदः ॥ आराध्याराधकादिश्च भेदः सामान्य एव नौ ॥ ६८ ॥ तथाप्यहं हि मां गंगां विष्णु
पादाग्रनिःसृतां ॥ वहामि शिरसा भक्त्या त्वदीशो शंकितोपि सन् ॥ ६९ ॥ तां वैतस्य महात्मा यो ज्ञात्र मे या
त्मनो हरेः ॥ आराधयामि तद्भक्त्या त्रिजगज्जन्मकारणं ॥ ७० ॥ शिरसा धाय चान्यां मे शक्तिरूपां तत
हरिः ॥ अजोपि जन्मान्यासाद्य लोकरक्षां करोति वै ॥ ७१ ॥ मां च वाणपरित्राणे मुलोद्यमकारणं मानु
षेष्ववतारेषु सा स्वं भक्षिष्यति लीलया ॥ ७२ ॥ प्रभावं महिमानं च व ऊर्ध्व यन्नाम कं हरिः । वरं एवं स्यातिमां प्राति
नित्यमंतरात्मापि मे विष्णुः ॥ ७३ ॥ अप्यहं परमात्मानमेनमाद्यंतवर्जितं ॥ ध्यानयोगैः समाधौ च भावयामि
निरंतरमिति ॥ ७४ ॥ वसिष्ठस्मृतौ चतुर्थोध्याये । गुरुमिक्ष्वाकुवंशस्य वसिष्ठं ब्रह्मसंभवं पप्रच्छुर्मु
नयः सर्वे पराशरपुरोगमाः । भगवन्भवता प्रोक्ता यज्ञदानव्रतादयः । वर्णाश्रमाणां धर्मास्तथा
राज्ञां महीभृतां ॥ ७५ ॥ अधुना श्रोतुमिच्छामो विप्राणां विष्णुसेवनं ॥ कीदृग्विधा प्रकर्तव्या नित्यनैमित्ति
काः क्रियाः ॥ ७६ ॥ वैष्णवानां मुनिश्रेष्ठ ब्रूहि सर्वमशेषतः ॥ वसिष्ठ उवाच ॥ शृणुध्वं मुनयः सर्वे स

तस्मात्प्रसाद्य वरदं तीर्थेस्मिन्पुरुषोत्तमं ॥ आनेष्य कलया साक्षाद्देहस्थानुग्रहकाम्यया इति ॥ ३ ॥ कूर्मे
च मध्यमे श्वरमहात्म्ये विष्णुप्रतिरुद्रस्यैव वाक्यं ॥ येर्चयिष्यंति गोविंदं मद्भक्ता विधिपूर्वकं ॥ तेषां तदेश्वरं ज्ञा
नमुत्पश्यंति जगन्मयं ॥ ४ ॥ त्वमीशोर्च्चयितव्यश्च ध्यातव्यो मत्परैर्जनैः ॥ भविष्यसि न संदेहो मत्प्रसादाद्दि
जातिभिः ॥ ५ ॥ तत्रैवाचारकं थनानंतरं ॥ विष्णोराराधनात्पुण्यं विद्यते कर्म वैदिके ॥ तस्मादनादिमध्यांतं
नित्यमाराधयेद्धरिं ॥ ६ ॥ तत्र देवार्चनप्रसंगे च ॥ मुमुक्षुः सर्वसंसारात्प्रयत्नेनार्चयेद्धरिं ॥ ७ ॥ ब्राह्मे च ब
ह्नारदीये नाविष्णोरुपासकत्वं स्मृतेनोक्तं ॥ तं बुधं धर्ममुनिश्रेष्ठा ब्रह्माणममितौजसं ॥ स्रष्टारं सर्वभूतानां नार
यणपरायणं ॥ ५ ॥ नारायणात्मकं नोत्पन्नो तो ब्रह्मजन्मनो ॥ ब्राह्मपुराणे च उमां प्रति धर्मकथनानंतरं तत्र
स्था मुनयः ऊचुः ॥ त्रिलोचन नमस्तेस्तु दक्षक्रतुविनाशन ॥ ८ ॥ त्वामस्त्वां जगन्नाथ संशयं हृदि संस्थि
तं ॥ ९ ॥ संसारेस्मिन्महाघोरे भैरवे लोमहर्षणे ॥ भ्रमंतिसुचिरं कालं पुरुषाश्चाल्पमेधसः ॥ १० ॥ येनोपायेन
मुच्यंते जन्मसंसारबंधनात् ॥ ब्रूहि तत्श्रोतुमिच्छामः परं कौतूहलं हि नः ॥ ११ ॥ महादेव उवाच ॥ कर्मपाशनि
बद्धानां नराणां दुःखभागिनां ॥ नान्योपायं प्रपश्यामि वासुदेवात्परं द्विजाः ॥ १२ ॥ ये पूजयंति तं देवं शंखच
क्रगदाधरं ॥ वाङ्मनःकर्मभिः सम्यक्ते यांति परमां गतिं ॥ १३ ॥ किं तेषां जीवितेनेह पशुवच्चेष्टितेन च ॥
येषां न प्रवणं चित्तं वासुदेवे जगन्मये ॥ १४ ॥ अत्राग्रे बहुमहिमा शिवेनोक्तः विस्तरभयान्नलिख्यते किं
चिल्लिष्यते ॥ वसुदेवस्य पुत्रो यो भक्तार्थाय भविष्यति ॥ तं भवंतः समासाद्य ब्राह्मणोरहार्णवैः ॥ १५ ॥ अ

लक्ष्मीशोप्यपवर्गदः ॥ एक एव हि लक्ष्मीशस्ततो ध्येयो न चापरः ॥१९२॥ भुक्तेर्मुक्तेरिहान्यत्र नान्यो दाताज
नार्द्दनात् ॥ तस्माद्यत्नं मुमुक्षोर्नित्यं सेवनीयः सुखप्रभुभिः ॥१९३॥ विहाय केशवादन्यं ये सेवंत्यल्पमेधसः ॥
संसारचक्रे गहने ते विशंति पुनः पुनः ॥१९४॥ एको धर्मप्रदो विष्णुस्त्वेकोवद्दर्थदो हरिः ॥ एकः कामप्रदः
श्चक्री त्वेको मोक्षप्रदोच्युतः ॥१९५॥ शार्ङ्गिणं ये परित्यज्य देवमन्यमुपासते ॥ ते सज्झिस्त्ववाहिका यौ वेदहीना
यथा हि द्विजा इति ॥१९६॥ नन्वत्र श्रीपाणां वाक्ये न व्यासः काश्यां गत्वा वैश्रवैः समेत्य कीर्त्तनं नत्वादिपूर्वकं ज्ञान
वापीक्षाष्ययदा वाक् स्तुत्येमं प्रतिज्ञां कर्त्तुं प्रवृत्तः तदेव नंदिना वाक् वाक्प्रतिष्टंभः कृतः ॥१९७॥ तदा द
श्यप एव विष्णुरागत्य व्यासं प्रत्युक्तवान् पुनरपित्वमेवं मा काषीरिति रुद्र एव सर्वेश्वरश्च निश्चित्य तदा व्यासे
न रुद्राष्टकं कृत्वा तस्यैवाराधनं कृतमिति श्रवणात् ॥१९८॥ कथमत्र प्रमाणत्वेनोपन्यास इति चेत् ॥ न ॥ व्या
सस्य यदा नंदिना वागादिप्रतिबंधः कृतः तदा विष्णुनैव चिंतितं ॥१९९॥ अयं तमोप्रधान इत्येवमकारि मया
प्येवं कर्त्तव्यं चेत्तदा महान् विरोधो भविष्यति ॥ तस्मान्मया स्वसत्वानुसारेणैव कर्त्तव्यमित्यागत्य व्यासं प्रत्यु
क्तं त्वङ्गैति यामस्माभिप्रायः किं विस्मृतः ॥ अनेन ममाज्ञयैव तामसेषु पुराणेषु स्वस्य सेव्यत्वं प्रतिपाद्यते
तस्मात्त्वया त्वेवं न कर्त्तव्यं इत्यभिप्रायेणोक्तेः ॥ एतत्सर्वं पूर्वमुक्तं अग्रे च वक्तव्यमिति ॥२००॥ स्कांदे कुमा
रिकाखंडे ऐतरेयाख्याने नारदवाक्यं ॥ वासुदेवविहीनं वै तीर्थं मतं न रोचतो ॥ आस्तां गगने यद्वत्स
हि भूषणं भूषणाः ॥१॥ यत्रैव हरिः स्वामी तीर्थं गेहेष्यमानसे ॥ शास्त्रे वा तद्दसत्सर्वं हंसं तीर्थं नवायसं ॥२

सततं मधुसूदनं ॥२९॥ वृथा यज्ञा वृथा वेदा वृथा श्रुतं । वृथा तपश्च कीर्तिश्च यो द्वेष्टि मधुसू-
दनं ॥३०॥ वाह्यैस्तथांतःकरणैरविक्लवै योनार्चयेत्केशवमीशितारं । पुष्पैश्च पत्रैर्जलपल्लवादिभिः
नूनं समुच्छेषि विधितस्करेण ॥३१॥ नारसिंहे च नारद प्रस्मानंतरं रुद्रवाक्यं । ज्ञानामृतं परं गुह्यं रहस्य-
स॰ व॰ मृषिसत्तम ॥ वक्ष्यामि श्रृणु दुःखघ्नं सर्वबंधनभयापहं ॥३२॥ तृणादि चतुरास्यांतं भूतग्रामं चतुर्विधं ॥
चराचरं जगत्सर्वं प्रसुप्तं यस्य मायया ॥३३॥ तस्य विष्णोः प्रसादेन यदि कश्चित्प्रमुच्यते ॥ भोगैश्वर्यमदे-
न्मत्तस्तत्वज्ञानपराङ्मुखः ॥३४॥ स संसारे महापंके जीर्णगौरिव मज्जति । यस्त्वात्मानं निबध्नाति क-
पु॰ सं॰ र्मभिः कोशकारवत् ॥३५॥ तस्य मुक्तिं न पश्यामि जन्मकोटिशतैरपि । तस्मान्नारद सर्वेषां देवानां देवमव्य-
६ यं । आराधयेत्सदा सम्यक् ध्यायेद्विष्णुं समाहितः ॥३६॥ यस्तं विष्णुमनाद्यंतमजं स्वात्मनि संस्थितं सर्व-
ज्ञमचलं विष्णुं सदा ध्यायन्विमुच्यते ॥३७॥ वृतं सत्यं परं ज्ञेयं व्यक्ताव्यक्तं सनातनं ॥ निःकलं विरजं वि-
ष्णुं स० ॥३८॥ सर्वदुःखक्षयकरं सर्वशांतिकरं हरिं ॥ अनादिमक्षरं नित्यं निर्गुणं तमसः परं ॥३९॥ सर्वधृ-
९ क्शाश्वतं विष्णुं स० । निर्विकल्पं सदाभासं । निःप्रपंचं निरामयं वासुदेवं गुरुं विष्णुं स० ॥४०॥ निरंजनं
परं शांतमच्युतं भूतभावनं । देवगर्भमजं विष्णुं स० ॥४१॥ अतींद्रियमनिर्देश्यं अचिंत्यं अपराजितं । तं राम
विज्ञानमयं विष्णुं स० ॥४२॥ सर्वभावविनिर्मुक्तमप्रमेयमलक्षणं ॥ निर्वाणमनघं विष्णुं स० ॥४३॥ जन्ममृ- ६
त्युजरातीतं निर्विकारं सनातनं । निर्बीजमनघं विष्णुं स० ॥४४॥ अमृतं परमानंदं सर्वोपाधिविवर्जि-

र्चयंति यथान्यायं ब्राह्मणा मिव शाश्वतं ॥ यो हि मां द्वेष्टि केतव ब्राह्मणं च पितामहं ॥ १५ ॥ द्रष्टव्यस्तेन भग
वान्वासुदेवः प्रतापवान् ॥ १६ ॥ तस्मिन्नहं द्विष्टे तन्मे नास्ति विचारणा ॥ १७ ॥ स यस्य पुंडरीकाक्षः प्रीति
युक्तो भविष्यति ॥ तस्य देवगणाः प्रीता ब्रह्मपूर्वा भविष्यति ॥ १८ ॥ यत्कृतं मानवो लोके संश्रयिष्यति केश
वं । तस्य कीर्तिर्यशश्चैव स्वर्गश्चैव भविष्यति ॥ १९ ॥ धर्माणां देशिकः साक्षाद्भविष्यति स धर्मभाक् ॥ धर्म
विद्भिः स देवेशो नमस्कार्यः सदाच्युतः ॥ २० ॥ धर्म एव सदा हि स्यात्तस्मिन्नभ्यर्चिते विभो । कर्मणा मन
सा वाचा स नमस्यो द्विजैः सदा ॥ २१ ॥ यत्नवद्भिरुपस्थाय द्रष्टव्यो देवकीसुतः । एष वै विहितो मार्गो
मया चैव मुनिसत्तमाः ॥ २२ ॥ ते दृष्ट्वा सर्वदेवेशं दृष्ट्वा सुरसत्तमाः । अहं चैव नमस्यामि नित्यमेव जग
त्पतिं ॥ २३ ॥ तत्रैव व्यास वाक्यं ॥ धन्यास्ते पुरुषा लोके ये र्चयंति सदा हरिं । सर्वपापहरं देवं सर्वकामफल
प्रदं ॥ २४ ॥ ब्राह्मणाः क्षत्रिया वैश्याः अन्ये शूद्रांत्यजातयः ॥ संपूज्य तं सुरवरं प्राप्नुवंति परां गतिमि य
ति ॥ २५ ॥ वामनपुराणे केशिराद्रसंप्रति ऋषीणां वाक्यं ॥ देवानां परमो धर्मः सदा यज्ञादिकाः क्रियाः ॥
स्वाध्यायवेदवेत्तृत्वं विष्णुपूजारतिः स्मृता ॥ २६ ॥ दैत्यानां बाहुशालित्वं मात्सर्यं युद्धसत्क्रिया । नदनं
नीतिशास्त्राणां हरभक्तिरुदाहृता ॥ २७ ॥ पंचरात्रे च पद्मसंहितायां व्यतिरेकः ॥ वासुदेवं परित्य
ज्य योन्यं देवमुपासते ॥ नरकाय भवंत्येते नात्र कार्या विचारणा ॥ २८ ॥ तस्मात्पूजयेद्देवेशं विधिनानेन
नैव मुनद्दति ॥ वामनपुराणे ॥ किं जपैः स्तोत्रमंत्रैर्वा किं तपोभिः किमाश्रमैः ॥ यस्य नास्ति परा भक्तिः

५१

णोः वैरैः ॥ अर्चयंतु यथान्यायं ब्राह्मणामि शाश्वतं ॥ ६३ ॥ यो हि मां द्रष्टुमिच्छेत ब्रह्माणं च पितामहं । द्रष्ट
व्यस्तेन भगवान्वासुदेवः प्रतापवान् ॥ ६४ ॥ दृष्टे तस्मिन्नहं दृष्टो न मे त्रास्ति विचारणा । पितामहो वा देवे
ज्ञात श इति वित्त तपोधनाः ॥ ६५ ॥ स यस्य पुंडरीकाक्षः प्रीतियुक्तो भविष्यति । तस्य देवगणः प्रीतो ब्रह्मपूर्वो भ
विष्यति ॥ ६६ ॥ धर्माणां देशिकः साक्षात्स भविष्यति धर्मभाक् । धर्मविद्भिः स देवेशो नमस्कार्यः सदोद्यतैः
॥ ६७ ॥ धर्म एव परो हि स्यात्तस्मिन्नभ्यर्चिते विभो । स हि देवो महातेजाः प्रजाहितचिकीर्षया ॥ ६८ ॥ धर्मार्थं
ना.व. पुरुषव्याघ्रो ऋषिकोटीः समर्जह । ताः सृष्टास्तेन विभुना पर्वते गंधमादने ॥ ६९ ॥ सनत्कुमारप्रमुखा चतुरः
स्तिष्ठंति तपसान्विताः । तस्मात्स वाग्मी धर्मज्ञो नमस्यो धर्मपुंगवाः ॥ ७० ॥ वंदितो हि स वंद्येत मानितो मान
पु.सं. यीत च । अर्हितश्चार्हयेन्नित्यं पूजितः प्रतिपूजयेत् ॥ ७१ ॥ दृष्टः पश्येदहरहः संश्रितः प्रतिसंश्रयेत् ।
१० अर्चितश्चार्चयेन्नित्यं स देवो द्विजसत्तमः ॥ ७२ ॥ एवं तस्यानवद्यस्य विष्णोर्वै परमं व्रतं । आदिदेवस्य
10 महतः सज्जनाचरितं सदा ॥ ७३ ॥ भुवनेऽभ्यर्चितो नित्यं देवैरपि सनातनः । अभयेनानुरूपेण युज्यं
ते तमनुव्रताः ॥ ७४ ॥ कर्मणा मनसा वाचा स नमस्यो द्विजैः सदा । यत्नवद्भिरुपस्थाय द्रष्टव्यो देवकी राम
सुतः ॥ ७५ ॥ एष वोऽभिहितो मार्गो मया वै मुनिपुंगवाः । तं दृष्ट्वा सर्वशो देवं दृष्टाः स्युः सुरसत्तमाः ॥ ७६ ॥ १०
महावराहं तं देवं सर्वलोकपितामहं । तस्य चैवाग्रजो भ्राता श्वेताद्रिनिचयप्रभः इति ॥ ७७ ॥ वाराहे च
भद्राश्वागस्त्यसंवादे नारदश्वेतद्वीपेश्वरसंवादंते । तस्मात्त्वमपि राजेंद्र भक्त्याराधय केशवं हरिं

तं ॥ ब्रह्मज्ञेयं शिवं विष्णुं स० ॥ ४५ ॥ योगीश्वरं पुराणाख्यमशरीरं गुहाशयं ॥ अमात्रमव्ययं विष्णुं स० ॥ ४६ ॥
स्वरूपं सत्यसंकल्पं शुद्धमाकाशवत्परं ॥ एकाग्रमनसा विष्णुं स० ॥ ४७ ॥ सर्वद्वंद्वविनिर्मुक्तं सर्वदुःख
विवर्जितं ॥ अप्रतर्क्यमहाविष्णुं स० ॥ ४८ ॥ आनंदमात्रमद्वैतं चतुर्थं परमं पदं ॥ तं सर्वहृद्गतं विष्णुं स० ॥ ४९ ॥
स्वरूपं सत्यसंकल्पं शुद्धमाकाशवत्परं ॥ एकाग्रमनसा विष्णुं स० ॥ ५० ॥ सर्वात्मकं स्वभावस्थमात्मचैत
न्यरूपकं ॥ शुभ्रमेकाक्षरं विष्णुं स० ॥ ५१ ॥ वागातीतं त्रिकालज्ञं विश्वेशं लोकसाक्षिणं ॥ सर्वस्मादुत्तरं विष्णुं
स० ॥ ५२ ॥ आनिर्वाच्यमविज्ञेयं अकारादिमसंहितं ॥ एकं निरंतरं विष्णुं स० ॥ ५३ ॥ विश्वार्च्यं विश्वगोप्तारं सु
हृदं सर्वकामदं ॥ स्थानत्रयातिगं विष्णुं स० ॥ ५४ ॥ सर्वदुःखक्षयकरं सर्वशांतिकरं परं ॥ सर्वपापहरं विष्णुं
स० ॥ ५५ ॥ ब्रह्मादिदेवगंधर्वैर्मुनिभिः सिद्धचारणैः ॥ योगिभिः सेवितं विष्णुं स० ॥ ५६ ॥ विष्णुप्रतिष्ठितं विश्वं
विष्णुर्विश्वप्रतिष्ठितं ॥ विश्वेश्वरमजं विष्णुं स० ॥ ५७ ॥ संसारबंधनान्मुक्तिमिच्छन्कामानशेषतः ॥ त्यक्त्वैन
मुदारं विष्णुं सदा ध्यायन्विमुच्यत इति ॥ ५८ ॥ ब्रह्मवैवर्ते च स्तवाक्यं ॥ सुखसेव्यः सुखाराध्यो जगदीशः
सुखप्रदः ॥ हरिरेकेन संदेहः सर्वशास्त्रेषु संमतः ॥ ५९ ॥ तस्मात्सदसद्भिर्ध्यानं विहाय विदसत्क्रहे ॥ पुराप
तं तिदेहायं हरिमेकं त्वमर्च्चय ॥ ६० ॥ देशेस्मिन्भारते पुण्ये प्राप्य मानुष्यमध्रुवं ॥ न कुर्यादात्मनः श्रेयो को
तात्पूर्ह
न्यस्तस्मादचेतनः ॥ ६१ ॥ बुधाराध्यो जगद्बीजः तुष्टो निजपदप्रदः ॥ हरिः सत्यमिदं हित्वा तदन्यं के समाश्र
यइति ॥ ६२ ॥ भारते दान धर्मे [illegible] वाक्यं ॥ तं भवंतः समासाद्य वाङ्मयैरर्ह

दपरायणोन्नरान्नमांविंदेत्त्वंहत्वदुद्व्यायतोजित॥९१॥ वाराहे अगस्तिवाक्यं॥ विष्णुरेवसदा
राध्यःसर्वदेवैरपिप्रभुः।तस्योपायंप्रवक्ष्यामियेनासौवरदोभवेत्॥९२॥रहस्यंसर्वदेवानांमुनी
नांमनुजांस्तथा।नारायणःपरोदेवस्तंप्रणम्यनसीदति॥९३॥स्कांदे॥आलोड्यसर्वशास्त्राणि
विचार्यचपुनःपुनः।इदमेकंसमुत्पन्नंध्येयोनारायणःसदा॥९४॥रेवाखंडे॥भवजलधिगतानां
द्वंद्ववाताहतानांसुतदुहितकलत्रत्राणभारार्दितानां।विषमविषयतोयेमज्जतामप्लवानांभव
तिशरणमेकोविष्णुपोतोनराणां॥९५॥पाद्मेउत्तरखंडेरुद्रवाक्यं।नविष्णुभक्तिविमुखस्यनिंदाक
स॰ व॰ च्यते।कर्मकांडेप्रवृत्तोयःसर्वदाविष्णुनिंदकः।निंदकस्तज्जनानांतुमहाचांडालउच्यते॥९६॥वे
पु॰ सं दाध्ययनरतोनित्यंवैयज्ञपावकः।अग्निहोत्ररतोनित्यंविष्णुधर्मपराङ्मुखः॥९७॥निंदतिवि
११ ष्णुधर्मान्यःसुवेदबाह्यःसुरेश्वरि।भक्तोसततस्तुतिस्व।तेधन्यास्तेविमर्त्यलोकेर॥शूद्रोयोवाथवै
श्योवाम्लेच्छोवासुरसत्तमे।भक्तिंकुर्वन्विशेषेणमुक्तिंसयातिनेतराः॥९८॥तेधन्यादेविमर्त्यलोके
येविप्रावैष्णवास्मृताः।स्वात्मावैतारितस्तैस्तुसकुलःनात्रसंशयः॥९९॥ब्राह्मणादिभिःदासत्वेनै राम
वभाव्यंसर्वेषांसततांसमतत्वात्‌ तथाचपाद्मेनारदवाक्यं॥२००॥दासोहंवासुदेवस्यदेवदेवस्य ११
शार्ङ्गिणः॥शंखचक्रगदापाणेस्त्रैलोक्यस्यैकचक्षुषः॥१॥ब्रह्मचारीगृहस्थोवावानप्रस्थोथ
भिक्षुकः॥केशवाराधनंहित्वानैवयातिपरांगतिं॥२॥जन्मांतरसहस्रेषुयस्यस्यान्मतिरीदृशी॥

प्रपन्नोमनुजोनसम्भूयोहिभावुकः॥७८॥यौवनंधनमायुष्यंपद्मिनीजलबिंदुवत्॥अतीवचंचलं
ज्ञात्वाच्युतमेकंसमाश्रयेत्॥७९॥विनामुकुंदंगोविंदंपरमानंदमच्युतं॥नान्योजप्येतनम्येतसमे
ज्येतनरैःक्वचित्॥८०॥सएवदंडोराजेंद्रनपैःशुभफलेप्सुभिः॥योविष्णुभक्तिरहितःप्राणैरपिधनै
रपि॥८१॥वाप्निचेतसिकृत्वेयस्यदेवोजनार्दनः॥सएवसर्वदावंद्योनररूपोजनार्दनः॥८२॥कुलेमे
वैष्णवत्वंहित्रिषुलोकेषुपार्थिव॥जन्मांतरसहस्राणिसमाराध्यगिरीश्वरं॥८३॥वैष्णवत्वमवाप्नो
तितस्माराधयाच्युतं॥एकएवहिसारोत्रसंसारेक्षणभंगुरे॥८४॥कमलाकांतपादाब्जभक्तिभावो
विलक्षणः॥तिष्ठतागच्छतावापिस्वपताजाग्रतातथा॥शयानेनोपविष्टेनजप्योनारायणःसदा
॥८५॥प्रसन्नेयदिगोविंदेप्रसन्नाःसर्वदेवताः॥अप्रसन्नेयदिहरौप्रसन्नैरपितैश्चकिं॥८६॥पंच
मस्कंधेइलावृतेरुद्रस्कंतो॥नयस्यमायागुणचित्तवृत्तिभिःनिरीक्षितोह्यणुनापिदृष्टिरज्यते।
ईशेयथानोऽजितमन्युरंहसाकस्तंनमन्येतजिगीषुरात्मनः॥८७॥यन्निर्मितांकर्ह्यपिकर्मपर्वणीं
मायांजनोयंगुणसर्गमोहितः॥नवेदनिस्तारणयोगमंजसातस्मैनमस्तेविलयोदयात्मने॥८८॥
नारदीयेनारदः॥सृष्टिरत्रद्विविधाप्रोक्तादेवासुरविभेदतः॥हरिभक्तियुतादेवातद्धीनाह्यसुरामताः
॥८९॥तस्मात्सत्वगुणाधिष्ठाःहरिभक्तिपरायणाः॥ब्रह्माण्डंसर्वंचविख्यातायतोभक्तिःसकुंडलेभाः॥९०॥
पंचमेलक्ष्मीवाक्यं॥मत्वात्रयमेशस्यरासरुद्रस्यजगंतउगतपर्पद्रयधियः॥ऋतेभवत्पा

माकंय
१८ अध्या
ते

सम्यक्प्रकारेणप्राप्नोति१

स॰वं॰

पु॰सं॰ १२

र्वहिवाकं।।आराध्य वरदं विष्णुं इष्टप्राप्तिनसंशयः।।समेतिनान्यथामर्त्यः किमन्यत्कथयामि वः।।१७।।
तस्मात्त्वंप्रजाविवर्द्धार्थंसर्वभूतप्रभुंहरिं।।आराधयतगोविंदं यदिसिद्धिमभीप्सथ।।१८।।धर्म
मर्थंचकामंच मोक्षंचाप्यिच्छतां सदा।।आराधनीयो भगवाननादिपुरुषोत्तमः।।१९।।वैष्णवाना
मभावेनिंदापापं।।स्वपाकमिव चक्रेतलोकेविप्रमवैष्णवं।।वैष्णवोवर्णबाह्योपि पुनातिभुवनत्रयं।।२०।।
वैष्णवे गुरुरन्वेति प्रह्लादः।।धर्मार्थकाममोक्षाख्याः पुरुषार्थाउदाहृताः।।चतुष्टयमिदंयस्मात्तस्मा
त्किंकिमिदंत्वया।।२१।।मरीचिमिश्रैर्दक्षैः एतथैवान्यैरनंततः।।धर्मःप्राप्तस्तथैवार्थः कामःप्राप्तस्तथा
परैः।।२२।।तत्तत्वविदिनोभूत्वाज्ञानध्यानसमाधिभिः।।अवापुर्मुक्तिमपरेपुरुषाध्वस्तबंधनाः।।२३।।
संपदैश्वर्यमाहात्म्यज्ञानसंततिकर्मणां।।विमुक्तेश्चैकतालभ्यंमूलमाराधनंहरेः।।२४।।यतोधर्मार्थ
कामाख्यंमुक्तिश्चापिफलंद्विजाः।।तेनापिहिकिमित्येवमनंतेनाकिमुच्यते।।२५।।वैष्णवब्रह्मद्वेषः।।परम
त्माचचसर्वेषांसाधारः परमेश्वरः।।विष्णुनाम्नासदेवेषुवेदांतेचगीयते।।२६।।प्रवृत्तंचनिवृत्तंचद्वि
विधं कर्मवैदिकं।।ताभ्यामुभाभ्यांपुरुषैः सर्वमूर्तिसइज्यते।।२७।।पापाप्रमाघमाहात्म्यंनेकरूपेणोतिःअ
माघस्नायीनिंदायांश्च वैष्णवाश्चाह्मणोप्युक्तः।।२८।।तथाहि।।अवैष्णवोहतोविप्रोहतंश्राद्धमयो पाप
गिनं।।अव्रतस्यहतंक्षेत्रं अनाचारंहतंकुलं।।२९।।सदंभश्चहतोधर्मः क्रोधेनैवहतंतपः।।अदृढं १२
चहतंज्ञानंप्रमादेनहतंश्रुतं।।३०।।गुर्वभक्ताहतानारीब्रह्मचारीहतस्तथा।।अदीप्ताग्नेर्हतोहोमे
योगःक्लेपहतास्तुक्तिरसात्विकी।।३१।।उपभोग्याहताकन्यास्वार्थपाकक्रियाहता।।शूद्रभिक्षो

दासोहं विष्णुभक्तानामिति सर्वार्थसाधकः ॥३॥ स याति विष्णुसालोक्यं पुरुषो नात्र संशयः ॥ शुद्रेकु
लेवतीर्णो याव्राह्मणो वेदतत्परः ॥४॥ वैष्णवो विष्णुरूपोसौ नान्यो विप्रस्तु कर्हिचित ॥ वैष्णवे ए ध्यौ
स्कन्दौ ॥ त्वामाराध्य परं ब्रह्मयाता मुक्तिं मुमुक्षवः वासुदेवमनाराध्य को मोक्षं समवाप्स्यति ॥५॥ तत्रै
व वर्णिनां त्रिलोकवर्णिनां नंतरं ॥ गत्वा गत्वा निवर्त्तंते चंद्रसूर्यादयो ग्रहाः ॥ अद्यापि न निवर्त्तंते द्वाद
शाक्षरचिंतका ॥६॥ तत्रैव ब्रह्मस्कन्दौ च । योगिभिश्चिंत्यते योसौ मुक्तिहेतोर्मुमुक्षुभिः । स त्वाद्यान्
संतोशय त्रच प्राकृता गुणाः ॥७॥ स मुकुंदः सर्वभुद्देभ्यो पुमानाद्यः प्रसीदतु देवस्कन्दे ॥ तावदार्त्ति
स्तथा वांछा तावन्मोहस्तथाऽसुखं ॥ यावन्न याति शरणं त्वामशेषाघनाशनं ॥८॥ तत्रैव ध्रुवं प्र
सप्तर्षिसत्तमानां वाक्यानि ॥ अनाराधितगोविंदैः नरैः स्थानं नृपात्मज ॥ न हि संप्राप्यते श्रेष्ठं तस्मा
दाराधयाच्युतं ॥१०॥ परः पराणां पुरुषो यस्य तुष्टो जनार्दनः ॥ संप्राप्नोत्यक्षयं स्थानमेतत्सत्य
मयोदितं ॥११॥ यस्मात्सर्वमेवेतदच्युतस्याव्ययात्मनः ॥ तमाराधय गोविंदं स्थानमग्र्यं यदीच्छ
सि ॥१२॥ परं ब्रह्म परं धाम योसौ ब्रह्म तथा परं ॥ तमाराध्य हरिं याति मुक्तिमप्यति दुर्लभां ॥१३॥ यो यज्ञपु
षः यज्ञेशो योगेयः परमः पुमान् ॥ तस्मिंस्तुष्टे यदप्राप्यं किं तदस्ति जनार्दने ॥१४॥ ऐंद्रमिंद्रः प
रं स्थानं यमाराध्य जगत्पतिं ॥ प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत ॥१५॥ प्राप्नोत्याराधिते विष्णौ
मनसा यद्यदीच्छति ॥ त्रैलोक्यांतर्गतं स्थानं किमु वत्सोत्तमोत्तमं ॥१६॥ प्रचेतसः प्रति प्राचीन

स्मन्ति प्रीत्वमङ्घ्रिसे ॥४५॥ तावज्जीवितं श्रेयो यावत्त्वं हृदि वर्तसे ॥ अहो पुंसां महामोह अहो पुंसां प्र
मादता ॥४६॥ वासुदेवमनादृत्य यदन्यत्र कृतश्रमाः ॥ इदमेव हि मांगल्यमिदमेव धनार्जनं जीवित
स्य फलं चैतद्यद्दामोदरकीर्तनं ॥४७॥ नाधोक्षजात्परो धर्मो नार्थो नारायणात्परः ॥ न कामः केशवा
13 दन्यो नापवर्गो हरिं विना ॥४८॥ इयमेव परा हानिरुपसर्गोयमेव हि ॥ अभाग्यं परमं चैतद्वासुदेवं न य ङ्ग:खः
त्स्मरेत् ॥४९॥ हरेराराधनं पुंसां किं किं न कुरुते बत ॥ पुत्रमित्रकलत्रार्थराज्यस्वर्गापवर्गदं ॥५०॥ हर
त्यघं ध्वंसयेति व्याधीनाधीन्नियच्छति ॥ धर्मं विवर्द्धयेत् क्षिप्रं प्रयच्छति मनोरथं ॥५१॥ भगवच्चरणद्वंद्वं नि हरीकीर्तिः प
त० प्र० र्द्वंद्वं ध्यानमुत्तमं ॥ नितांतकमलाकांतं शांतं चित्तं विधापयेत् ॥५२॥ संशीलयेत् क्षणं न त्वं कमलातत्र नि
पु०सं श्चला ॥ तां यो पहाय भक्त्या यः सेवते यज्ञपूरुषं ॥५३॥ सेवितस्तेन नियतं पुरोडाशमहोधिया ॥ ये मुहूर्तं ह
१३ णाये च याकाष्ठाये निमेषिका ॥५४॥ तते विष्णुस्मृते यातास्तेषु मुष्टो यमेनसः ॥ न नमामि न च स्तौमि
न पश्यामि च चक्षुषा ॥५५॥ न स्पृशामि न वदामि न च यामि हरिं विना ॥ भागवते प्रथमे सूतवाक्यं ॥ स
त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः ॥
श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः ॥५६॥ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ॥ तमसस्तु र राम
जस्तस्मात्सत्वं यद्ब्रह्मदर्शनं ॥५७॥ भेजिरे मुनयो थाग्रे भगवंतमधोक्षजं ॥ सत्वं विशुद्धं क्षेमाय कल्पंते १३
ये नु ता निह ॥५८॥ मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ ॥ नारायणकलाः शांता भजंति ह्यनुसूय

हतो योगः कृपणस्य हतं धनं ॥३२॥ अनभ्यासे हता विद्या हतो राजा विरोधकृत् ॥ जीवनार्थं हतं
तीर्थं जीवनार्थं हतं व्रतं ॥३३॥ असत्या हता वाणी तथा पैशुन्यवादिनी ॥ संदिग्धो हि हतो मंत्रो व्य
ग्रचित्तो हतो जपः ॥३४॥ हतमश्रोत्रिये दानं हतो लोकश्च नास्तिकः ॥ अश्रद्धया हतं सर्वं यत्कृ
तं पारलौकिकं ॥३५॥ इहलोको हतो दंभाद्दरिद्राणां यथा नृणां ॥ मनुष्याणां तथा जन्म माघस्नानं
विना हतमिति ॥३६॥ तत्रैव कुंडलविकुंडलयमदूतसंवादे यमदूतवाक्यं ॥ अपाकमिव नेत्रालो
के विभ्रमवे स्ववो ॥ वैष्णवो वर्ष्मणा ह्योपि पुनाति भुवनत्रयं ॥३७॥ नरकेपि चिरं मग्नान् पूर्वजान् स्वे कुले
द्यो ॥ तदैव यांति ते स्वर्गं यावदा चेति स्तुतो हरिः ॥३८॥ स्कांदे काशीखंडे रुद्रवाक्यं ब्रह्माणं प्रति ॥ ममैव
यः स्वयं विष्णुः प्रणामत्वममुं हरिं ॥ इत्युक्त्वाथ स्वयं रुद्रो ननाम गरुडध्वजं ॥३९॥ त्वं कर्त्ता सर्वभूता
नां पाता हर्ता त्वमेव च ॥ त्वमेव जगतां पूज्यस्त्वमेव जगदीश्वरः ॥४०॥ त्वद्भक्तानां मया विष्णो देयं
निर्वाणमुत्तमं ॥ ब्रह्मवैवर्ते वीरसेनं कामकलोवाच ॥ यन्नामधेयं वचसा मनसा स्मृत्यमुत्तमं ॥ शिर
सा पादतीर्थं तु गृहीत्वा काशिकाश्रयः ॥४१॥ यस्य स्वरूपं सर्वात्मा काश्यामुपदिशत्यलं ॥ तारकं
ब्रह्म येनास्य लोकस्य चापनुर्भवः ॥४२॥ स्कांदे काशीखंडे ॥ ध्रुवस्तुत्या विष्णुसेवैव धेनैव कर्माद
नो समफलत्वमुक्तं तद्यथा ॥४३॥ साक याय च्यते नाम तन्मन्त्रो यच्च दर्पितं ॥ तत्कर्म यत्त्वदर्थं
तत्तपो यद्भवत्स्मृतिः ॥४४॥ तद्धनं ऊर्मिनां शुद्धं यत्त्वदर्थे व्ययी कृतं ॥ स एव सफलः कालो य

१४

पूर्णकामं स्वेनैव लाभेन समं प्रशान्तं ॥ विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितर्त्ति सिंधुं ॥७१॥
तृतीये देवहूतिवाक्यं ॥ नेह यत्कर्म धर्माय न विरागाय कल्पते ॥ न तीर्थपादसेवायै जीवन्नपि मृतो हि सः ॥७२॥
कपिलवाक्यं ॥ तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनं ॥ तद्गुणाश्रयया भक्त्या भजनीयपदाम्बुजं ॥७३॥
चतुर्थे मनुनीतिवाक्यं ध्रुवप्रति ॥ यस्यांघ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः ॥ अजोऽध्या
तिष्ठत्खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवंद्यं ॥७४॥ तथा मनुत्ते भगवान् पितामहो यमेकमत्या
प पुरदक्षिणैर्मखैः ॥ इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यं ॥७५॥ तमेव वत्साश्रय भृत्य
•सं• वत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिं ॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषं ॥७६॥
नान्यं ततः पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि किंचन ॥ यो मृग्यते हस्तगृहीतपद्मया श्रि
१४ येतरैरंग विमृग्यमाणया ॥७७॥ तत्र नारदः ॥ धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ॥ एक एव
हरेस्तत्र कारणं पादसेवनं ॥७८॥ षष्ठे चित्रकेतुं प्रति नारदः ॥ यत्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो
भ्रममिमं द्वितीयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ॥७९॥
श चतुर्थे पृथुः ॥ यशः शिवं सुश्रव आर्यसंगमे यदृच्छया चोपशृणोति ते सकृत् ॥ कथं गुणज्ञो विर राम
मेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥८०॥ भजंत्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमो १४
दयं ॥ भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥८१॥ सनत्कुमारः ॥ यत्पादपंकज
पलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति संतः ॥ तद्वन्न रिक्तमतयो यतयो निरुद्धस्रोतोगुणा

व: ॥ ५९ ॥ रजस्तमःप्रकृतयः समशीला भजंति वै । पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ ६० ॥
वासुदेवपरा वेदा वासुदेवपरा मखाः । वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ ६१ ॥ वासुदेवपरं ज्ञानं
वासुदेवपरं तपः । वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ ६२ ॥ स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांग
पाणेः । योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ॥ ६३ ॥ अथेह धन्या भगवंत इत्थं यद्वासुदे
वेऽखिललोकनाथे । कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ॥ ६४ ॥ नारदवाक्यं व्यासं प्रति ।
त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि । यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आ
प्तोऽभजतां स्वधर्मतः ॥ ६५ ॥ न वै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिं । स्मरन्मुकुंदांघ्र्युप
गूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः ॥ ६६ ॥ तृतीयमनुं प्रति ब्रह्मवाक्यं ॥ येषां न तुष्टो भगवान्यज्ञ
लिंगो जनार्दनः । तेषां श्रमो हि पार्थाय यदात्मा नादृतः स्वयं ॥ ६७ ॥ भगवंतं प्रति सनत्कुमारवाक्यं
नात्यंतिकं विगणयंत्यपि ते प्रसादं किंत्वन्यदर्पितभयं भ्रुव उन्नयैस्ते । येऽंग त्वदंघ्रिशरणा भवतः क
थाया कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ६८ ॥ कामं भवः स्ववृजिनैर्निरयेषु नः स्याच्चेतोलिव
द्यदि नु ते पदयो रमेत । वाचश्च नस्तुलसिवद्यदि तेंऽघ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरंध्रः ॥
॥ ६९ ॥ प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः । तस्मा इदं भगवते नम इद् नमइ
विधेम योऽनात्मनां दुरुदयो भगवानप्रतीतः ॥ ७० ॥ प्रऐदेवस्तुतौ व्यतिरेकः । आविस्मितं तं परि

तथैव सर्वार्हणमच्युतेज्या ॥ ९५ ॥ तमेकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशं ॥ स्वतेज
सा ध्वस्तगुणप्रवाहम्प्रहूतः ॥ निजजनवसगत्वं मात्मैकभावेन भजध्वमद्धा ॥ ९६ ॥ अपहतसकले
षणामलात्मन्यविरतमेधितभावनोपहूतः ॥ निजजनवसगत्वमात्मनोऽयन्न सरति छिद्रवदक्ष निजजनवश त्वंकरोति ३
रः सतां हि ॥ ९७ ॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ॥ श्रुतधनकुलकर्मणां
15 मदैर्ये विदधति पापमकिंचनेषु सत्सु ॥ ९८ ॥ श्रियमनुचरंतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यत्स्व
स०४० पूर्णः ॥ न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमान्कृतज्ञः ॥ ९९ ॥ द्वितीये ब्रह्मा नारदं
प्रति ॥ न भारती मेंग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ॥ न मे हृषीकाणि पतंत्यसत्पथे
यन्मे हृदौत्कंठ्यवता धृतो हरिः ॥ ४०० ॥ सप्तमे प्रह्लादः ॥ तत्साधु मन्येसुरवर्य देहिनां सदा समु
पु०सं० द्विग्नधियामसद्ग्रहात् ॥ हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ॥ १ ॥ येषां स एष भ
१५ गवान्दययेदनंतः सर्वात्मनाश्रितपदो यदि निर्व्यलीकं ॥ ते दुस्तरामतितरंति च देवमायां नैषां मम
हमिति धीः श्वसृगालभक्ष्ये ॥ २ ॥ ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः
यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ३ ॥ सप्तमे प्रह्लादः ॥ कौमा
रआचरेत्प्राज्ञो धर्मान्भागवतानिह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं ॥ ४ ॥ यथा हि पुरुषस्येह रा०म १५
विष्णोः पादोपसर्पणं ॥ यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ ५ ॥ अष्टमे देवस्तुतौ ॥ यथा हि
स्कंधशाखानां तरोर्मूलावसेचनं ॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ६ ॥ अष्टमे रुद्रः हरिं

स्तमरणं भजवासुदेवं ॥८१॥ कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीर्षयंति ॥ तत्त्वं ह
रेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णं ॥८२॥ रुद्रः प्रचेतसः इति ॥ यः परं रंहसः सा
साक्षात्त्रिगुणाज्जीवसंज्ञितात् भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे ॥८३॥ स्वधर्मनिष्ठः शतजन्मभिः पु
मान्विरिंचतामेति ततः परं हि मां ॥ अव्याकृतं भागवतोथ वैष्णवं पदं यथाहं विबुधा कलात्यये ॥८५॥
अथ भागवता यूयं प्रियास्थ भगवान्यथा ॥ न मद्भागवतानां च प्रेयानन्योस्ति कर्हिचित् ॥८६॥ तत्र
नारदः ॥ यदा यस्यानुगृह्णाति भगवानात्मभावितः ॥ स जहाति मतिं लोके वेदे च परिनिष्ठितां ॥८७॥
तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥ हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ॥८८॥ तत्पाद
मूलं शरणं यतः क्षेमो नृणामिह ॥ स वै प्रियतमश्चात्मा यतो न भयमण्वपि ॥८९॥ इति वेद
स वै विद्वान्भगवान्स गुरुर्हरिः ॥ चतुर्थे नारदवाक्यं ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः
नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥९०॥ किं जन्मभिस्त्रिभिर्वेह सौक्रसावित्रयाज्ञिकैः ॥ कर्मभिर्वा
त्रयीप्रोक्तैः पुंसोपि विबुधायुषा ॥९१॥ श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या वा किं निपुण
निपुणता याबलेनेंद्रियराधसा ॥९२॥ किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ॥ किं वा श्रेयोभिरन्यैश्च न य
त्रात्मप्रदो हरिः ॥९३॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ॥ सर्वेषामपि भूतानां हरिरात्मदः प्रि
यः ॥९४॥ यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्च यथेंद्रियाणां

संश्रुत्य जमानस्तमेव च ॥१९॥ अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखा
स०४० तिगो भवेत् ॥२०॥ ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्द्धनं ॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवं ॥२१॥
एष मे सर्वधर्माणां धर्मोधिकतमो मतः ॥ यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ॥२२॥ पवित्राणां प
वित्रं यो मंगलानां च मंगलं ॥ दैवतं देवतानां च भूतानां योव्ययः पिता ॥२३॥ दशमे दीक्षितानां वाक्यं ॥
16 धिक् जन्म नस्त्रिवृद्यत्तद्धिग्व्रतं धिग्बहुज्ञता ॥ धिक्कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥२४॥
नूनं भगवतो माया योगिनामपि मोहिनी ॥ यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ॥२५॥ अक्रूरः कृ नेगृहाः
ष्णं प्रति ॥ अद्येशानो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः ॥ यत्पादशौचसलिलं
मु०से त्रिजगत्पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥२६॥ कः पंडितस्त्वदपरं शरणं समीयात् भक्तप्रि
याद्दृतगिरः सुहृदः कृतज्ञात् ॥ सर्वान्ददाति सुहृदो भजतोभिकामानात्मानमप्युपचयापचयौ न यस्य
१६ ॥२७॥ शुकवाक्यं ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः ॥ नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः
॥२८॥ श्रेयसामपि सर्वेषां ह्यात्मा ह्यवधिरर्थतः ॥ सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥२९॥ हरिर्दा
सस्य राजर्षेराडस्तूयमहोदयं ॥ नैवात्यपन्नसंसंतापि वन्मन्त्योमतं यथा ॥३०॥ दशमेऽष्टाशीतितमे त
तद्भजनेन तल्लोकप्राप्तिः हरिभक्त्या मुक्तिरिति निर्णीतं ॥ हरिर्हि निर्गुणः साक्षी भगवान्पुरुषः प्रकृतेः परः ॥ स राम
सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥३१॥ अत्र यद्गुणपरीक्षणमादावुक्तं पाद्मस्कंधे तद्भागवते दशम १६
स्कंधोक्ते द्रष्टव्यं विस्तरभयान्न लिखितं ॥३२॥ सनत्कुमारसंहितायामद्यं भागवती महात्म्ये ॥ याच

प्रति॥ तवैव चरणांभोजं श्रेयस्कामा निराशिषः। विसृज्योभयतः संगं मुनयः समुपासते॥७॥ अदिति
प्रति कश्यप वाक्यं॥ तप एव नियमाः साङ्ख्या तप एव च यमोत्तमाः। तपोदानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः
॥८॥ सप्तमे नारद वाक्यं॥ जीवराशिभिराकीर्ण अंडकोशांघ्रिपो महान्। तन्मूलत्वादच्युतेज्या सर्वजी
वात्मतर्पणं॥९॥ द्वादशे सूत। अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च
सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं॥१०॥ यूयं द्विजाग्र्या वत भूरिभागा यच्छश्वदा
त्मन्यखिलात्मभूतं॥ नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य॥११॥ हरिवंशे कैलाशया
त्रायां महेश्वर वचनं॥ आदिस्त्वं सर्वभूतानां मध्यस्त्वं सत्यमंतस्तथा भवान्। त्वत्तः सर्वं भवेद्धि स्म त्वयि
सर्वं प्रलीयते॥१२॥ त्वदुपासा जगन्नाथ सैवास्तु मम गोपते। यस्त्वां द्विषति विप्रेन्द्र मां द्वेष्टि न संशयः गोप
१३ त्वद्विस्तारो यतो देव अहं भूतपतिस्ततः। न तदस्ति विभो देव यत्ते विरहितं क्वचित्॥१४॥ भारते चानु
शासनिके युधिष्ठिर भीष्मयोः॥ संवादे प्रश्नोत्तराभ्यां निर्णीतं। वैशं० श्रुत्वा धर्मानशेषेण पावनानि
च सर्वशः। युधिष्ठिरः शांतनवं पुनरेवाभ्यभाषत॥१५॥ युधिष्ठिर। को धर्मः सर्वधर्माणां भवतः प
रमो मतः॥ किमेकं दैवतं लोके किं वाप्येकं परायणं॥१६॥ स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभं
किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात्॥१७॥ भीष्म॥ जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं। स्तुवं
न्नामसहस्रेण पुरुषः सततोत्थितः॥१८॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं। ध्यायन्स्तुवन्नम

ति॥४५॥योगिनामपिसर्वेषांमद्गतेनांतरात्मना॥श्रद्धावान्भजतेयोमांसमेयुक्ततमोमतः॥४६॥म
य्यासक्तमनाःपार्थयोगंयुंजन्मदाश्रयः॥असंशयंसमग्रंमांयथाज्ञास्यसितच्छृणु॥४७॥त्रिभिर्गु
णमयैर्भावैरेभिःसर्वमिदंजगत्॥मोहितंनाभिजानातिमामेभ्यःपरमव्ययं॥४८॥दैवीह्येषागुणम
यीममामायादुरत्यया।मामेवयेप्रपद्यंतेमायामेतांतरंतिते॥४९॥नमांदुष्कृतिनोमूढाःप्रपद्यंतेन
राधमाः॥माययापहृतज्ञानाआसुरंभावमाश्रिताः॥५०॥चतुर्विधाभजंतेमांजनाःसुकृतिनोर्जुन॥ १०
आर्त्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ॥५१॥तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते॥प्रियोहिज्ञा
निनोत्यर्थमहंसचममप्रियः॥५२॥उदाराःसर्वएवैतेज्ञानीत्वात्मैवमेमतं॥आस्थितःसहियुक्तात्मा
गु. सं. मामेवानुत्तमांगतिं॥५३॥बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते॥वासुदेवःसर्वमितिसमहात्मा
१७ सुदुर्लभः॥५४॥कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेन्यदेवताः॥तंतंनियममास्थायप्रकृत्यानियताःस्व
या॥५५॥योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति॥तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं॥५६॥
सतयाश्रद्धयायुक्तस्तस्याराधनमीहते॥लभतेचततःकामान्मयैवविहितान्हितान्॥५७॥अंतवत्तुफ
लंतेषांतद्भवत्यल्पमेधसां॥देवान्देवयजोयांतिमद्भक्तायांतिमामपि॥५८॥अव्यक्तंव्यक्तिमापन्नंम राम
न्यंतेमामबुद्धयः॥परंभावमजानंतोममाव्ययमनुत्तमं॥५९॥नाहंप्रकाशःसर्वस्ययोगमायासमावृ १७
तः॥मूढोयंनाभिजानातिलोकोमामजमव्ययं॥६०॥येषांत्वंतगतंपापंजनानांपुण्यकर्मणां॥तेद्वं
द्वमोहनिर्मुक्ताभजंतेमांदृढव्रताः॥६१॥जरामरणमोक्षायमामाश्रित्ययतंतिये॥तेब्रह्मतद्विदुःकृ

साधनसंपत्तिः पुरुषार्थचतुष्टये ॥ तया विना तदाप्नोति नरो नारायणाश्रयः ॥ ३३ ॥ अहो कष्टमसुं त्य
क्त्वा बदरीनाथमव्ययं ॥ देवांतरमुपासीनः किं प्राप्नोत्यधमः पुमान् ॥ ३४ ॥ धिक्तापि एवं वर्ष्याद्वै वि
मुखं बदरीपतेः ॥ श्रेयांस्यन्यानि कुर्वाणः प्यधमो सो न संशयः ॥ ३५ ॥ श्रुतिभिः स्मृतिभिर्वाथ पुराणै
ः सेतिहासकैः ॥ सर्वं न बदरीनाथादन्यद्ब्रह्मांडगोलके ॥ ३६ ॥ प क द शे क वि: ॥ मन्ये कुतश्चि
द्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं । उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्त्तते सर्वप्रकारेण ।
भीः ॥ ३७ ॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ॥ प्रपद्यमानस्य यथाश्नतः स्यु
ासंस्थ स्तुष्टिः पुष्टिः क्षुदपायोनुघासं ॥ ३८ ॥ इत्यच्युतांघ्रिं भजतोनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः
भवंति वै भागवतस्य राजंस्ततः परां शांतिमुपैति साक्षात् ॥ ३९ ॥ प का द शे भ ग वा न्त ॥ तस्मात्त्वमु
द्धवोत्सृज्य चोदनां प्रतिचोदनां । प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥ ४० ॥ मामेकमेव शर
णमात्मानं सर्वदेहिनां ॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥ ४१ ॥ भगवद्गीतासु कृष्णस्य रामडी
जन्मकर्मज्ञानेनैव मुक्तिरुक्ता किं पुनस्तद्भजनेन ॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोर्ज्जुन ॥ ४२ ॥ वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ॥
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ ४३ ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं ॥ मम वर्त्मानुवर्त्तंते मनु
ष्याः पार्थ सर्वशः ॥ ४४ ॥ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं ॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छ

पु०४०

यासम्यक् उत्तरं प्रब्रवीतु सः ॥७३॥ मतिमेतन्मये केचिदाचार्यं पितरं गुरुं । अर्च्यमर्चितमब्जोहमनुज्ञा
नंतु तेन पाः ॥७४॥ ततो न व्याजहारेषां कश्चिद्बुद्धिमतां सतां । मानितं महतां राज्ञां मध्ये संदर्शिते
पदे इति ॥७९॥ आरण्यपर्वणि तीर्थयात्रायां पुष्करप्रशंसायां । सर्वदेवादित्वेन हरिर्वोक्तः स एव
सर्व्वः । तत्र । यथा सुराणां सर्वेषामादिरुक्तो मधुसूदनः । तथैव पुष्करं राजंस्तीर्थानामादिरुच्यते ॥८०॥
भारते उद्योगपर्वणि धृतराष्ट्रेण संजयं प्रति पांडवसेनासारः पृष्टे ततस्तत्र कृष्णस्य वसारमुक्त्वा तन्मा
यया सर्वेषां मोहः स्कन्दजनेन तन्निवृत्तिरुक्ता ॥८१॥ तत्त्वमीशन्नपि महायोगी सर्वस्य जगतो हरिः । कर्मा
ण्यारभते कर्तुमनीशाइव दुर्लभः ॥८२॥ तेन वंचयते लोकान्मायायोगेन केशवः । ये तमेव प्रपद्यंते ते न
मुह्यंति मायया ॥८३॥ धृतराष्ट्र उ० । कथं त्वं माधवं वेत्थ सर्वलोकमहेश्वरं । कथमेनं न वेदाहं तन्ममाच
पु.सं. १८ क्ष्व संजय ॥८४॥ संजय उ० ॥ विद्या राजन्न ते नित्यं मम विद्या न हीयते । विद्यया तात जानामि त्रियु
गं मधुसूदनं ॥८५॥ भीष्मपर्वणि ॥ गीताकथनानंतरं संजयः ॥ सर्वशास्त्रमयी गीता सर्वदेवमयो हरिः । स
र्वतीर्थमयी गंगा सर्ववेदमयो मनुः ॥८६॥ गंगा गीता च गायत्री गोविंदेति हृदि स्थिते । चतुर्गकारसंयु
क्ते पुनर्जन्म न विद्यते ॥८७॥ भीष्मपर्वणि ॥ दुर्योधनेन पृष्टः भीष्मः पांडवानां जयकारणं । तत्रोक्तं गंध
मादने सुराणां मध्ये आकाशे भगवंतं दृष्ट्वा ब्रह्मोवाच ॥ स्तुतिश्च बहुलास्तत्र किंचिल्लिख्यते ॥८८॥ त्व राम १८
द्भक्तिनिरता देवा नियमैस्त्वां समाश्रिताः ॥ अर्द्धयामः सदा विष्णो परमेशं महेश्वर ॥८९॥ ऋषयो देवगंधर्वा
यक्षराक्षसपन्नगाः ॥ पिशाचा मानुषाश्चैव मृगपक्षिसरीसृपाः ॥९०॥ एवमादि मया सृष्टं पृथिव्यां

त्स्त्वमध्यात्मं कर्म चाखिलं ॥६२॥ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ॥ प्रयाणकालेपि च मां ते वि
दुर्युक्तचेतसः ॥६३॥ भारते सभापर्वणि युधिष्ठिरराजसूये अग्रपूजायां संदेहे देवव्रतेन कृष्णस्यैव सर्वदे
वमयेन सर्वश्रेयमयत्वेन चाग्रपूज्यत्वमुक्तं ॥ तस्मात् हरिरेव सर्वैः पूजनीय इति निर्विवादं ॥६४॥ त
त्र भीष्मः ॥ न तेषां लोकेषु कश्चिदस्ति विशिष्टः केशवादृते ॥ दानं दाक्ष्यं श्रुतं शौर्यं ह्रीः कीर्तिर्बुद्धिरुत्तमा ॥६५॥
सन्नतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताच्युते ॥ तमेवं सर्वसंपन्नमाचार्यं पितरं गुरुं ॥६६॥ अर्घ्यमर्चित
मर्चार्हं सर्वे संमन्तुमर्हथ ॥ ऋत्विग्गुरुर्विवाह्यश्च स्नातको नृपतिः प्रियः ॥६७॥ सर्वमेतद्धृषीकेशे तस्मा
दभ्यर्चितोच्युतः ॥ कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः ॥६८॥ कृष्णस्य हि कृते विश्वमिदं भूतं चराचरं
एष प्रकृतिरव्यक्ता कर्ता चैव सनातनः ॥६९॥ परं च सर्वभूतेभ्यस्तस्मात्पूज्यतमोच्युतः ॥ बुद्धिर्मनो म
हद्वायुस्तेजोम्भः खं मही च या ॥७०॥ चतुर्विधं च भूतं यत्सर्वं कृष्णे प्रतिष्ठितं ॥ अग्निहोत्रमुखा वेदा
गायत्री छन्दसां मुखं ॥७१॥ राजा मुखं मनुष्याणां नदीनां सागरो मुखं ॥ नक्षत्राणां मुखं चन्द्र आदित्यस्ते
जसां मुखं ॥७२॥ पर्वतानां मुखं मेरुर्गरुडः पततां मुखं ॥ ऊर्ध्वं तिर्यगधश्चैव यावती जगतो गतिः ॥७३॥ सदे
वकेषु लोकेषु भगवान्केशवो मुखं ॥ स एव बालेष्वथ वा पार्थिवेषु महात्मसु ॥७४॥ कोनोर्हं मन्यते कृष्णं
को चाप्येनं न पूजयेत् ॥ तत्रैव भीष्मवाक्यानंतरं सहदेववाक्यं ॥७५॥ केशवं केशिहंतारमप्रमेयपराक्र
मं ॥ पूज्यमानं मया यो वः कृष्णं यो वेन सहते नृपः ॥७६॥ तस्याहं सकलं मूर्ध्नि मया विन्यस्यते पदं ॥ एवमुक्तो म

स० प०
सुदेवो यमर्च्यश्च पूज्यश्च मानवैः ।९। राजन्सत्वमयो ह्येष तमोरजविवर्जितः । यतः कृष्णस्ततो धर्मो यतो
धर्मस्ततो जयः ।७। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः । सार्च्यते मर्च्यते चैव नित्ययुक्तैः स्वक
र्मभिः ।८। वासुदेवमहद्भूतं सर्वदैवतदैवतं । न परं पुंडरीकाक्षाद् दृश्यते भरतर्षभ ।९। मार्कंडेयश्च गोविंदे
19 कथयत्यद्भुतं महत् । एवमत्र सर्वेषीणां नामान्युक्त्वा तन्मते पुंडरीकाक्षमहत्वमुक्तं ज्ञातव्यं ।१०। अ
श्वमेधपर्वणि च गुरुशिष्यसंवादे सर्वेषां राज्ञां नकुलेनेदमुक्तं वृह्मणा । सर्वेषामेव भूतानामहं वृह्ममयो
भवान् । भूतं परतरं मत्तो विष्णोर्वान्यन्नाविद्यते ।११। राजाधिराजः सर्वेषां विष्णुर्वृह्ममयो महान् । ईश्वरं तं
विजानीहि कर्तारमकृतं हरिं ।१२। तत्रैवाग्रे सर्वेषामाद्युक्त्वा वुक्तं । न मविष्णुरचिंत्यात्मा स्वयंभूरिति सस्मृ
पु०सं तः । आदिर्विश्वस्य जगतो विष्णुर्वृह्ममयो महान् ।१३। भूतं परतरं तस्मात्त्रैलोक्येनेह विद्यते । वनपर्व
१९ णि यक्षरूपेण धर्मयुधिष्ठिरसंवादे । यक्षः । अतिथिः सर्वभूतानां किंस्विद्धर्मः सनातनः । अमृतं किंस्विद्रा
जेंद्र किंस्वित्सर्वमिदं जगत् ।१४। युधि० अतिथिः सर्वभूतानामग्निः सोमो गवामृतं । विष्णुः सनातनो धर्मो वा
युः सर्वमिदं जगत् ।१५। वहुदात्तु भगवन्ज्ञानं धर्मस्य माहात्म्यं कथं मया लिखितुं शक्यं । भारते मोक्षधर्मे
ते नारायणीये विस्तरेण पुण्यकृद्भिः प्राज्ञैर्वोधव्यः १६ तत्रैव ब्रह्मेन्द्रयसंका । एवं वहुविधं धर्मं प्रतिबुद्धै राम
र्निषेवितं । न कुर्वीत कथं विप्रा ह्यन्ये नानाव्रतस्थिताः ।१७। वैशं पा० तिस्रः प्रकृतयो राजन्देहवंधेषु १९
निर्मिताः । सात्विकी राजसी चैव तामसी चेति भारत ।१८। देहवंधेषु पुरुषः श्रेष्ठः कुरुकुलोद्वह । सात्वि
कः पुरुषव्याघ्र भवेन्मोक्षविनिश्चितः ।१९। अत्रापि स विजानाति पुरुषं वृह्मवर्तिनं । नारायणपरो मो

त्वप्रशादजं ॥ पद्मनाभ विशालाक्ष कृष्ण दुःखप्रनाशनः ॥ ९१ ॥ त्वं गतिः सर्वभूतानां त्वं नेता त्वं जगद्गुरुः ॥ त्वत्प्रसादे ग १
न देवेश सुखिनो विबुधाः सदा ॥ ९२ ॥ पृथ्वी निर्भया देव त्वत्प्रसादात्सदा भवत् ॥ तस्माद्भव विशालाक्ष य
दुवंश विवर्द्धन ॥ ९३ ॥ त्वां हि ब्रह्मर्षयो लोके वेदाश्चामितविक्रम ॥ तैस्तैर्नामभिर्युक्ता गायंति परमात्मकं
॥ ९४ ॥ स्थिताश्च सर्वे त्वयि भूतसंघाः कृत्वाश्रयं त्वां वरदं सुबाहो ॥ अनादिमध्यांतमपारयोगं लोकस्य
सेतुं प्रवदंति विप्राः ॥ ९५ ॥ ततः देवादिभिः पृष्टः कोयं त्वया स्तुतः इति तानाह सः ॥ यत्तत्परं भविष्यं च भवि
ताय च यत्परं ॥ भूतात्मा यः प्रभुः श्चैव ब्रह्म यच्च परं पदं ॥ ९६ ॥ तेनास्मि कृतसंवादः प्रसन्नेन सुरर्षभाः ॥
जगतोनुग्रहार्थाय याचितो मे जगत्पतिः ॥ ९७ ॥ मानुषं लोकमातिष्ठ वासुदेव इति क्षितौ ॥ यस्याहमा
त्मजः पुत्रः सर्वस्य जगतः पतिः ॥ ९८ ॥ वासुदेवो नु नेयो वः सर्वलोकमहेश्वरः ॥ तथा मनुष्याय मिति कदा
चित्सुरसत्तमाः ॥ ९९ ॥ नावज्ञेयो महावीर्यः शंखचक्रगदाधरः ॥ एतत्परमकं गुह्यमेतत्परमकं पदं ॥
१०० ॥ ५०० ॥ एतत्परमकं ब्रह्म एतत्परमकं यशः ॥ नावज्ञेयो वासुदेवो मानुषोयमिति ब्रुवन् ॥ १ ॥ यश्च मानु
षमात्रोयमिति ब्रूयात्सुमंदधीः ॥ हृषीकेशमविज्ञानात्तमाहुस्तामसं जनाः ॥ २ ॥ देवं चराचरात्मानं श्रीव
त्सांकं सुवर्चसं ॥ पद्मनाभं न जानंति तमाहुस्तामसं जनाः ॥ ३ ॥ किरीटकौस्तुभधरं मित्राणामभयंकरं
अवजानन्महात्मानं घोरे तमसि मज्जति ॥ ४ ॥ सर्वविद्दित्वा तत्त्वार्थं लोकानामीश्वरेश्वरः ॥ वासुदेवो
नमस्कार्यः सर्वलोकैः सुरोत्तमाः ॥ ५ ॥ तत्र भीष्मः ॥ यस्य प्रसादात्मजो ब्रह्मा सर्वस्य जगतः पिता ॥ कथं न वा

धर्मपथपार्थिवसत्तम॥ये यथैव त्वं तथा चान्ये न भजंती ह मोहिताः॥३७॥त्वमेव हि लोकानां मोहनो भावन
स०क० स्तथा संहारकारकश्चैव कारणं च विशांपते॥३८॥हरिवंशे कालनेमिवधांते ब्रह्मलोकगतं विष्णुं प्रतिम
हर्षीणां वाक्यं॥स्वागतं ते सुरश्रेष्ठ पद्मनाभ महाद्युते इदं याज्ञियमातिथ्यं मंत्रतः प्रतिगृह्यतां॥त्व ३९
20 मस्य यज्ञपूतस्य पात्रं पाद्यस्य पावनः॥अतिथिस्त्वं हि मे त्रोक्तः स्वदेवः परमो मतः॥४०॥त्वयि युक्ते ग
ते विष्णो न प्रावर्त्तन्त क्रियाः॥अथैव त्वयि यज्ञस्य न हि कर्म विधीयते॥४१॥सद्दक्षिणस्य यज्ञस्य त्वत्प्रसूति यज्ञांगीकृतं
फलं भवेत्॥अद्यात्मानमिहास्माभिर्यज्ञरूपं निरीक्ष्यसे॥४२॥एवमस्त्विति तान्नत्वा प्राह भगवान्प्रतिपू
जयत॥हरिवंशे गोवर्द्धनमहोत्सवे गिरिरूपेण गोपान्कृष्णवाक्यं॥स उवाच ततो गोपान्गिरिप्रभवया
गिरा॥अद्य प्रभृति यज्ञ्योहं गो ब्रुवद्यास्मि वोदय॥४३॥अहं वः प्रथमो देवः सर्वकामकरः शुभः॥मम प्रभाव
पु.सं० २० द्गवामयुतान्युपभोक्ष्यथ॥४४॥शिवश्चैव भविष्यामि मद्भक्तानां वनेवने॥रंस्ये हं सह युष्माभिर्यथा क्रीडिष्ये
दिविगतस्तथा॥४५॥हरिवंशे दुर्योधनयज्ञे राज्ञां समाजे नारदेनोक्तं कृष्ण त्वं देवनामाश्चर्यं धन्योसि च
कृष्णेनोक्तं॥४६॥आश्चर्यश्चैव धन्यश्च दक्षिणाभिः सहेत्यहं॥श्रुत्वा नारदे गते राजभिः कृष्णं प्रत्युक्तं
नारदोक्तं मंत्रं न जानीमः॥४७॥कृष्णेनोक्तं नारद एव कथयिष्यति॥तदा नारदेनोक्तं॥गंगा समुद्रः पृथि राम २०
वी पर्वत वेद यज्ञानि प्रतिप्रत्येकं मयोक्तं॥यूयं धन्याः तत्र यज्ञवाक्यं॥आश्चर्यं शब्दो नाम सुधन्य
शब्दोपि वा मुने॥आश्चर्यं परमं विष्णुः सह्यस्माकं परागतिः॥४८॥यदाद्यं वयमश्नीमो गतमग्निषु पाव

ह्यस्ततो वै सात्विकः स्मृतः ॥२०॥ मनीषितं च प्राप्नोति चिंतयन्पुरुषोत्तमं ॥ एको भक्तः सततं नारायणपरा
यणः ॥२१॥ मनीषिणो हि ये केचिद्यतयो मोक्षकांक्षिणः ॥ एषवे छिन्नतृष्णानां योगक्षेमकरो हरिः ॥२२॥
जायमानं हि पुरुषं संपश्येन्मधुसूदनः ॥ सात्विकः स तु विज्ञेयो भवेन्मोक्षे च संस्थितः ॥२३॥ सांख्ययोगे
नेस्वल्पो हि धर्म एकांतसेवितः ॥ नारायणात्मको मोक्षो नित्यास्ता परमा गतिः ॥२४॥ नारायणेन दृष्टस्तु
प्रतिबुद्धो भवेत्पुमान् ॥ एवमात्मेच्छया राजन्प्रतिबुद्धो न जायते ॥२५॥ राजसी तामसी विद्या व्यामिश्रे प्र
कृती स्मृते । तदात्मकं हि पुरुषं जायमानं विशांपते ॥२६॥ प्रवृत्तिलक्षणैर्युक्तं नावेक्षति हरिः स्वयं ॥ पश्यत्ये
नं जायमानं ब्रह्मा लोकपितामहः ॥२७॥ रजसा तमसा चैव मानुषं समभिप्लुतः । नरा देवाश्च ऋषयः सत्त्वस्था
नृपतिसत्तम ॥२८॥ हीनसत्वेन सूक्ष्मेण ततो वैकारिकाः स्मृताः । कथं वैकारिको गच्छेन्निष्क्रियं पंचविंश
के ॥२९॥ सुसूक्ष्मसत्वसंयुक्तं संयुक्तं त्रिभिरक्षरैः ॥ पुरुषः पुरुषं गच्छेन्निष्क्रियं पंचविंशकं ॥३०॥ एवमेकं
सांख्ययोगं वेदारण्यकमेव च । परस्परांगान्येतानि पंचरात्रेषु कथ्यते ॥३१॥ एष एकांतिनो धर्मो नारा
यणपरायणः । यथा समुद्रात्प्रसृता जलौघास्तमेव राजन्पुनराविशंति ॥३२॥ इमे तथा ज्ञानमहाजलौघा
नारायणं वै पुनराविशंति ॥३३॥ एवं ते कथितो धर्मः सात्वतो यमुवाच ह । कुरुष्वैनं यथान्यायं यदि श
क्नोषि पार्थिव ॥३४॥ एतत्ते सुमहाभागो नारदो गुरवे मम । श्वेतानां यतिनामाह एकांतगतिमव्ययं ॥३५॥ व्या
सश्चाकथयत्प्रीत्या धर्मपुत्राय धीमते ॥ स एवायं मया तुभ्यमाख्यातः प्रशिष्टो गुरोः ॥३६॥ इत्थं हि दुश्चरो

व्या

२ व्यासात्   शुद्धानां२   १ नुगोप्रकाशीज्ञानं

स०व०

सर्वकर्माणिकथाभावोहरेर्यदा ॥ कथासुधानदीयत्र प्रवहेत्सुमहारिणी ॥६४॥ संपाद्यासेवयत्नेनसंकुचेत्त
न्यकर्मतत् ॥ नयत्रगोविंदकथामत्तानदीनयत्रनारायणपादसंश्रयाः ॥ नवर्त्ततेयत्रहरेर्महोत्सवोनतज्ज
त्वहोबुध्नपदेहिसेव्यतां ॥६२॥ तत्रैवकाशीयमुनाचनर्मदागोदावरीतत्रसरस्वतीच । नद्यःसमस्ताअपि
देवयातावसंतियत्राच्युतसत्...कथाप्रसंगः ॥६४॥ गंगाप्रयागंकुरुजांगलंचवृद्धेश्वरंपुष्करमप्यसंज्ञंप्र
भासकेदारमुख्यानितत्रसंत्यत्रतीर्थानिचयानिलोके ॥६५॥ देवाश्चब्रह्मेशमुखाहितत्रधर्माश्चयज्ञादिमुखा
समस्ताः ॥ लक्ष्मीश्चयोगाअपिसांख्याःविष्णोःकथायत्रवसंतितत्र ॥६६॥ नकर्मलोपोनचबंधलेशोनदुः
खलेशोनचजन्मयोगः ॥ नभूतयक्षादिपिशाचपीडायत्राच्युतोदारकथाप्रसंगः ॥६७॥ अत्रैवोदाहरंती
ममितिहासंपुरातनं ॥ ॥ संवादंद्विजयोस्तत्रपुण्यधाम्नोमहात्मनः ॥६८॥ पुराकृतयुगस्यांतेपुण्यधामाद्विजो
त्तम ॥ गंगादक्षिणकूलेतुसार्द्धयोजनदूरतः ॥६९॥ ग्रामेसत्यव्रतेपुण्येतत्रावासीत्स्वहन्नृपाः । शतंद्वि
र्घतपसोजात्येधस्यमहात्मनः ॥७०॥ तत्रोपदेशमकरोत्कृपयानुवहन्तपाः । तन्मध्येनाकरोद्गंगास्नानंवि
सुकथारसः ॥७१॥ पुण्यधामापितृग्रामवासीविष्णुकथांशुभां ॥ वाच्यमानांतुसंश्रावसत्वहन्तपसोमुनेः ॥
७२॥ सार्द्धंचदीर्घतपसाशताद्द्विमुनिपुंगवाः ॥ सकथालोलुपोगंगास्नानंनाशतवार्षिकं ॥७३॥ संकोच्यसर्व
कर्माणिगुरुशुश्रूषणेरतः ॥ तीर्थयात्रापराणांचअध्वगानांमहात्मनां ॥७४॥ आतिथ्यकर्मनिरतोनैच्छद्गं
गावगाहनं ॥ श्रीरामचरितंपुण्यंशतकोटिप्रविस्तरं ॥७५॥ तावत्संख्यंपंचरात्रंपुराणानिचसर्वशः ॥ इतिहा
सान्नतथावेदान्तथावेदशिरांसिच ॥७६॥ सार्द्धंचदीर्घतपसाशुश्रावसमहामतिः ॥ सोकदोद्दशगायत्रीज

पु०सं० २१

21

राम २१

नं ॥ तत्सर्वं पुंडरीकाक्षो लोकमूर्त्तिः प्रयच्छति ॥ ४९ ॥ सोहं विलोगीतं प्रेप्सुरिह संपतितो भुवि ॥ २९ स्वायंभुवा
न्नः श्रोमवद्धिरिह संवृतः ॥ ५० ॥ यन्मायाभिहितं ह्येष त्वमास्थयं जनार्दनः ॥ धन्यस्त्वसीति भवतामध्यस्थो
हात्र पार्थिवाः ॥ ५१ ॥ इत्युक्तो दमैर्नैनाद्यवाक्यस्यास्य यदुत्तरं ॥ दक्षिणाभिः स हेत्येवं पु तो ममसमासवान्
र्स्यात्ते वचनं मम ॥ ५२ ॥ यज्ञानां हि गतिर्विष्णुः सर्वेषां च सरक्षिणः ॥ दक्षिणाभिः स हेत्येवं प्रीतो ममसमात्
वान् ॥ ५३ ॥ व रु इ माय ये लं का कं डे रु दू स्त तो ॥ अहं रामं जगत्पूज्यो मम पूज्यो युवां सदा ॥ त्वन्नाम ज्ञापि
नी गौरी त्वन्मंत्रं जपवानहं ॥ ५४ ॥ मुमुक्षो मणिकर्णिकांतरई दक निवासिनः ॥ अहं दिशामि ते मंत्रं तारकं
ब्रह्म वाचकं ॥ ५५ ॥ मात्स्ये गुडपर्वतदानप्रसंशायां देवश्रेष्ठ त्वं विष्णुरुक्तः ॥ यथा देवेषु विश्वात्मा प्रवरो
यं जनार्दनः ॥ सामवेदस्तु वेदानां महादेवस्तु योगिनां ॥ ५६ ॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा ॥ त
था रसानां प्रवरो सदैवेक्षुरसो मतः ॥ ५७ ॥ मात्स्ये ऽंधकवधे रुद्रेण मातृगणं सृष्टो तेन यदाय यज्ञभक्षणा
र्थमुद्यमं कृतं तदा रुद्रेण नृसिंह स्मृतिः कृता ॥ तदा नृसिंहेन सप्तमातृगणानुत्पाद्य तेसह कृतेशोच ना क्षि
तीर्थस्थापनं कृतं ॥ ५८ ॥ तत्रैव श्लोकः ॥ सप्तं ता मातरो देव्यः सार्द्धनारीनरः शिवः ॥ निवेश्य रौद्रं तत्स्थाने
तत्रैवांतरधीयत ॥ ५९ ॥ समातृवर्गस्य हरस्य मूर्त्तिर्यदाति एति तत्समीपे ॥ देवेश्वरस्यापि नृसिंहमूर्त्तिः
पूजां विधत्ते त्रिपुरांतकारी ॥ ६० ॥ अथान्यकर्मी नादरेण पिशरिकयाकीर्त्तनादौ रतिः कार्या संदेहो न का
र्यः ॥ प्रमाणं तु अत्र वायुपुराणे शांडिल्य सुयज्ञेनो द्धता एविंशति प्रेतसंवादं ॥ ६१ ॥ तत्था हि ॥ कयीणा

साकं वर्षशतं त्वहं ॥ दूरे क्रियति सा गंगा न ज्ञाने नागमं मया ॥ कदापि मुनिसा ईदृशी सा गंगा सा ईदृ योजनेन तिष्ठ
स०५० तीति महापुण्या जनानां वार्त्तया मया ॥ १५ ॥ हा दैवं मे गतिश्चासीत्सदा विष्णुकथा रतिः ॥ पापस्य सत्कुरुषसेव
चान्यत्किंचिन्नरोचते ॥ १६ ॥ इति तद्वचनं श्रुत्वा ज्ञानसिंधुर्धृतव्रतः ॥ अन्योन्यमूचतुश्चैवं निंदयंतौ तम
हामुनिं ॥ १७ ॥ पापस्यास्य गृहे चास्मिन्नावाभ्यां भुक्तमंजसा ॥ नानेन सदृशः पापी येन गंगा न सेविता ॥ १८ ॥
गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ १९ ॥ कथं न सेविता
गंगा तादृशी लोकपावनी ॥ शापं कुर्वंतां न दास्यंति पितरोस्य दुरात्मनः ॥ २० ॥ कथं देवाश्च तुष्यंति कथं वा मधु
सूदनः ॥ योगं तु न तु सदेहे ह्यपि गंगा लोकैकपावनी ॥ १ ॥ स सर्वं कुलं तु दृत्य विष्णुलोके महीयते ॥ सन्निधौ विद्य
पु०सं० मानां तु गंगायां यस्तु न सेवते ॥ २ ॥ आत्महा स तु विज्ञेयः सत्यमेव हि कृतः ॥ अहो आश्चर्यमत्येतं विष्णु
२२ ध्यानापि नो कृतो ॥ ३ ॥ गंगावगाहनं क्वापि कस्य दैवकर्मणः फलं विलप्यतौ बहुविधं तं विनिंद्य पुनः पुनः ॥ अज्ञा
22 नात्मापि संगेन महत्पापमुपागतं ॥ ४ ॥ अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥ किं दुःखं न करोत्येष
दुःसंगे मिह पतामपि ॥ ५ ॥ इत्युक्त्वा यततः शीघ्रं तावेवं तु तावुभौ ॥ जामतु निंदयंतौ तौ तस्मिन्ग्रामे स्थलां
तरे ॥ ६ ॥ प्रातर्गंगासमीपं च जग्मतुस्तौ खलौ मुदा ॥ आरात्प्रणेमतुर्गंगां प्रसन्नेनांतरात्मना ॥ ७ ॥ आप्य गंगात राम
टं पश्चात्तौ भोदर्शीलुश्चतौ ॥ सर्वेपि चावगाहंति नैतयोर्जलदर्शनं ॥ ८ ॥ अभूत्क्वापि कुतस्थापि गंगाया २२
मटतीरपि ॥ आगंगासागरांतं च काशीमारभ्य तौ गतौ ॥ ९ ॥ अपि गोष्पदमात्रं वा नालभ्यतु लमेतयोः ॥ स्वैरं
सर्वेवगाहंते स्निग्धंत्य त्रसराजनाः ॥ १० ॥ तथापि नैतयोः स्नानसीकरं जलं सर्षपमात्रकं ॥ पश्चाद्दुःखेन महता

पंसंध्यातथैवच ॥७७॥ अन्यानि नित्यकर्माणि तंतु माचं करोति सः। मार्गस्तु महती सेवा सदा विष्णुकथारतिः॥७८॥
पुण्यधाम्नो द्विजस्यास्य ह्यभूत्सैषाह्वयीगतिः। एतस्मिन्नंतरे काले ज्ञानसिंधुर्धृतव्रतः॥७९॥ आजग्मतुरुभौ तौ
तु पुण्यधामगृहे प्रति। दिवाकरास्तमसमये श्रांतौ दूरपथेन तु॥८०॥ आगतौ पुण्यकथौ श्रुत्वा पुण्यधामा
पि स्वं गृहे। तदापश्यन्महात्मानौ ज्ञानसिंधुधृतव्रतौ॥८१॥ संतोषं अतुलं लेभे मृतप्राणगताविव। तयोर्व
वंदे चरणौ उत्पतन्संपतन्नभ्रमन्॥८२॥ संतोषात्पुलकांगश्च तथा गद्गदभाषणः। यत्तु त्वाय च विनिर्गत्य पा
दौ प्रक्षाल्यवै तयोः॥८३॥ तज्जलं शिरसा धृत्वा कृत्यकृत्यस्त्वभवत्। संपूज्य मधुपर्काद्यैर्यथाविभवमंजसा।
॥८४॥ तौ द्वौ तु भोजयित्वाथ सूपविष्टो महामतिः। तयोः पप्रच्छ कुशलं प्रसन्नेनांतरात्मना॥८५॥ दिष्ट्या चवां मे
संगो भूत्वावितं च कुलं मम। अद्य नः पितरस्तुष्टा माधवो पिप्रसादितः॥८६॥ बहुजन्मार्जितैः पुण्यैर्महतां
संगमो भवेत्। दुर्लभा साधवो लोके सदा विष्णुकथारताः॥८७॥ आलभेतावता पुंसः सर्वाघानां निकृतनं। म
हत्संगे महातो येनात्मा आशु प्रसीदति॥८८॥ भार्ययावीज्यमाने तु पादे संवाहस्त्वांकयोः। पीडयामास तुष्ट
त्मा यावत्श्रम निवारणं॥८९॥ तं तावपूचतुः पुण्यधामानं मुनिपुंगवं। किं वा करोषि ग्रामेस्मिन्किं आ
णासि निरंतरं॥९०॥ दूरात्क्रियंति सा गंगा वर्ततेत्यंतपावनी। पृष्टस्ताभ्यां स्ववृत्तांतं पुण्यधामाप्यथाब्रवीत्॥
॥९१॥ शतान्यब्दान्यतीतानि तिष्ठतो वै ममालये। वृहत्तपा दीर्घतपः कृते तत्वानि बोधयन्॥९२॥ तावद्वृद्धस्थि
तिं चक्रे कर्माण्यपि परित्यजन्। अहं विष्णुकथालापलोलुपस्तत्प्रसादतः॥९३॥ अष्टेणादीर्घतपसा

भक्तावमानजममतैनेवक्तापिकथंचन ॥ तस्मात्प्रसादतं विप्रं पुण्यधामानमादरात् ॥ २८ ॥ तावन्नाहं प्रसन्ना
स॰ व॰ स्मि विष्णोराज्ञाकरिष्यती ॥ प्रतीपकारिणो विष्णोस्तद्भक्तानां विशेषतः ॥ २९ ॥ लाभायनसमर्थास्युर्देवा ब्रह्म
पुरःसराः ॥ पश्चादागच्छ यशीघ्रं दास्यामि त्वन्मनोरथान् ॥ ३० ॥ तौ हि संभाविता देव्या साध्वसौ मुनिपुं कपितो
गवौ ॥ ग्रामे सत्यव्रतं प्राप्य प्रार्थयामासतुर्द्विजं ॥ ३१ ॥ एवं कथायां महात्म्यं दृष्ट्वा भागवतस्य च ॥ वृथा पं
डितमन्यास्त्यक्तानि दृत स्वं महामतिं ॥ ३२ ॥ ब्रह्मस्वरूपया ब्रह्मन्कृपां कुरु कृपानिधे ॥ त्वदवज्ञा प्राप्तं दंडं
गंगायानोऽपलयो ॥ ३३ ॥ पुण्यधामा ततस्ताभ्यां श्रुत्वा स्वगुरवे व्रवीत् ॥ बृहत्तपास्ततः श्रुत्वा ज्ञानासि
धुं धृतव्रतं ॥ ३४ ॥ उवाच परया प्रीत्या वयं वर्षद्वयोत्तरे ॥ समाप्य सकलां विद्यां आगच्छामस्ततः परं ॥ ३५ ॥
गंगां विष्णुपदोद्भूतां जाह्नवीं भुवनेश्वरीं ॥ तावद्भवंतौ वसतां गंगातीरे शुभप्रदे ॥ ३६ ॥ इत्युक्ता ऊचतुस्तौ तं मु
पु॰ सं॰ २३ नींद्रं शंसितव्रतं ॥ गत्वा किं वा करिष्यामस्तावदावां तवांतिके ॥ ३७ ॥ तिष्ठाव इति तं प्रोक्त्वा तस्थतुस्तौ महा
मती ॥ ततो वर्षद्वयस्यांते सर्वा विद्याः समाप्य च ॥ ३८ ॥ शिष्याभ्यां व्रतयाताभ्यां ययौ साकं बृहत्तपाः ॥
23 जाह्नवीस्ता सतो ज्ञात्वा प्रत्युत्थायार्हणादिभिः ॥ ३९ ॥ उपतस्थे महागंगा संभ्रमाकुलमानसा ॥ सहागतो राम
मुनींद्रोतो जलपूर्णा महानदी ॥ ४० ॥ दृष्ट्वा प्रहृष्टमनसौ तौ तेरनुज्ञासनाप्य च ॥ तैसाकं चक्रतुः स्नानं सि २३
द्धिमापुः स्वपंचमं ॥ ४१ ॥ अतः सर्वानपरित्यज्य श्रुत्वा विष्णुकथां शुभां ॥ ददाति सर्वानर्थांश्च नात्र कार्या
विचारणा ॥ ४२ ॥ कृतान्यपि च कर्माणि विना विष्णुकथां शुभां ॥ अजागलस्तनमिव व्यर्थतां नितिदो वि

प्राप्तो हिमवतस्तटं ॥११॥ नापश्यत्तां च तत्रापि पयःकणमथापि वा ॥ पुनरासागरं तं च गताभ्यां नाप्नमं
बुबे ॥१२॥ काशीमेव पुनः प्राप्य दुःखाकुलितमानसौ ॥ ऋत्वा प्रपत्तां ततो गंगां स्तोत्रैर्बहुविधैरपि ॥१३॥
रुद्रोऽपि भगवानं च याचित्वा वै शिरोमणिं ॥ कलांशं समुद्धृतां धृत्वा लोके शिवोऽभवत् ॥१४॥ सागराद्
पि संप्राप्ता लात्वत्त आपुः स्तुभांगतिं ॥ नमस्ते सकलकल्याणि नमस्ते लोकपावनि ॥१५॥ सुभगे त्राहि नौ पा
पौ कृपालून खसंभवे ॥ उद्दिश्य त्वां महात्मानौ तक्षेतौ त्वत्परायणौ ॥१६॥ कृतार्थं तं मन्यमानौ दूरादावां स
मागतौ ॥ त्वं माता सर्वलोकानां त्वमेव जगतां पतिः ॥१७॥ यथा त्वज्जनको विष्णुस्तथा त्वं जनरक्षिका ॥ अपराध
करं माता शिशुं निर्भर्त्स्यैव पुनः ॥१८॥ कामानि छान्ददात्येव नन्हितं सा परित्यजेत ॥ तस्मादिदं जगद्धात्रि भव
कृतं तत्क्षन्तव्यं तौ ॥१९॥ इति ताभ्यां स्तुता गंगा प्रत्यक्षं समजायत ॥ तां दृष्ट्वा च कृतदंडप्रणामौ तौ महात्मनौ ॥२०॥
उवाच सस्मितं गंगा मेघगंभीरया गिरा ॥ भवद्भ्यां निंदितो यस्मात्पुण्यधामा महामतिः ॥२१॥ आकांक्षमाणा
यत्पादरेणुं तिष्ठाम्यहर्निशं ॥ यत्र विष्णुकथालापो माधवश्चात्र दाश्रयः ॥२२॥ तत्र तीर्थानि सर्वाणि नात्र
कार्यविचारणा ॥ विष्णोर्विष्णुकथालापा निषेधस्तस्य विस्मृतिः ॥२३॥ विधयस्त्व निषेधाश्च तयोरेव हि किं
कराः ॥ ब्रह्महत्यासहस्रस्य पापं शाम्येत्क्षयेच न ॥२४॥ विष्णुविष्णुकथावापि तद्भक्तानां च निंदया ॥ यत्पा
पं तच्च केनापि द्धीयते नैव सर्वतः ॥२५॥ यस्तु विष्णुकथालापपरो नित्यं महामतिः ॥ किं वा नानुष्ठितं तेन
तेन सर्वमनुष्ठितं ॥२६॥ अपराधसहस्रं वा स्वस्यां गच्छेदमेव च ॥ संमते भगवान्विष्णुर्येन केनापि कर्मणा ॥२७॥

क्षमते

पु॰खं॰ ब्रह्मांडं शतकोटिधा ॥ ततो ष्टादशधा कृत्वा वेदव्यासो युगे युगे ॥ ८ ॥ प्रख्यापयति लोके स्मिन्साक्षान्नारा
यणांशजः ॥ अन्यान्युपपुराणानि मुनिना कथितानि तु ॥ ९ ॥ तानि वः कथयिष्यामि संक्षेपादवधार्य
तां ॥ आद्यं सनत्कुमारोक्तं नारसिंहमतः परं ॥ १० ॥ तृतीयं स्कांदमुद्दिष्टं कुमारेण तु भाषितं ॥ चतुर्थं शि
24 वधर्माख्यं साक्षान्नंदीशभाषितं ॥ ११ ॥ दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परं ॥ कापिलं मानवं चैव तथै
वोशनसेरितं ॥ १२ ॥ ब्रह्मांडं वारुणं चान्यत्कालिकाह्वयमेव च ॥ माहेश्वरं तथा सांबं सौरं सर्वार्थसंचयं ॥
१३ ॥ पराशरोक्तमपरं मारीचं भार्गवाह्वयं ॥ एतान्युपपुराणानि कथितानि द्विजोत्तमाः ॥ १४ ॥ ब्राह्मणा ऊचुः
पुराणसंख्यामाचक्ष्व सूत विस्तरशः क्रमात् ॥ दानधर्ममशेषं च यथावदनुपूर्वशः ॥ १५ ॥ सूत उवाच ॥
पु॰सं॰ इदमेव पुराणेषु पुराणं पुरुषस्तदा ॥ यदुक्तवान्स विश्वात्मा मनवे तन्निबोध मे ॥ १६ ॥ पुराणं सर्वशास्त्रा
२४ णां ब्रह्मांडं प्रथमं स्मृतं ॥ अनंतरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ १७ ॥ पुराणमेकमेवासीत्तस्मिन्कल्पां
तरे तथा ॥ त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरं ॥ १८ ॥ निर्दग्धेषु च लोकेषु क्रमेनानंतरूपिणा ॥ सांगानि
चतुरो वेदाः पुराणान्यायविस्तरः ॥ १९ ॥ मीमांसा धर्मशास्त्रं च परिगृह्यात्मसात्कृतं ॥ मत्स्यरूपेण च पुनः
कल्पादावुदकार्णवे ॥ २० ॥ अशेषमेव कथितं ब्रह्मणो दिव्यचक्षुषे ॥ ब्रह्मा जगाद च मुनीन्त्रिकालज्ञान राम
दर्शिनः ॥ २१ ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणेभ्यो भवत्ततः ॥ ततः कालक्रमेणासौ व्यासरूपधरो हरिः ॥ २२ ॥ अ २४
ष्टादश पुराणानि संक्षिप्याति युगे युगे ॥ चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ॥ २३ ॥ तदाष्टादशधा कृत्वा

तुः॥४३॥ नारदीये कादशाध्याये रुक्मांगददिग्विजये वामदेववाक्येन विष्णुमभजमानः ब्राह्मणादिष्वम
चारीति उक्तेरपि विष्णुरेव भजनीयः॥ तथा हि॥ श्वपचोपि महीपाल विष्णुभक्तो द्विजाधिकः॥ विष्णुभक्ति
विहीनो यो यतिस्तु श्वपचाधिकः॥४४॥ दुर्लभा भूपराज्ञा नो विष्णुभक्ता महीतले॥ नावैष्णवो भवेद्राजा
क्षितिलक्ष्मीप्रसादकः॥४५॥ यो राजा न हरेर्भक्तो भक्तोन्येषु सुरेषु च॥ स्वपतिं युवती त्यक्त्वा यथैवान्यपुरु
ष्यं ते॥४६॥ एवं व्यतिक्रान्तस्य भूपतेर्भवति ध्रुवं॥ तच्चयान्याय विहितं कृतं विष्णोः प्रपूजनं॥४७॥ इति श्री
मत्पुराणसंग्रहाख्येस्मिन् वद्मकरणेस्मिन्वाक्येण द्विसकलवर्णभजनानुगुण्यगुण विष्णोः भजनीय
७ गुणं इति पाद्मपुराणवाक्याग्रथितः प्रथमः परिच्छेदः १ समाप्तिमगमत् शुभायै॥ ॥ अथ पुराणानां प्रा
माण्यमुत्पत्तिं च वक्ष्यामि॥ तथा च स्कांदे प्रभासखंडे ऋषयो ऊचुः॥ कथयालक्षणं ब्रूहि पुराणादीनां सविस्त
रात्॥ आर्षेयपौरुषेयाणां वाक्यं चिह्नं परीक्षणं॥१॥ कथं ज्ञेयं महाबुद्धे श्रोतुमिच्छामहे वयं॥ सूत उवाच॥
अथ संक्षेपतो वक्ष्ये पुराणानामनुक्रमं॥ लक्षणं चैव संख्यां च उक्तिभेदांस्तथैव च॥२॥ पुरा तपश्चचारोग्रम
मराणां पितामहः॥ आविर्भूतास्ततो वेदाः सखंडांगपदक्रमाः॥३॥ ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवं
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरं॥४॥ निर्गतं ब्रह्मणो वक्त्रात् ब्राह्म्यं वैष्णवमेव च॥ शैवं भागवतं चैव पाद्मा
भविष्यं नारदीयकं॥५॥ मार्कंडेयमथाग्नेयं ब्रह्मवैवर्तमेव च॥ लिंगं तथा च वाराहं स्कांदं वामनमेव च॥६॥
कौर्म्यं मात्स्यं गारुडं च वायवीयमनंतरं॥ अष्टादशसमुद्दिष्टं सर्वपातकनाशनं॥७॥ एकमेव पुराण्यं

पु० ३०

चस्त्यां तु यो दद्यात्कूर्मसंयुतं ॥४०॥ परां सिद्धिमवाप्नोति इहलोके परत्र च ॥ सर्वान्कामानवाप्नोति नात्र कार्या
विचारणा ॥४१॥ पुराणं नवसाहस्रं मार्कंडेयमथोच्यते ॥ परिलिख्य च यो दद्यात्सौवर्णकरिसंयुतं ॥४२॥ कार्त्ति
क्यां पुंडरीकस्य यज्ञस्य फलभाग्भवेत् ॥ ॥ यत्रेईशानकल्पस्य वृत्तांतमधिकृत्य च ॥४३॥ वसिष्ठायाग्निना
प्रोक्तमाग्नेयं तच्च चक्षते ॥ लिखयित्वा च यो दद्यात्हेमपद्मसमन्वितं ॥४४॥ मार्गशीर्ष्यां विधानेन तिल
धेनुसमन्वितं ॥ तच्च षोडशसाहस्रं सर्वक्रतुफलप्रदं ॥४५॥ यत्रादित्यस्य माहात्म्यमादित्यस्य चतुर्मुखः ॥
अघोरकल्पवृत्तांतप्रसंगेन जगत्स्थिति ॥४६॥   मनपंचशतानि च ॥ भविष्यचरितं प्रायं
भविष्यं तदिहोच्यते ॥४७॥ तत्पौषमासि यो दद्यात्पौर्णमास्यां विमत्सरः ॥ कुंडकुंभसमायुक्तं अग्निष्टोमफ
लं लभेत् ॥४८॥ रथंतरस्य कल्पस्य वृत्तांतमधिकृत्य च ॥ सावर्णिना नारदाय कृष्णमाहात्म्यमुत्तमं ॥४९॥ यत्र ब्र
ह्मासमायुक्तं ब्रह्मवैवर्तमुच्यते ॥ पुराणं ब्रह्मवैवर्तं यो दद्यात् ब्राह्मणोत्तमे ॥५०॥ माघे मासि पौर्णमास्यां ब्रह्मलो
२५ कमहीयते ॥ यत्राग्निलिंगमध्यस्थः प्राह देवो महेश्वरः ॥५१॥ धर्मार्थकाममोक्षार्थानाग्नेयमधिकृत्य च
कल्पं तल्लिंगमित्युक्तं पुराणं ब्रह्मणोदितं ॥५२॥ तदेकादशसाहस्रं यो दद्याच्छिवसंनिधौ ॥ सद्यः संपूतदेहोसौ
लभते शिवसाम्यतां ॥५३॥ महावराहस्य पुनर्माहात्म्यमधिकृत्य च ॥ विष्णुनाभिहितं क्षोण्यै तद्वाराहमिहोच्य
ते ॥५४॥ कांचनं गरुडं कृत्वा तिलधेनुसमन्वितं ॥ पौर्णमास्यां मधौ दद्यात् ब्राह्मणाय कुटुंबिने ॥५५॥ वा २५
राहस्य प्रसादेन पदमाप्नोति वैष्णवं ॥ यत्र माहेश्वरं धर्ममधिकृत्य च षण्मुखः ॥५६॥ कल्पे तत्पुरुषे वृत्तं
चरितैरुपबृंहितं ॥ स्कांदं नाम पुराणं तदेकाशीतिर्निगद्यते ॥५७॥ सहस्राणि शतं चैकमिति मर्त्येषु पठ्यते ॥

25

ह्मलोके स्मिन्सभाषते ॥ अद्यापि देवलोके तु शतकोटिप्रविस्तरं ॥ १४ ॥ तदर्थोत्र चतुर्लक्षः संक्षेपेण निवेशि
तः ॥ पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते ॥ १५ ॥ नामतस्तानि वक्ष्यामि संख्यां च मुनिसत्तमाः ॥ ब्रह्मणा
भिहितं पूर्वं यावन्मात्रं मरीचये ॥ १६ ॥ ब्राह्मं यत्तु दशसाहस्रं पुराणं परिकीर्त्यते ॥ लिखित्वा तच्च यो दद्यात्
जलधेनुसमन्वितं ॥ १७ ॥ वैशाखपूर्णिमास्यां सः ब्रह्मलोके महीयते ॥ एतदेव यदा पद्मम् अभूद्धैरण्मयं जग
त् ॥ १८ ॥ तद्वृत्तांताश्रयं तद्वत्पाद्ममित्युच्यते बुधैः ॥ पाद्मं तत्पंचपंचाशत्सहस्राणीह पठ्यते ॥ १९ ॥ तत्पुरा
णं च यो दद्यात्सुवर्णकमलान्वितं ॥ ज्येष्ठमासि तिलैर्युक्तं सोश्वमेधफलं लभेत् ॥ २० ॥ वाराहकल्पवृत्तां
तमधिकृत्य पराशरः ॥ यत्र धर्मांश्च निखिलान् स्वलोके वैष्णवं विदुः ॥ २१ ॥ त्रयोविंशतिसाहस्रं पुराणं तत्प्रकी
र्तितं ॥ तदाषाढे च यो दद्यात् घृतधेनुसमन्वितं ॥ २२ ॥ पौर्णमास्यां विष्णुदत्तः सपदं याति वैष्णवं ॥ श्वेतक
ल्पप्रसंगेन धर्मान्वायुरिहाब्रवीत् ॥ २३ ॥ यत्र तद्वायवीयं स्याद्रुद्रमाहात्म्यसंयुतं ॥ चतुर्विंशतिसाहस्रं
वायवीयमुदाहृतं ॥ २४ ॥ श्रावण्यां पौर्णमास्यां च धेनुहेमसमन्वितं ॥ यो दद्याद्दधिसंयुक्तं ब्राह्मणाय कु
टुंबिने ॥ २५ ॥ शिवलोके स पूतात्मा कल्पमेकं वसेन्नरः ॥ यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ २६ ॥
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥ सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ॥ २७ ॥ तद्वृत्तांतोद्भवं देविव व
कुरत्नसमन्वितं ॥ पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदं ॥ २८ ॥ अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितं ॥
यत्राह नारदो धर्मान्बृहत्कल्पाश्रयांस्त्विह ॥ २९ ॥ पंचविंशत्सहस्राणि नारदीयं तदुच्यते ॥ तदिमं पं

पु.प्र.

यसंक्षिप्तं द्वापरे द्विजाः ॥७४॥ ब्रह्मणापि देवेषु शतकोटिप्रविस्तरं ॥ उपभेदान्यबह्वाभि लोके ये संप्र
ति एताः ॥७५॥ पाद्मपुराणं यत्रोक्तं नारसिंहोपवर्त्तनं ॥ तत्राष्टादशसाहस्रं नारसिंहोच्यते ॥७६॥ नंदा
याय त्र माहात्म्यं कार्त्तिकेयेन वर्ण्यते ॥ नंदीपुराणं तल्लोके ख्यातमिदं निकीर्त्यते ॥७७॥ एवमादित्यसं
ज्ञं च तत्रैव परिगद्यते ॥ अष्टादशभ्यस्तु पृथक् पुराणं यत्र प्रदृश्यते ॥७८॥ विजानीध्वं द्विजश्रेष्ठास्त
26 देवेभ्यो विनिर्गतं ॥ पंचांगानि पुराणस्य आख्यानमितरत्स्मृतं ॥७९॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि
च ॥ वंशानुवंशचरितं पुराणं पंचलक्षणं ॥८०॥ ब्रह्मविष्ण्वर्करुद्राणां माहात्म्यं भुवनस्य च ॥ संहारश्च
पु.सं० प्रदृश्येत पुराणे पंचलक्षणं ॥८१॥ धर्मश्चार्थश्च कामश्च मोक्षश्च परिकीर्त्यते ॥ सर्वेष्वपि पुराणेषु तद्विरु
द्धं च यत्फलं ॥८२॥ सात्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ॥ राजसेषु च माहात्म्यं अधिकं ब्रह्मणो
२६ विदुः ॥८३॥ तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च ॥ संकीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ॥८४॥
चतुर्भिर्भगवान्विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः ॥ अष्टादशपुराणेषु वर्ण्यते भगवान्शिवः ॥८५॥ वेदनिश्च
लं मन्ये पुराणार्थं द्विजोत्तमाः ॥ वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ॥८६॥ बिभेत्यल्पश्रुताद्वे
दः मामयं चालयिष्यति ॥ इतिहासपुराणैस्तु निश्चलोयं कृतः पुरा ॥८७॥ यन्न दृष्टं हि वेदेषु तद्दृष्टं स्मृ राम
तिषु द्विजाः ॥ उभयोर्यन्न दृष्टं तु तत्पुराणैः प्रगीयते ॥८८॥ यो वेद चतुरो वेदान्सांगोपनिषदो द्विजाः ॥ २६
पुराणं नैव जानाति न च स स्याद्विचक्षणः ॥८९॥ अष्टादशपुराणानि कृत्वा सत्यवतीसुतः ॥ भारताख्या

नरसहस्त्रांते

परिलेख्य त्रयोदश्यां तिलधेनुसमन्वितं ॥ ५८ ॥ शैवं स पदमाप्नोति नरः स्वर्गापगामने वे ॥ [?] ॥ त्रिविक्रमस्य
माहात्म्यं साधिकृत्य चतुर्मुखः ॥ ५९ ॥ त्रिवर्गमभ्यधात्तच्च वामनं परिकीर्त्यते । पुराणं दशसाहस्रं कौर्म-
कल्पगं शिवं ॥ ६० ॥ यः शरद्विषुवे दद्याद्धेमवस्त्रसमन्वितं ॥ सोमाव्रतयुतं दद्याच्च सपदं याति वैष्णवं ॥ ६१ ॥
यत्र धर्मार्थकामानां मोक्षस्य च रसातले । माहात्म्यं कथयामास कूर्मरूपी जनार्दनः ॥ ६२ ॥ इंद्रद्युम्नप्रसंगेन
ऋषीणां शक्रसंनिधौ ॥ सप्तादशसहस्राणि लक्ष्मीकल्पानुषंगिकं ॥ ६३ ॥ यो दद्यादयने कूर्मं हेमकूर्म-
समन्वितं ॥ गोसहस्रप्रदानस्य स फलं प्राप्नुयान्नरः ॥ ६४ ॥ श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्द-
नः ॥ मत्स्यरूपी च मनवे नरसिंहोपवर्णनं ॥ ६५ ॥ अधिकृत्याब्रवीत्सप्तकल्पवृत्तं मुनिव्रताः । तन्मात्स्यमि-
ति जानीतं सहस्राणि त्रयोदश ॥ ६६ ॥ विषुवे हेममत्स्येन धेन्वा हेमयुगान्वितं ॥ यो दद्यात्पृथिवी तेन दत्ता
भवति चाखिला ॥ ६७ ॥ यदा वा गारुडे कल्पे विश्वांडाद्गरुडोऽभवत् ॥ अधिकृत्याब्रवीत्कृष्णो गारुडं तदिहो-
च्यते ॥ ६८ ॥ तदष्टादशचैकं च सहस्राणीह पठ्यते । सहस्रांशसमायुक्तं यो दद्यादयने परे ॥ ६९ ॥ स समाधिं लभ-
ते मुख्यां शिवलोके च संस्थितं ॥ ब्रह्मा ब्रह्मांडमाहात्म्यमधिकृत्याब्रवीत्पुनः ॥ ७० ॥ तच्च द्वादशसाहस्रं
ब्रह्मांडं द्विशताधिकं ॥ भविष्याणां च कल्पानां श्रूयते यत्र विस्तरः ॥ ७१ ॥ तद्ब्रह्मांडपुराणं तु ब्रह्मणा समुदाहृ-
तं ॥ यो दद्यात्तद्व्यतीपाते ऊर्णायुगसमन्वितं ॥ ७२ ॥ राजसूयसहस्रस्य फलं प्राप्नोति मानवः ॥ हेमधे-
न्वायुतं तच्च ब्रह्मलोकफलप्रदं ॥ ७३ ॥ चतुर्लक्षमिदं प्रोक्तं व्यासेनाद्भुतकर्मणा ॥ इदं लोकहितार्था

इदं महापातकं हन्त्यपुंसामिति ॥ ६ ॥ नारदीये चतुर्थवाक्यं ॥ पुराणेष्वर्थवादत्वं ये वदंति नराधमाः ॥ तैरर्जि-
पु॰ सं॰ तानि पुण्यानि तद्वदेव भवंति वै ॥ समस्तकर्मनिर्मूलसाधनानि नराधमः ॥ पुराणान्यर्थवादेन ब्रुवन्न-
रकमश्नुते ॥ ७ ॥ पुराणेषु हि द्विजश्रेष्ठाः सर्वधर्मप्रवक्तृषु ॥ प्रवदंत्यर्थवादत्वं ये ते नरकभागिनः ॥ ८ ॥ अन-
यासेन यः पुण्यानीच्छतीह द्विजोत्तमाः ॥ श्राव्याणि भक्त्या तेनैव पुराणानि न संशयः ॥ ९ ॥ पुरार्जितानि पापा- श्रवणं कर्तव्यानि
नि नाशमायांति तत्क्षणे ॥ पुराणश्रवणे बुद्धिर्यस्यैव भवति ध्रुवा ॥ १० ॥ पुराणे वर्तमानेपि पापपाशेन यंत्रि-
तः ॥ अनादृत्यान्यगाथासु सद्बुद्धिः प्रवर्तते ॥ ११ ॥ सत्संगदेवार्चनसत्कथासु परोपकारे चरतो मनु-
ष्यः ॥ स याति विष्णोः परमं पदं यत् देहावसाने च्युततुल्यतेजा इति ॥ १२ ॥ काशीखंडे पूर्वार्द्धे ब्रह्मवाक्यं
पु॰ सं॰ यस्य धर्मेस्ति जिज्ञासा यस्य पापाद्भयं महत् ॥ श्रोतव्यानि पुराणानि धर्ममूलानि तेन वै ॥ १३ ॥ चतुर्दशसु वि-
२१ द्यासु पुराणं दीपमुत्तमं ॥ अथापि न तदालोकात्संसाराब्धौ कचित्पतेत ॥ १४ ॥ श्रोतव्यानि पुराणानि निवसन्त्वं-
जाह्नवीतटे इति ॥ कूर्मे च ॥ पुराणश्रवणं विप्राः कथनं च विशेषतः ॥ कृत्वा चाध्यायमेकं तु सर्वपापैः प्रमुच्य-
२४ ते ॥ १५ ॥ उपाख्यानमथैकं वा ब्रह्मलोके महीयते ॥ भविष्ये च ब्रह्मवाक्यं कौमारं प्रति ॥ यथैतानि ममेष्टानि पुरा-
णानि सदा मुने ॥ तथा न चतुरो वेदान् चांगानि महामुने ॥ १७ ॥ श्रावयत्येतानि ये भक्त्या नित्यं श्रद्धासमन्विताः ॥ द-
त्वा तु वाचके वृत्तिं ते गच्छंति परं पदं ॥ १८ ॥ धर्मार्थकाममोक्षाणां स्पष्टीकरणमुत्तमं ॥ इतिहासपुराणानि मया सम
सृष्टानि सुव्रत ॥ १९ ॥ य एते चतुरो वेदा गूढार्थाः संततं स्मृताः ॥ अतस्त्वेतानि सृष्टानि विबोधायैषां महामुने ॥ २० ॥ २१
यस्तु कारयते नित्यं धर्मश्रवणमुत्तमं ॥ आदित्याद्भास्वरं प्राप्य याति तत्परमं पदं इति ॥ २१ ॥ ब्रह्मवैव-

नमकरोद्वेदार्थैरुपबृंहितं ॥९०॥ लक्षैकेन तत्प्रोक्तं द्वापरांते महात्मना ॥ वाल्मीकिना च यत्प्रोक्तं रा
मारव्यानमनुत्तमं ॥९१॥ ब्रह्मणाभिहितं तच्च शतकोटिप्रविस्तरं ॥ आहृतं नारदायैव तेन वाल्मीकये पु
नः ॥९२॥ वाल्मीकिना तु लोकेतु धर्मकामार्थसाधनं ॥ एवं सपादाः पञ्चैते लक्षाः पुण्याः प्रकीर्तिताः ॥९३॥
पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः ॥ इतिहासपुराणानि विस्तारं कलिगौरवात् ॥९४॥ स्कांदं तथा च ब्र
ह्मांडं पुराणं लैङ्गमेव च ॥ वाराहकल्पविप्रेंद्रास्तेषां भेदः प्रवर्तते ॥९५॥ अष्टादशप्रकारेण ब्रह्मांडं भिन्न
मेव तु ॥ अष्टादश पुराणानि तेन जातानि मे तथा ॥९६॥ लिंगमेकादशविधं प्रभिन्नं द्वापरे शुभे ॥ स्कांदं
तु सप्तधा भिन्नं वेदव्यासेन धीमता ॥९७॥ एकाशीतिसहस्राणि शतं चैकं तु संख्यया ॥ तस्याद्यो यो वि
भागस्तु स्कंदमाहात्म्यसंयुतः ॥९८॥ माहेश्वरसमाख्यातो द्वितीयो वैष्णवः स्मृतः ॥ तृतीयो ब्रह्मणः प्रोक्तः
सृष्टिसंक्षेपसूचकः ॥९९॥ काशीमाहात्म्यसंयुक्तश्चतुर्थः परिपठ्यते ॥ रेवायाः पंचमो भागः सावन्त्यः
प्रकीर्तितः ॥१००॥ षष्ठः कल्पानंदसूतयोर्माहात्म्यसूचकः ॥ सप्तमो यो विभागोयं स्मृतः प्राभासिको द्वि
जाः ॥१॥ सर्वद्वादशसहस्राणि विभागा साधिकाः स्मृताः ॥ अस्मिन्प्राभासिके सर्वं वर्ण्यते क्षेत्रविस्तरः ॥२॥
तीर्थानां चैव माहात्म्यं माहात्म्यं शंकरस्य च ॥ अन्येषां चैव देवानां माहात्म्यं च प्रकीर्त्यते ॥३॥ इति भेदः
पुराणानां संक्षेपात्कथितो द्विजाः ॥ अष्टादशानां च पुराणानामनुक्रमं ॥४॥ यः पठेद्भव्यकव्येषु स
याति भवनं हरेः ॥ इदं पवित्रं यशसो निधानमिदं पितॄणामतिवल्लभं परं ॥५॥ इदं च देवेष्वमृताय नित्यं

पु॰ ३॰ प्रायेण न मंतव्यं ॥ तानि रुद्रेण सुरमोहनार्थं विष्णो राज्ञां पुरस्तु त्यक्तानि कानि चित्तु ब्राह्मणेषु प्रवि
श्य कारितानीति श्रवणात् ॥ ३६ ॥ तथा च पाद्मे उत्तरखंडे श्रीप्रादुर्भावानंतरमेकादशी माहात्म्ये पार्व
त्युवाच ॥ पाखंडानां तु संलापं वर्जयेदिति यत्त्वया ॥ ३७ ॥ उक्तं मम महेश भगवन्नाहितादृषि गर्हितं ॥ ते यादृ
शा समाचक्ष्व केलिंगे श्चोपलक्षितास्तु वि ॥ ३८ ॥ श्रीरुद्र उवाच ॥ येन्यं देवं परत्वेन वदंत्यज्ञानमोहिताः
28 नारायणाज्जगन्नाथात्ते वै पाखंडिनः स्मृताः ॥ ३९ ॥ कपालभस्मास्थिधरा ये ह्यवैदिकलिंगिनः ॥ ऋते
वनस्थाश्रमाज्जटावल्कलधारिणः ॥ ४० ॥ अवैदिकक्रियोपेतास्ते वै पाखंडिनः स्मृताः ॥ शंखचक्रोर्ध्व
पुंड्रादि चिह्नैः प्रियतमैर्हरेः ॥ ४१ ॥ रहिता ये द्विजा देवि ते वै पाखंडिनः स्मृताः ॥ समस्तयज्ञभोक्तारं विष्णुं व
पु॰ सं॰ ह्मण्यदैवतं ॥ ४२ ॥ उद्दिश्य देवता एव जुह्वति च ददाति यः ॥ स पाखंडीति विज्ञेयः स्वतंत्रो वापि कर्मसु ॥ ४३
२८ स्वातंत्र्यात्क्रियते येस्तु कर्म वेदादितं महत् ॥ यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ॥ ४४ ॥ समत्वेनैव वी
क्षेत स पाखंडी भवेत्सदा ॥ अवस्थाचितयेयस्तु मनोवाक्कायकर्मभिः ॥ ४५ ॥ वासुदेवं न जानाति स पाखं
डी भवेद्द्विजः ॥ किमत्र बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः ॥ न स्प्रष्टव्या न वक्तव्या न द्रष्टव्याः कदाचन ॥
४६ ॥ एवं श्रुत्वा तु सा देवी शंकरेणाभिभाषितं ॥ विस्मयं परमं गत्वा पुनः प्रोवाच भामिनी ॥ ४७ ॥ पार्वत्युवाच ॥ राम
भगवन् परमं गुह्यं पृच्छामि सुरसत्तम ॥ मयि प्रीत्या समाचक्ष्व संशयो वर्तते भृशं ॥ ४८ ॥ कपालभस्मचर्मा २८
स्थिधारणं श्रुतिगर्हितं ॥ यत्त्वया धार्यते देव गर्हितं केन हेतुना ॥ ४९ ॥ त्वं चापल्येन देवेश पृच्छामि
त्वां महामते ॥ महानुभावा कथितं न कर्तव्यं महेश्वर ॥ ५० ॥ त्वयेरितमित्यत्र वक्तव्यं न कापि चिह्नवेदः ॥

त्ते काशीमाहात्म्ये यज्ञशर्मोवाच ॥ ब्राह्म्यं पाद्म्यं वैष्णवं च लैंग्यं चापि सगारुडं ॥ ततो भागवतं प्रोक्तं भविष्या
ख्यं स वामनं ॥२२॥ नारदीयं तथाग्नेयं मार्कंडेयं चकूर्मकं ॥ मात्स्यं च ब्रह्मवैवर्तं तथा वाराहमेव च ॥२३॥
स्कांदं च वायवीयं च पुराणान्यष्टादश स्मृताः ॥ आद्यं सनत्कुमारं वै नारदं च द्वितीयकं ॥२४॥ ततीयं
नारसिंहाख्यं शैवधर्मं चतुर्थकं ॥ दौर्वासं पंचमं षष्ठं कापिलेयमतः परं ॥२५॥ सप्तमं मानवं प्रोक्तं अष्ट
मं शौक्रमेव च ॥ वारुणं नवमं प्राहुर्ब्रह्मांडं दशमं स्मृतं ॥ कालीपुराणं तु ततः एकादशमसमुच्यते ॥२६॥ वासि
ष्ठं लिंगं द्वादशमं ॥ माहेंद्रं तु त्रयोदशं ॥ शांबं चतुर्दशं प्रोक्तं सौरं पंचदशं तथा ॥२७॥ पाराशर्यं षोडश
मं मारीचं तु ततः परं ॥ अष्टादशं भार्गवाख्यं सर्वधर्मप्रवर्तकं ॥२८॥ एतान्युपपुराणानि सर्ववेदमयानि
च ॥ ऋषिभिः संयुक्तानि पुरुषार्थफलानि तत् ॥२९॥ वेदधर्मान्न यः कृत्यं ज्ञायंते सर्वकोविदैः ॥ न पुरा
णं विना विप्राः पुरुषार्थप्रवर्तते ॥३०॥ पुरुषार्थं विना कश्चिन्न सुखं सम्यगश्नुते ॥ अन्यथा नरकं याति
श्रवणादिविवर्जितः ॥३१॥ सुभासुभविवेकश्च श्रवणादेव जायते ॥ पुराणेषु च सर्वेषु नामभेदेन कानि
विभागं चित् ॥३२॥ व्यत्ययसंख्यातितान्यव कालभेदे कुत्रचित् ॥ वैष्णवे च ॥ ब्राह्म्यं पाद्म्यं वैष्णवं तु शैवं भागवतं तथा
तथान्यं नारदीयं च मार्कंडेयं च सप्तमं ॥३३॥ आग्नेयमष्टमं चैव भविष्यं नवमं स्मृतं । दशमं ब्रह्मवैवर्तं लिं
गमेकादशं स्मृतं ॥३४॥ वाराहं द्वादशं चैव स्कांदं चात्र त्रयोदशं ॥ चतुर्दशं वामनं च कौर्मं पंचदशं तथा ॥ मा
त्स्यं च गारुडं चैव ब्रह्मांडं च ततः परं ॥३५॥ तत्र द्विविधानि पुराणानि तेषु राजसतामसानां प्रमाण्यं वैष्णवैः

तं शास्त्रं त्वमेव कुरु सुव्रत ॥ कंकालशैवपाखंडमहाशैवादिभेदतः ॥ ६७ ॥ अवलम्ब्य मतं सम्यक् वेदवाह्या
पु॰ से॰ द्विजाधमाः ॥ भस्मास्थिधारिणः सर्वे भवंतु त्वन्न संशयः ॥ ६८ ॥ त्वां परत्वेन वक्ष्यंति सर्वशास्त्रेषु तामसाः
तेषां मतमधिष्ठाय सर्वे दैत्याः सनातनाः ॥ ६९ ॥ भवंतु त्वन्मद्विमुखाः क्षणादेव न संशयः ॥ अहमप्य
वतारेषु त्वां च रुद्र महाबलः ॥ ७० ॥ तामसानां मोहनार्थं पूजयामि युगे युगे ॥ मतमेतदवष्टभ्य पतिष्यं
२१ त्येव न संशयः ॥ ७१ ॥ तच्छ्रुत्वाहं यथोक्तं तु वासुदेवेन भामिनि ॥ समुद्विग्नमना दीनो वभूवात्र वरानने
॥ ७२ ॥ नमस्कृत्वाथ तं देवमब्रुवं परमेश्वरं ॥ त्वयोदितमिदं देव करोमि यदि स्तले ॥ ७३ ॥ स्यान्नाशाय मेन
पु य भविष्यति न संशयः ॥ न शक्यं हि मया कर्तुमेतत्कृत्यं हरे धुना ॥ ७४ ॥ त्वदाज्ञापालिनो लंघ्याः ऐव रा॰ पृ॰ ८
पु॰ सं॰ दुःखतरं महत ॥ एवमुक्तस्ततो देवि समाश्वास्य च मां पुनः ॥ ७५ ॥ आत्मानाशाय तेवत्स भवत्वित्याह
२९ माहरिः ॥ देवतानां हितार्थाय कुरुष्व वचनं मम ॥ ७६ ॥ तवाप्युज्जीवनोपायं कथयामि सुरोत्तम नित्यं
जप महाबाहो मम नाम सहस्रकं ॥ ७७ ॥ हृदये मां सदा ध्यायन् जप मंत्रं ममाव्ययं ॥ षडक्षरं महामंत्रं तारकं
ब्रह्म उच्यते ॥ ७८ ॥ येन जंति हि मां भक्त्या तेषां मुक्तिर्न संशयः ॥ इंदीवरदलश्यामं पद्मपत्रविलोचनं ॥ ७९ ॥
शंखारिशार्ङ्गायुधधरं सर्वाभरणभूषितं ॥ पीतवस्त्रं चतुर्बाहुं जानकीप्रियवल्लभं ॥ ८० ॥ श्रीरामा राम
य नम इत्येवमुच्चार्य मंत्रमुत्तमं ॥ सर्वदुःखहरं ह्येतत्पापिनामपि मुक्तिदं ॥ ८१ ॥ इमं मंत्रं जपन्नित्यम २९
मलस्त्वं भविष्यसि ॥ भस्मास्थिधारणाद्यत्स्तु संभूतं स्वा प्युचिरस्त्वपि ॥ ८२ ॥ मंगलं तदभूत्सर्वं मन्मंत्रो
च्चारणात्क्षणात् ॥ त्वच्चिंता न्नापयिष्यामि सदा सर्वसुरोत्तम ॥ ८३ ॥ मदन्य देवताभक्तिर्जायते न तु सुव्रत

न्नाकर्त्तव्यमिति प्रश्नं वक्तुमर्हसि मे प्रभो ॥५२॥ इति देव्या हरः पृष्टो रहस्ये जनवर्जिते । उवाच परमं गु
ह्यं यद् दृष्टाचरितं स्वकं ॥५३॥ श्रीरुद्र उवाच ॥ शृणु देवि प्रवक्ष्यामि यद् दृष्टं परमाद्भुतं । न वक्तव्यं त्वया किं
चिज्ज्ञानेषु कथितं मया ॥५४॥ प्रपत्कत्कुशरीरत्वात्वद्धामितवस्तुवैत ॥ नमुचाद्या महादैत्याः पुरा स्वा
यंभुवेंतरे ॥५५॥ महाबलपरीवारा महावीर्या महौजसः ॥ सर्वे धर्मरताः शुद्धाः सर्वपापविवर्जिताः ॥५५॥ वे
दोक्तधर्मयुताः सर्वे भक्ता इंद्रपुरोगमाः ॥ विष्णोः समीपमागम्य भक्त्या शौरिं शरणं गताः ॥५६॥ अजेयाः सर्वदेवा
नां तपोनिर्धूतकल्मषाः ॥ त्वमेव तान्महादैत्यान् जेतुमर्हसि केशव ॥५७॥ इत्याकर्ण्य हरे वाक्यं देवानां
च भयात्मकं ॥ तान्वध्यान्विदित्वाथ मामाह पुरुषोत्तमः ॥५८॥ श्रीभगवानुवाच ॥ त्वं च रुद्र महाबाहो मो
हनार्थं सुरद्विषां ॥ पाखंडाचरणं धर्मं कुरुष्व च महामते ॥५९॥ तामसानि पुराणानि कथयस्व च तान्प्रति
मोहनानि च शास्त्राणि कुरुष्व सुरसत्तम ॥६०॥ मयि भक्ताश्च ये विप्रा भविष्यंति महर्षयः ॥ त्वं च तेषां तां
स्तमाविश्य कथयस्व च तामसान् ॥६१॥ कणादं गौतमं शक्तिं उपमन्युं च जैमिनिं ॥ कपिलं चैव दुर्वासं
मृकंडं च बृहस्पतिं ॥६२॥ भार्गवं जमदग्निं च दशैतान् तामसान् ऋषीन् ॥ तव शक्त्या समाविश्य कुरु
त्वं जगतो हितं ॥६३॥ त्वच्छक्त्या संनिविष्टास्ते तमसोद्रिक्तया भृशं ॥ तामसास्ते भविष्यंति क्षणादेव न सं
शयः ॥६४॥ कथयंते च विप्रास्तामसानि जगत्त्रये ॥ पुराणानि च शास्त्राणि त्वं चास त्वेन वै हित ॥६५॥ क
पालचर्मभस्मास्थिचिह्नान्यमरपूजितः ॥ त्वमेव धत्स्व वै लोकान्मोहयस्व जगत्त्रयं ॥६६॥ तथा पाशुप

पु० सं० पार्वत्युवाच ॥ तामसानि च शास्त्राणि समाचक्ष्व ममानघ ॥ संप्रोक्तानीह यैर्विप्रैर्भगवद्भक्तिवर्जितैः ॥
॥१०॥ तेषां नामानि क्रमशो ममाचक्ष्व सुरोत्तम ॥१॥ श्रीरुद्र उवाच ॥ शृणु देवि प्रवक्ष्यामि तामसानि
यथाक्रमं ॥ तेषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥२॥ प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकं ॥
मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परं ॥३॥ कणादेन तु संप्रोक्तं शास्त्रं वैशेषिकं महत् ॥ गौतमेन
३० तथा न्यायं सांख्यं तु कपिलेन वै ॥४॥ धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितं ॥ दैत्यानां नाशना
र्थाय विष्णुना बुद्धरूपिणा ॥५॥ बौद्धशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकं ॥ मायावादमसच्छास्त्रं प्रच्छ
न्नं बौद्धमुच्यते ॥६॥ मयैव कथितं देवि कलौ ब्राह्मणरूपिणा ॥ अपार्थं श्रुतिवाक्यानां दर्शयन्लोक
गर्हितं ॥७॥ कर्मस्वरूपत्याज्यत्वमत्र वै प्रतिपाद्यते ॥ सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र चोच्यते ॥८॥ परे
पु० सं० शजीवयोरैक्यं मया तु प्रतिपाद्यते ॥ ब्रह्मणोस्य परं रूपं निर्गुणं वक्ष्यते मया ॥९॥ सर्वस्य जगतो
३० प्यत्र मोहनार्थं कलौ युगे ॥ वेदार्थवन्महाशास्त्रं मायावादमवैदिकं ॥१०॥ मयैव वक्ष्यते देवि ज
गतां नाशकारणात् ॥ द्विजन्मना जैमिनिना पूर्वं वेदमपार्थतः ॥११॥ निरीश्वरेण वादेन कृतं शास्त्रं राम
महत्तरं ॥ शास्त्राणि चैव गिरिजे तामसानि निबोध मे ॥१२॥ पुराणान्यपि वक्ष्यामि तामसानि यथाक्र
मात् ॥ ब्राह्मं पाद्मं च वैष्णवं तु शैवं भागवतं तथा ॥१३॥ तथैव नारदीयं तु मार्कण्डेयं तु सप्तमं ॥ आ ३०
ग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा ॥१४॥ दशमं ब्रह्मवैवर्तं लिंगमेकादशं स्मृतं ॥ द्वादशं वाम

मनसैवार्चयहृदि मां नाथं पुरुषोत्तमं ॥८४॥ मदाज्ञां कुरु मन्त्रीत्या सर्वमेतत्कुमंतव ॥ इति संदिश्य मां दे
वि विससर्ज मरुद्गणान् ॥८५॥ विशिष्टास्तेन ते देवा निवृत्तास्वाश्रमान्ययुः ॥ ततो मां प्रार्थयामासु
देवा इंद्रपुरोगमाः ॥८६॥ शीघ्रं कुरु हितं देव यथोक्तं हरिणाधुना ॥ देवतानां हितार्थाय वृत्तिं पाषंडिनां
शुभां ॥८७॥ कपालचर्मभस्मास्थि धारणं तत्कृतं मया ॥ तामसानि पुराणानि यथोक्तं विष्णुना मम
॥८८॥ पाखंडशैव शास्त्राणि यथोक्तं कृतवान् घे ॥ इमं मतमवष्टभ्य मोहं प्राप्ता सर्वराक्षसाः ॥८९॥ भगव
द्विमुखास्सर्वे वभूवुस्तामसावृता ॥ भस्मादिधारणं कृत्वा महोग्रतमसावृताः ॥९०॥ मामेव पूज
यामासुः मांसासृक्चंदनादिभिः ॥ मत्तो वरप्रदानानि लब्ध्वा बलमहोद्धताः ॥९१॥ अत्यंत विषयास
क्ताः कामक्रोधसमन्विताः ॥ सत्वहीनास्तु निर्वीर्या जिता देवगणैस्तथा ॥९२॥ सर्वधर्मपरिभ्रष्टाका
ले यांत्यधमां गतिं ॥ ये मम मतमवष्टभ्य चरंति पृथिवीतले ॥९३॥ सर्वधर्मैस्सुरहिता यास्यंति निरयं
सदा ॥ एवं देवहितार्थाय वृत्तिं वेदविगर्हितां ॥९४॥ विष्णोराज्ञां पुरस्कृत्य कृतं चर्मास्थिधारणं ॥ वा
स्थिचिह्नमिदं देवि मोहनार्थाय वै द्विषां ॥९५॥ अतो रे हृदये नित्यं ध्याये देवं जनार्दनं ॥ जपन्वै सत
तं मंत्रं तारकं ब्रह्मवाचकं ॥९६॥ सहस्रनाम सदृशं विष्णोर्नारायणस्य तु ॥ षडक्षरं महामंत्रं रघुणां कु
लवर्द्धनं ॥९७॥ जपन्वै सततं देवि सदानंदसुधाप्लुतं ॥ सुखमात्यंतिकं वाह्ममश्नामि सततं शुभे
॥९८॥ एतत्ते सर्वमाख्यातं त्वया पृष्टं वरानने ॥ किमन्यत्कौतुकामासि प्रीत्या तत्परिवक्ष्यते ॥९९॥

पु॰ ३० दैवीं प्रकृतिमासाद्य पूजयंति नराच्युतं ॥ आसुरीं योनिमापन्नाः दूषयंति नरा हरिं ॥ २०॥ मायया हृत
विज्ञाना विमोहा हि नराधमाः ॥ अप्राप्य तं हरिं विप्राः ततो यांत्यधमां गतिं ॥ २१॥ तस्य या गह्वरी माया
दुर्विज्ञेया सुरासुरैः ॥ महामोहकरी नॄणां दुस्तरा चाकृतात्मभिः ॥ २२॥ कलौ जगत्पतिं विष्णुं सर्वस्रष्ट
रमीश्वरं नार्चयिष्यंति मो विप्राः पाखंडोपहता नराः ॥ २३॥ पाद्मे यमवाक्यं । व्यामोहाय चराचरस्य ज
31 गतस्ते ते पुराणागमास्तां तामेव हि देवतां परमकां जल्पंति कल्पावधि । सिद्धांते पुनरेक एव भगवान्वि
ष्णुः समस्तागमात् ॥ व्यापारेषु विवेचनव्यतिकरं नीतेषु निश्चीयते ॥ २४॥ वैष्णवे षष्ठेंशे कलिधर्मव
मिने ॥ यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः । इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलं ॥ २५॥ नप्री पूज्यते
तिर्वेदवादेषु पाखंडेषु च या रतिः । कलिवृद्धिस्तदा प्राज्ञैरनुमेया द्विजोत्तमः ॥ २६॥ कलौ जगत्पतिं वि
पु॰ सं॰ ३१ ष्णुं सर्वस्रष्टारमीश्वरं । नार्चयिष्यंति मैत्रेय पाखंडोपहता नराः ॥ २७॥ तृतीये सृष्टिप्रसंगे पुराणादीनां
पंचमवेदत्वमुक्तं तेषां प्रामाण्यं वेदवदेव । तत्र ॥ इतिहासपुराणांच पंचमं वेदमीश्वरः सर्वेभ्य एव
वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ २८॥ द्वादशे श्रुकवाक्यं ॥ कलौ न राजन् जगतां परं गुरुं त्रैलोक्यना
थानतपादपंकजं । प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाखंडविभिन्नचेतसः ॥ २९॥ यन्नामधे राम
यं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति
यक्ष्यंति न तं कलौ जनाः ॥ ३०॥ किंच सर्वपुराणप्रामान्यसाधारण्ये सत्यपि श्रीभागवतस्याधिक्यं ३१
भगवतउत्कर्षादेव ॥ ३१॥ तथा च द्वादशे ॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतं । हरिली

नं प्रोक्तं वाराहं च त्रयोदशं ॥१५॥ मात्स्यं चतुर्दशं प्रोक्तं कौर्म्मं पंचदशं स्मृतं ॥ षोडशं गारुडं प्रोक्तं स्कांदं सप्त
दशं स्मृतं ॥१६॥ अष्टादशं तु ब्रह्मांडं पुराणानि यथाक्रमं ॥ मात्स्यं कौर्म्मं तथा लिंगं शैवं स्कांदं तथैव च
च आग्नेयं च षडेतानि तामसानि निबोधत ॥१७॥ वैष्णवं नारदीयं च तथा भागवतं शुभं ॥ गारुडं च तथा पा
द्मं वाराहं शुभदर्शने ॥१८॥ सात्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥ ब्रह्मांडं ब्रह्मवैवर्त्तं मार्कं
डेयं तथैव च ॥१९॥ भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥ सात्विका मोक्षदाः प्रोक्ता राजसा स्वर्ग
दाः शुभाः ॥२०॥ तथैव तामसा देवि निरयप्राप्तिहेतवः ॥ तथैव स्मृतयः प्रोक्ताः ऋषिभिस्त्रिगुणान्विताः
॥२१॥ सात्विका राजसाश्चैव तामसाः शुभदर्शने ॥ वाशिष्ठं चैव हारीतं व्यासं पाराशरं तथा भारद्वाजं काश्य
पं च सात्विका मुक्तिदाः शुभाः ॥२२॥ मानवं याज्ञवल्क्यं च आत्रेयं दाक्षमेव च । कात्यायनं वैष्णवं च रा
जसाः स्वर्गदाः शुभाः ॥२३॥ गौतमं बार्हस्पत्यं च सांवर्त्तं च यमं स्मृतं ॥ शांख्यं चौशनसं देवि तामसा निरय
प्रदाः ॥२४॥ किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि ॥ तामसा नरकायैव वर्जयेत्तान्विचक्षणः ॥२५॥
एतत्ते सर्वमाख्यातं प्रसंगाच्छुभदर्शने ॥ शेषं वै भक्तिवस्था हरेर्वक्ष्यामि तच्छृणु ॥२६॥ ब्राह्युवाच ॥ अ भक्तिस्वरूपं
ग्निभक्त्या रवेः भक्तिर्भवति तत्तारुद्रे तंता विष्णौ तया लोकान्मुक्त्वा मुक्तो भवतीति उक्तं ॥२७॥ मुनय ऊ
चुः ॥ एवं भवा नरा ये तु दृश्यंते तत्र वा मुने । किं ते विष्णुं नार्च्चयंति ब्रूहि तत्कारणं द्विज ॥२८॥ व्यास उवा
च ॥ द्वौ भूतसर्गौ विख्यातौ लोकेस्मिन्मुनिसत्तमाः ॥ आसुरश्च तथा दैवः पुरा सृष्टः स्वयंभुवा ॥२९॥

भ.
साध्यते कामः श्रद्धावान्मोक्षमाप्नुयात् ॥५४॥ नदानैर्नतपोभिर्वा यज्ञैर्वा वकुरूद्वह ॥ भक्तिहीनैर्मुनि
श्रेष्ठ तुष्यते भगवान्हरिः ॥५५॥ मेरुमात्रसुवर्णानां कोटिकोटिसहस्रशः ॥ दत्तमप्यर्थनाशाय यतो भक्ति
विवर्जितं ॥५६॥ अभक्त्या यत्तपस्तप्तं केवलं कायशोषणं ॥ अभक्त्या यद्धुतं हव्यं भस्मनि न्यस्तहव्यव
त् ॥५७॥ यत्किंचित्कुरुते कर्म श्रद्धया यत्प्रणमाचकं ॥ तन्महज्जायते पुंसां शाश्वतं प्रीतिदायकं ॥५८॥ अ
श्वमेधसहस्त्रं वा कर्म वेदोदितं कृतं ॥ तत्सर्वं निःफलं ब्रह्मन्यतो भक्तिविवर्जितं ॥५९॥ हरिभक्तिः परा नृणां का क्ति. ५
मधेनूपमा स्मृताः ॥ तस्यां सत्यां पिबंत्यज्ञाः संसारगरलं ह्यहो ॥६०॥ असारभूते संसारे सारमेतदजात्मज
भगवद्भक्तसंगश्च हरिभक्तिस्तितिक्षमा ॥६१॥ आचाराणां तु सर्वेषां योगानां चैव सत्तम ॥ हरिभक्ति
पु. सं० रपि सदा निदानं भक्तिरिष्यते ॥६२॥ भक्त्यैव पूज्यते विष्णुर्वांछितार्थफलप्रदः ॥ तस्मात्समस्तलोकानां भक्तिर्मातेति
३२ गीयते ॥६३॥ जीवंति जंतवः सर्वे यथा मातरमाश्रिताः ॥ तथा भक्तिं समाश्रित्य सर्वे जीवंति जंतवः ॥६४॥ भक्तिस्तु
भगवद्भक्तप्रसंगेन प्रजायते ॥ तत्संगः प्राप्यते पुंभिः सुकृतैः पूर्वसंचितैः ॥६५॥ कामादिदोषनिर्मुक्तास्ते संतो
लोकशिक्षकाः ॥ सत्संगः परमो ब्रह्मन्न लभ्येताकृतात्मभिः ॥६६॥ यदि लभ्येत विज्ञेयं पुण्यं जन्मांतरार्जितं ॥ पू राम
र्वार्जितानि पुण्यानि समायांति तु यस्य वै ॥६७॥ सत्संगतिर्भवेत्तस्य नान्यथा घटते हि सा ॥ रविः स्वरश्मिजाले
न दिवा हंति वहिस्तमः ॥६८॥ संतः सूक्तमरीच्योघैः सर्वांतर्ध्वांतं हि सर्वदा ॥ दुर्लभाः पुरुषा लोके भगवद्भक्तिमा ३२
नसाः ॥६९॥ तेषां संगो भवेद्यस्य तस्य शांतिर्हि शाश्वती ॥ इति ॥ स्कांदे सह्याद्रिखंडे समहस्राड्जीनवाकं ॥ दुःख

समूहाः
लोकस्या वृत्तांतमृतानंदितसत्तमं ४१ निम्नगानां यथा गंगा देवानामच्युतो यथा। वैष्णवानां यथा शंभुः पु
राणानामिदं तथा ४२ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा तथा पुराणव्रातानां श्रीमद्भागवतं
द्विजाः ४३ श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते (प्रगीयते)
॥४५॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं। तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्न
रः॥४६॥ भारते सनत्सुजाते। आख्यानपंचमैर्वेदैरिति। व्याख्यातं शंकराचार्यैः आख्यातं पुराणं पंचमं
येषां वेदानां ते आख्यानपंचमास्तैः ४७ तत्रैव छांदोग्ये। इतिहासपुराणमिति। गीतासु भगवता स्ववि
मुखाश्चासुरत्वेनोक्ताः। अवजानंति मां मूढा मानुषीं तनुमाश्रिताः परं भावमजानंतो मम भूतमहेश्वरं
४८ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ४९ इति
श्रीमत्पुराणसंग्रहाख्ये मिनवप्वकरोक्षिमपुराणेनेवामाप्यप्रमाणानुगुणपुराणवाक्यग्रथनरू
पः द्वितीयः परिच्छेदः समाप्तिमगमत्सुभार्थः। २ अथ भगवद्भक्तेः माहात्म्यं बृहन्नारदीये नारदवाक्यं भ
क्तिर्भक्तैव कर्तव्या तथा कर्माणि भक्तितः कर्माण्यश्रद्धाहीनानि न सिद्ध्यंति हि द्विजोत्तमाः ५० यथा लोके हि
जंतूनां चेष्टाकारणतां गता। तथैव सर्वसिद्धीनां भक्तिः परमकारणं ५१ यथा समस्तलोकानां जीवनं सलि
लं स्मृतं तथा समस्तसिद्धीनां जीवनं भक्तिरिष्यते ५२ यथा भूमिं समाश्रित्य सर्वे जीवंति जंतवः तथा
भक्तिं समाश्रित्य सर्वकर्माणि साधयेत् ५३ श्रद्धावांल्लभते धर्मान् श्रद्धावानर्थमाप्नुयात् श्रद्धया
तत्रै

तिते पुनः॥८२॥ येषां मनसि गोविंदो निवासी सततामले॥ न ते परिभवं यांति न मृत्योरुद्विजंति च॥८३॥ देवंश
भ० ङ्खधरं विष्णुं ये प्रपन्नाः परायणाः॥ न तेषां यमसालोक्यं न च ते नरकौकसः॥८४॥ न तां गतिं प्राप्नुवंति श्रुति
शास्त्रविचारकाः॥ विप्रा दानवशार्दूल विष्णुभक्ता व्रजंति यां॥८५॥ या गतिर्दैत्यशार्दूल हतानां तु महाह
वे॥ ततोधिकां गतिं यांति विष्णुभक्ता नरोत्तमाः॥८६॥ या गतिर्धर्मशीलानां सात्विकानां महात्मनां॥ सा गति
33 र्दिता दैत्य केशवं सेवितामपि॥८७॥ सर्वावासं वासुदेवं सूक्ष्ममव्यक्तविग्रहं॥ प्रविशंति महात्मानस्तद्भ
क्तानन्यचेतसः॥८८॥ अनन्यमनसो भक्त्या ये नमस्यंति केशवं॥ शुचयस्ते महात्मानस्तीर्थभूता भवंति
ते॥८९॥ तिष्ठन्गच्छन्स्वपन्जाग्रत्पिबन्नश्नन्नमीलन्नाशः॥ ध्यायेन्नारायणं यस्तु न ततोन्योस्ति पुण्यभाक्
पु० सं० ॥९०॥ वैकुंठं खंडपरसुं भगवंतं भवच्छिदं॥ प्राणापत्य यथान्याय्यं संसारे न पुनर्भवेत्॥९१॥ येषां विष्णुः प्रियो
३३ नित्यं विष्णोर्यसततं प्रियाः॥ न ते पुनः संभवंति तद्भक्तास्तत्परायणाः॥९२॥ ध्यायेद्दामोदरं यस्तु भक्तिनम्रो वै ज्ञातः
ये तच॥ न स संसारपंकेस्मिन्मज्जते दानवेश्वर॥९३॥ कल्यमुत्थाय ये भक्त्या स्मरंति मधुसूदनं॥ श्रावयं
त्यपि श्रावयंति दुर्गान्यतितरंति ते॥९४॥ येषां चक्रगदापाणौ भक्तिरव्यभिचारिणी॥ ते यांति नियतं स्था
नं यत्र योगेश्वरो हरिः॥९५॥ विष्णोः कर्मप्रशस्तानां भक्तानां या परा गतिः॥ सा तु जन्मसहस्रेण न तपोभि राम
रवाप्यते॥९६॥ किं तस्य बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने॥ ॐ नमो नारायणायेति मंत्रः सर्वार्थसाधकः॥ ३३
॥९७॥ विष्णुरेव गतिर्येषां कुतस्तेषां पराजयः॥ येषामिंदीवरश्यामो हृदयस्थो जनार्दनः॥९८॥ सर्वमं

मसत्कर्मकृतैस्तवं धैर्यैर्वद्धोपि जंतुर्यदि वापि दैत्यः॥ विमुच्यते विष्णुकृतात्प्रसादादनुग्रहाद्भक्तियुतान्मुकुंद
हात्॥७०॥ वैरेण भक्त्या हरिविद्यसंयत्किति स्वेच्छया दात्मरूपं॥ धुन्वन्स्वकर्मातिशयं हि भक्त्या हरिं व्रजेद्देंम
विमुक्तदेहः॥७१॥ शुभाशुभैः कर्मभिः यो हि भक्त्या वैरेण मुक्तो हरिमेव याति॥ यथाग्निना हेममलं जहाति
ध्मातं पुनः स्वं भजते स्वरूपं॥७२॥ आत्मा स्वकर्मातिशयं विधुन्वन्वैरेण भक्त्या भजते हरिं तमिति॥ ब्राह्मे च कुं
भोति भगवानुवाच॥ मद्भक्ता ह्यन्त्यजा वैश्याः स्त्रियः शूद्रान्त्यजातिजाः॥ प्राप्नुवंति परां सिद्धिं किं पुनस्ते द्वि
जोत्तम ७३ स्वपाकोपि च मद्भक्तो सम्यक्छ्रद्धासमन्वितः॥ प्राप्नोत्यभिमतां सिद्धिमन्येषामत्र का कथा इति
७४ वामनपुराणे तेवलिं प्रति प्रह्लादवाक्यं॥ भवजलधिगतानां द्वंद्ववाताहतानां सुतदुहितृकलत्रत्राण
भारार्दितानां विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणां॥७५॥ सा जिह्वा या ह
रिं स्तौति तच्चित्तं यत्तदर्पितं॥ तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ॥७६॥ नूनं न तत्करौ प्रोक्तौ वृक्षशाखा
ग्रपल्लवौ॥ नैव पूजयितुं शक्तौ हरिपादांबुजद्वयौ॥७७॥ नूनं तत्कंठशालूकमथवाप्रतिजिह्विका॥ रोगवत्येव
सा जिह्वा या न वक्ति हरेर्गुणान्॥७८॥ शोचनीयः स बंधूनां जीवन्नपि मृतो नरः॥ यः पादपंकजं विष्णोः
न पूजयति भक्तितः॥७९॥ ये नरा वासुदेवस्य सततं पूजने रताः॥ मृता अपि न शोच्यास्ते सत्यं सत्यं मयो
दितं॥८०॥ येनार्चितो हि भगवान् चतुर्धा वै त्रिविक्रमः॥ तेनार्चिता न संदेहो लोकाः सर्वे च दानवाः॥८१॥ ये
संखचक्राब्जकरं सशार्ङ्गिणं खगेंद्रकेतुं वरदं श्रियः पतिं॥ समाश्रयंते भवभासनं तं संसारगर्ते न भवं

म०
॥११॥ आत्मवत्सर्वभूतेषु वर्तमानो दयापरः ॥ अपरिग्रहवान्विष्णुं ध्यायन्नवानसीदति ॥१२॥ तदस्य नाम
जीवस्य पतितस्य भवांबुधौ ॥ हस्तावलंबदानाय प्रवीणो नान्यो परो हरेः ॥१३॥ एतावत्मात्रमेवैतत्सकलं हि
जसत्तम ॥ धर्ममूलं हरेर्भक्तिः स्वधर्मस्य च पालनं ॥१४॥ एतन्मे चोदितमशेषमनंतरं यत्कर्तुं व्यवस्य पु
रुषः क्रमशः प्रयाति तद्ब्रह्म यत्र चतुराननशंकराद्यामुह्यंति यत्परमहंसपदं वदंति ॥१५॥ तत्रैव शौन
34 क वाक्यं ॥ सूत सम्यक्त्वया ख्यातं नराणां मुक्तिकारणं ॥ स्वधर्मसंस्थितैः कृष्णो यथाराध्यतमो नृभिः ॥१६॥
वशिष्टेन यथा पौत्रो हिंसाया विनिवर्तितः ॥ तत्कृतं निखिलं चाद्य यथासि द्रौ पराशरः ॥१७॥ ब्राह्मणं दुर्लभं
लोके तत्र गार्हस्थ्यपालनं ॥ सम्यक्सुदुर्लभतरं तत्र नारायणाश्रयः ॥१८॥ सूत वाक्यं ॥ शरणागतरक्षणोद्यतं
पु० सं० हरिमीशं प्रणमंति ये नराः ॥ न पतंति भवांबुधौ स्फुटं पतितानुद्धरति स्मतानसो ॥१९॥ तदेव शौनक देवशा
३४ भक्तिग्राह्यो जनार्दनः ॥ जगन्नाथो जगत्स्रष्टा एकादश्यां विशेषतः ॥२०॥ सर्वधर्मविरहितो ज्ञामिलो ब्र
ह्मणो ध्रुवं ॥ वेश्यापतिर्य्यो धामव्याजेनापि हरिं नतः ॥२१॥ किंपुनः श्रद्धया विप्र जगन्नाथ रुड़गामिनं ॥
अत्र व्रतस्येतिहासो द्रष्टव्यः तदनंतरश्लोकाः ॥२२॥ एवं सएष कुरुते भगवान्भवाब्धिपोतो प्रमेयशरणं शरणं
जनानां ॥ दुःखग्रहाणामपि भक्तिविनाकृतेन ध्यातः स्मृतः किमुत भक्तियुतस्तु तेन ॥२३॥ एवं प्रभावो भग राम
वान्भार्गव श्रीपतिः स्मृतः कुरुतेत्यंतमेकांता दुःखत्रयविमोक्षणं ॥२४॥ यथाकथंचिदप्यूहं पुंडरीकाक्ष ३४
कीर्तनं ॥ विमुच्यतेन धर्म्मान्यः श्वातुर्वणेय श्रमेसमः ॥२५॥ तत्रैव विप्रश्च द्विजनं कोपाख्याने सूतः ॥ एतत्तवे

गर्भं मा गत्वं वरेण्यं वरदं प्रभुं ॥ नारायणं नमस्कृत्य सर्वकर्माणि कारयेत् ॥९९॥ तीर्थकोटिसहस्राणि ती
र्थकोटिशतानि च ॥ नारायणप्रणामस्य कलां नार्हन्ति षोडशीं ॥१००॥७००॥ पृथिव्यां यानि तीर्थानि
पुण्यान्यायतनानि च ॥ तानि सर्वाण्यवाप्नोति विष्णोर्नामानुकीर्त्तनात् ॥१॥ प्राप्नुवंति न तां लोकान्व्रति
नो वा तपस्विनः ॥ प्राप्यते ये तु कृष्णस्य नमस्कारपरैर्नरैः ॥२॥ योऽप्यन्यदेवताभक्तो मिथ्यार्चयति केश
वं ॥ सोऽपि स गच्छति साधूनां स्थानं पुण्यकृतं महत् ॥३॥ सातत्येन हृषीकेशं पूजयित्वा तु यत्फलं ॥ सुची
र्णतापसां नृणां तत्फलं न कदाचन ॥४॥ त्रिसंध्यं पद्मनाभं तु ये स्मरंति सुमेधसः ॥ ते फलं तु पवासस्य फ
लं नास्त्यत्र संशयः ॥५॥ ये कीर्त्तयंति वरदं वरपद्मनाभं शंखाब्जचक्रशरचापगदासिहस्तं ॥ पद्मालयावद
नपंकजषट्पदाख्यं नूनं प्रयांति सदनं मधुघातिनस्ते ॥६॥ वृह्मवेवत्तंम् तवाक्यं ॥ तदिदं विपरीततरंगि
णीतरणं तदिदं निशातनिस्त्रिंशधारासंचरणं तदिदं सिरसि महीधरधारणं ॥ तदिदं गुरुगिरिशिखरनाव्या
नीरसंचरणं ॥७॥ तदिदं ज्वलज्ज्वालावलीकरालज्वलनशयनाधिशयनं । तदिदं कारीषाग्निनिषे मुष
वणं तदिदं मायासवर्णिकवर्णनं तदिदं मुक्ततवालुकाकवलनं ॥८॥ तदिदं व्यालमत्तमतंगजाभिमुखग
मनं तदिदं केसरिकिशोरपृष्ठाधिरोहणं ॥ तदिदं विषमविषधरफणामणिकाग्रहणं ॥९॥ अहो सात्वि
कत्व अहो अप्रतिनिर्मलत्वमहो निष्कामत्व महो महाशयत्व महो स्पृहणीयगुणत्वं ॥ यद्द्रजितभावे भग
वदाश्रयो विधीयते ॥१०॥ इत्येतदुदितं विप्रपरमानंदकारणं ॥ श्रुत्वा विवेकवैराग्यं यन्मनो हरिभावितं

वेत्तारं सर्वेशं पुरुषं परं ॥ ३९ ॥ तस्मात्त्वमप्यसि सर्वत्वं यया ॥ मिच्छसि नंदने ॥ सुखस्य दाता परमार्थदाता मोक्षस्य
भ॰ वै दाता जगतां हितार्थः ॥ ४० ॥ चतुर्वर्गं विष्णुप्रतिज्ञ कांक्षे त्वं भक्तिवर्गाधिहरः परात्मा भावप्रियो भावकृतां सदैवः ॥
त्वद्भावना भाग्यवतां परा स्यात् भाग्यं विना किं तव भावना स्यात् ॥ ४१ ॥ त्वदाज्ञया याति जनो जनत्वं त्वदाज्ञया सं
वृणुते परं तत् ॥ त्वदाज्ञया हंस इति हा भवत्यलं त्वदाज्ञया नाशित यास्वयं न शेत ॥ ४२ ॥ विष्णुः ॥ न मत्प्रियाः के
पि न चाप्रिया वा ममास्य शुद्धस्य सनातनस्य तथापि दीनं तु भजाम्यिमानं येनात्मसात्सर्वमिदं कृतं कृतं ॥
४३ ॥ येरहं नु सुकृतैर्दृष्टस्तस्य पुंसः संपूजितः स्मृतः ॥ स्मृतस्तत्पवमां नित्यं न त्यजंति कदाचन ॥ ४४ ॥ पीत्वा पीयू
षममृतं नाशवं पातुमिच्छति ॥ मयि किं न महादेव किं वा नदीयतेमया ॥ ४५ ॥ अतो मम सिरातिं कुर्यात्सर्वदा पापह
पु॰ सं॰ रिणी ॥ स्नानं दानं विष्ण्वर्चनं च नित्यं मत्या कुर्वतां कुत्र बाधइति ॥ ४६ ॥ लिंगपुराणे श्रीपार्वतीप्रश्ने स्तवकं ॥ वशि
३५ ष्ठब्रह्मसंवादेन ॥ अथ एवं तु वचनं सर्वं प्रणिपत्य जनार्दनं ॥ देवदेवमजं विष्णुं कृष्णमच्युतमीश्वरं ॥ ४७ ॥ सर्वपापह
रं शुद्धं मोक्षदं ब्रह्मवादिनं ॥ मनसा कर्मणा वाचा यो विद्वानुएवकर्मकृत ॥ ४८ ॥ नारायणं जपेन्नित्यं प्रणम्य
35 पुरुषोत्तमं ॥ स्वयं नारायणं देवं गच्छन्नारायणं तथा ॥ ४९ ॥ भुंजन्नारायणं विष्णाति एज्जागृन्सनातनं ॥ उत्मि
षं निमिषं वापि नमो नारायणेति वै ॥ ५० ॥ भोज्यं लेह्यं च पेयं च नमो नारायणेति च ॥ अभिमंत्र्य स्पृशन्भुंक्ते राम
स याति परमां गतिं ॥ ५१ ॥ सर्वपापविनिर्मुक्तः प्राप्नोति परमां श्रियं ॥ अलक्ष्मीश्च मया प्रोक्ता पत्नी या दुस्सह ३५
स्य च ॥ ५२ ॥ नारायणपदं स्पृष्ट्वा गच्छत्येव न संशयः ॥ या लक्ष्मीर्देवदेवस्य हरेः कृष्णस्य वल्लभा ॥ ५३ ॥ गृहे क्षेत्रे स

दितमेव अनेकदुःखविच्छेदकारणमयं पुरुषोत्तमोस्ति ॥ श्रीमान्पुराणपुरुषो नरकं न याति संसृत्यतं यदि
भवत्यपि दुष्कृतार्थी ॥ २६ ॥ एतद्वशीकरणमेतदनुत्तमं च धर्मस्य साधनमिदं तदिदं च पुण्यं नारायणांघ्रियुग
लं प्रणतं मनो यत्सद्भिः समागमनमाशुफलप्रदं च ॥ २७ ॥ अपारे पारदां वस्तरी भासि कायवारिधेः संसार
संज्ञकाद्देव गुरूणामप्यगेनु च ग्रहः ॥ २८ ॥ तत्रैव ऋषभदेववाक्यं पुत्रान्प्रति। तस्मादखिलसंसारसागरो
त्तरकारणं ॥ नारायणमजं देवं समाश्रयेत विद्यया ॥ २९ ॥ स एव जगतामीशः सृष्टिस्थित्यंतकृत्समः। करो
ति दुःखोपशमं प्रणतसंसृतसंसृतः ॥ ३० ॥ न तत्करोति सा माता न पिता न च बांधवाः ॥ यत्करोति हृषीकेशः
प्राणिनां प्रणतः प्रभुः ॥ ३१ ॥ सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितं ॥ तावेव केवलं श्लाघ्यौ यौ तत्पूजाकरौ करौ
॥ ३२ ॥ अयं सः परमो धर्मो यत्स घोरेणात्मदर्शनं ॥ एतत्सारमिदं सत्यं यन्नारायणपूजनं ॥ ३३ ॥ जीवद्भिरंचित
देवा उपचारैः पृथग्विधैः नालभंते परित्राणं क्वापि पतिं विना हरिं ॥ ३४ ॥ तस्मात्तमेव शरणं पुरस्तादाश्रयेद्बुध
सर्वधर्मस्वरूपो सावेक एव जनार्दनः ॥ परमात्मानममलं भजध्वं सर्वथा हरिं ॥ ३५ ॥ गोविंदपादयुगलं प्रणति २
व्रतं च शास्त्रेषु निश्चितमिदं विजयाभिधानं ॥ येमानवा निजहृदि स्थिरतां विधाय ते यां प्रसीदति मुरच्छिद
रारिपाणिः ॥ ३६ ॥ विश्वैकवंदितमनिंदितमित्यकर्मपुष्पोश्रयेगरुडगामिनमर्चयंति ॥ येमानवादनुजवंश
विनाशधूमकेतूदयोपममिति चक्रधरं बुधास्ते ॥ ३७ ॥ पाद्मे भूमिखंडे तु गश्रुति अत्रेवाक्यं ॥ भक्त्या तुष्य
ति गोविंदो भावध्यानेन सत्तम ॥ सर्वं ददाति तुष्टात्मा भक्त्या संतोषितो हरिः ॥ ३८ ॥ तस्मादाराध्य गोविंदं सर्वं

भ॰

राजसोत्तमा ॥६७॥ यस्तु स्वकृतपापानां क्षयार्थं पूजयेद्धरिं । श्रद्धया परया राजन्सा भक्तिः सात्त्विकाध-
मा ॥६८॥ हरेरिदं प्रियमिति शुश्रूषां कुरुते तु यः । जनेश श्रद्धया युक्तो ज्ञेया सात्त्विकमध्यमा ॥६९॥ विधिबु-
ध्यार्चयेद्यस्तु ~~किंचित्कुर्वन्प्रियो नरः । तन्मयत्वेन संतुष्टः सा भक्तिः सात्त्विकोत्तमा~~ ॥ दासवच्चक-
पाणिनं ॥ भक्तीनां प्रवरा ज्ञेया सा भक्तिः सात्त्विकोत्तमा ॥७०॥ महिमानं हरेर्यस्तु किंचित्कुर्वन्प्रियो न-
रः ॥ तन्मयत्वेन संतुष्टः सा भक्तिस्तूत्तमोत्तमा ॥७१॥ अहमेव परो विष्णुर्मयि सर्वमिदं जगत् इति यः सत-
तं पश्येत्तं विद्यादुत्तमोत्तमं ॥७२॥ एवं दशविधा भक्तिः संसारच्छेदकारिणी । तत्रापि सात्त्विकी भक्तिः सर्व-
कामफलप्रदा ॥७३ वृहन्नारदीये च भागीरथ्यं प्रति यमः प्रवलद्यामुक्तो ॥ अन्यच्च ॥ यः स्वधर्मं परित्य-
ज्य भक्तिमात्रेण जीवति । तस्य तुष्यते विष्णुः चराचरैः पूज्यते ततः ॥७४॥ मानुष्यं दुर्लभं जन्म प्राप्यते यैर्मुनी-
श्वराः । तत्रापि हरिभक्तिस्तु दुर्लभा परिकीर्तिता: ॥७५॥ तस्मात्तडिल्लतालोलं मानुष्यं प्राप्य दुर्लभं ॥ हरिं
संपूजयेद्भक्त्या पशुपाशविमोचकं ॥७६॥ सर्वान्तरायान्नश्यन्ति मनःशुद्धिश्च जायते ॥ परं मोक्षं लभेच्चैव
पूज्यमाने जनार्दने ॥७७॥ धर्मार्थकाममोक्षाख्याः पुरुषार्थाः सनातनाः । हरिपूजापराणां तु सिद्ध्यन्ते नात्र
संशयः ॥७८॥ संसारेस्मिन्महाघोरे मोहनिद्रासमाकुले । ये प्रयान्ति हरिं भक्त्या कृतार्थास्ते न संशयः ॥७९॥ राम
भक्त्या यजति यो विष्णुं महापातकवानपि । प्रयाति परमं स्थानं सर्वपापविमोचितः ॥८०॥ सर्वतीर्थानि य- २६
ज्ञाश्च सांगा वेदाश्च सत्तमाः ॥ नारायणार्चनस्यैते कलां नार्हन्ति षोडशीं ॥८१॥ मखशास्त्रैश्च विविधैः किं

पु॰सं॰ २६

दातेषांतन्नैवबसतिसुव्रताः॥ आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः॥५४॥ इदमेकंसुनिष्पन्नंध्येयो
नारायणःसदा॥ किमन्यैर्बहुभिर्मंत्रैः किमन्यैर्बहुभिर्व्रतैः॥५५॥ नमोनारायणायेतिमंत्रःसर्वार्थसाध
कः॥ तस्मात्सर्वेषुकालेषुनमोनारायणेतियः॥५६॥ जपेत्सयातिविप्रेंद्रविष्णुलोकंसबांधवः॥ गा० ३ ड० च
स्र० त० उ० भक्तिरष्टविधाह्येषायस्मिन्म्लेच्छोपिवर्त्तते॥ सविप्रेंद्रःमुनिःश्रीमान्सयतिःसचपंडितः॥५७॥
वि प ते नि षे धः॥ नश्रृणोतिगुणान्दिव्यान्देवदेवस्यचक्रिणः॥ सनरोवधिरोज्ञेयःसर्वधर्मवहिःकृतः॥५८॥
वि धिःसंसारविषवृक्षस्यद्वेफलेह्यमृतोपमे॥ कदाचित्केशवेभक्तिस्तद्भक्तैर्वासमागमः॥५९॥ विष्णुधर्मो
त्तरेचतुर्द्वाकं॥ यस्याप्यनंतेजगतामधीशेभक्तिःपरायादवदेवदेवे॥ तस्मात्परंनापरमस्तिकिंचित्पवि
त्रलोकेपुरुषप्रवीर॥६०॥ तस्मैदेयंततोग्राह्यंसचपूज्योयथाहरिः॥ ६ भक्तिभेदाः विष्णुधर्मोत्तरे॥ भक्तिर्द
शविधाज्ञेयापापारण्यदवोपमा॥ तामसैराजसैश्चैवसात्विकैश्चनृपोत्तम॥६१॥ यश्चान्यस्यविनाशार्थं
भजतेश्रद्धयाहरिं॥ खलवत्पृथिवीपालसाभक्तितमसोधमा॥६२॥ योर्चयेत्कैतवधियास्वैरिणीस्वपतिं
यथा॥ नारायणंजगन्नाथंसावैतामसमध्यमा॥६३॥ देवपूजपरान्दृष्ट्वामत्सराद्योर्चयेद्धरिं॥ श्रृणु
ष्वपृथिवीपालसाभक्तिस्तामसुत्तमा॥६४॥ धनधान्यादिकंयस्तुप्रार्थयन्नर्चयेद्धरिं॥ श्रद्धयापरया
विष्णोःसाभक्तीराजसाधमा॥६५॥ यःसर्वलोकविख्यातांकीर्त्तिमुद्दिश्यमाधवं॥ अर्चयेत्परयाभक्त्या
सावैराजसमध्यमा॥६६॥ सालोक्यादिपदंयस्तुसमुद्दिश्यार्चयेद्धरिं॥ विज्ञेयापृथिपालसाभक्ति

भ॰ विवर्जितः ॥ ९४ ॥ नमस्कारप्रियो नित्यं मम चिंताव्यवस्थितः । अष्टाङ्गः कर्मणि मोदे विप्र एवं समाचरेत् ॥ ९६ ॥
त्यक्त्वा अपि सहस्राणि अष्टाङ्गेन भजाम्यहमिति । नारदीये ॥ हरिभक्तिकरं यत्तत् सद्भिः सम्यक् परिरञ्जितं । आत्म-
नः प्रीतिजनकं तत्पुण्यं परिकीर्तितं ॥ ९७ ॥ सर्वं जगदिदं विष्णुः विष्णुः सर्वस्य कारणं । अहं च विष्णुरिति य
त् तद्धि स्मा स्मरणं विदुः ॥ ९८ ॥ सर्वदेवमयो विष्णुर्विधिहोतस्य पूजनं । इति या भवति प्रीतिः सा भक्तिः प
रिकीर्तिता ॥ ९९ ॥ सर्वभूतमयो विष्णुः परिपूर्णः सनातनः । इत्यभेदभवेद्बुद्धिः सा पूजा परिकीर्तिता ॥ १०० ॥ १००
पाद्मे । यस्मात्प्रपद्यते देवं शरणं जगतः हरिं । प्रपत्तिः सा तु विज्ञेया त्रिधा संपरिकीर्तिता ॥ १ ॥ उपायभावा
त्संत्यज्य कर्मज्ञानादिकं नरः । कुर्वीत भगवत्प्रीत्यै महाभागवतोत्तमः ॥ २ ॥ स्कांदे रेवाखंडे ॥ किं तस्य बहुभि
पु॰सं॰ र्मंत्रैर्भक्तिर्यस्य जनार्दने ॥ नमो नारायणायेति मंत्रः सर्वार्थसाधकः ॥ ३ ॥ एकोपि कृष्णस्य कृतः प्रणामो दशा
३७ श्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ ४ ॥ ते पूज्यास्ते नमस्का
र्यास्तेषां जन्म सुजीवितं । येन मंतिजगत्पूज्यं देवं नारायणं हरिं ॥ ५ ॥ ता निशास्ते च दिवसास्ते मासास्ते
च वत्सराः । नराणां सफला येषु चिंतितो भगवान् हरिः ॥ ६ ॥ परमापत्कृतस्यापि यस्य देवो जनार्दनः ॥ नावस
र्पति हृत्पद्मात्स योगी नात्र संशयः ॥ ७ ॥ ते भाग्यहीना मनुजा सुशोच्यास्ते भूमिभारायकृतावताराः ।
अचेतनास्ते पशुभिः समाना ये भक्तिहीना भगवत्यनंते ॥ ८ ॥ ते पूर्णकार्याः पुरुषाः पृथिव्यां ते स्वाङ्घ्रिपू- राम
ता भुवनं पुनंति ॥ विचक्षणा विष्णुविभूषणास्ते ये भक्तियुक्ता भगवत्यनंते ॥ ९ ॥ स एव सुकृती तेन ल ३७
ब्धं जन्मतरोः फलं । चित्ते वचसि कार्ये च यस्य देवो जनार्दनः । सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितं

किंवा तीर्थनिषेवणैः ॥ विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः ॥८२॥ कुत्सितं मांसरक्ताद्यैर्देहं संप्राप्य ये
नरः ॥ संसारच्छेदकं विष्णुं न भजेत्स च पातकी ॥८३॥ चांडालोपि मुनिश्रेष्ठ विष्णुभक्तो द्विजाधिकः ॥ विष्णु
भक्तिविहीनश्च द्विजोपि श्वपचाधिकः ॥८४॥ विष्णुभक्तिविहीना ये चांडालाः परिकीर्तिताः ॥ चांडाला अपि वै
श्रेष्ठा हरिभक्तिपरायणाः ॥८५॥ हरिभक्तिपरा ये तु हरिनामपरायणाः ॥ वासुदेवपरा ये च तेषां नित्यं नमो न
मः ॥८६॥ हरिभक्तिपराणां तु संगिनां संगमात्रतः ॥ मुच्यते सर्वपापेभ्यो महापातकवानपि ॥८७॥ हरिपूजा
पराणां च हरिनामरतात्मनां ॥ शुश्रूषानिरता यांति पापिनोपि परां गतिं ॥८८॥ पे३मर्कघेवड्रादवाक्वो ॥ य
स्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति
धावतो बहिः ॥८९॥ हरिर्हि साक्षाद्भगवान्शरीरिणामात्मा झषाणामिव तोयमीप्सितं ॥ हित्वा महांसं यदि स
ज्जते गृहे तदा महत्वं वयसा दंपतीनां ॥९०॥ तस्माद्रजोरागविषादमन्युमानस्पृहा ॥ भयदैन्याधिमूलं ॥ हि
त्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजता कुतो भयं ॥९१॥ नारदीये विष्णुदूताः ॥ मुहूर्तं वा मुहूर्तार्द्धं यस्ति
ष्ठेद्धरिमंदिरे ॥ स याति परमं स्थानं किमु शुश्रूषणे रताः ॥९२॥ उपलेपनकर्त्तारो संमार्जनपरायणाः ॥ जल
सेचनकर्त्तारो दीपदा हरिमंदिरे ॥९३॥ कथमेतो महाभागो नयिष्यथ यमांतिकं ॥ वाराहे उक्तं कर्मणा ॥ शू
द्रोपि भगवत्प्रियो भवतीति प्रतिपादितं ॥ तथाहि ॥ दंपती मम भक्तो यो मम कर्मपरायणः ॥ उभौ भगवतो भ
क्तो मत्परो कर्मनिष्ठितो ॥९४॥ निरहंकार शुद्धात्मा अतिथिर्मित्रवत्सलः ॥ श्रद्दधानो विपूतात्मा लोभमोह

२४ पाद्मे धर्मविवर्द्धये तल्लिप्यं पदयच्छति मनोरथं ॥ भगवच्चरणद्वंद्वं निर्द्वंद्वध्यानमुत्तमं । पापिनापि प्रसंगेन
फ. विहितं स्वहितं परं ॥ २५ ॥ पापिनां यानि पापानि महोपपदमीक्षतां सुनीलध्यानसंपन्नो नामोच्चारे हरे हरेत ॥ २६ ॥
नितांतं कमलाकांतं शांतं चित्ते विधाय यत् । संशीलयेत्क्षणं नूनं कमला तत्र निश्चला ॥ २७ ॥ ब्राह्मणः क्षत्रियो
वैश्यो वा शूद्रो वा यदि चेतरः । विष्णुभक्तिसमायुक्तो ज्ञेयः सर्वोत्तमस्तु सः ॥ २८ ॥ वैष्णवे ब्रह्मदेवाक्यं । भयं भया
नामपहारिणि स्थिते मनस्यनंते मम कुत्र तिष्ठति ॥ यस्मिन्स्मृते जन्मजरांतकादि भयानि सर्वाण्यपयांति तात
त ॥ २९ ॥ वैष्णवे भगवंतं प्रति ब्रह्मवाक्यं । तत्त्वोऽस्मि भगवन्वरेणानेन यत्त्वयि । भवित्री त्वत्प्रसादेन भक्तिरव्यभ
चारिणी ॥ ३० ॥ धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता । समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥ ३१ ॥
पु. सं. ३८ वैष्णवे हतीर्थेशे । प्ररोहहेतुसामग्रीमासाद्य मुनिसत्तम । तथा कर्मस्वनेकेषु देवाद्यास्तत्र वः स्थिताः ॥ ३२ ॥
विष्णुशक्तिसमासाद्य प्ररोहमुपयांति वै । विष्णुरेव परं ब्रह्म यतः सर्वमिदं जगत् ॥ ३३ ॥ षष्ठे यमवाक्यं ।
एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः । भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ ३४ ॥ नामोच्चारणमाहा
38 त्म्यं हरेः पश्यत पुत्रकाः । अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥ ३५ ॥ प्रायेण वेद तदिदं न महाजनोऽयं
देव्या विमोहितमतिर्बत माययालं । त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके कर्मणि युज्यमानः ॥ ३६ ॥ राम
एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयोगं । ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पा ३८
तकं तदपि हंत्युरुगायवादः ॥ ३७ ॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः । ता

तावद्वकेवलोमृत्प्राप्ययौतत्पूजाकरोकरौ सर्वदासर्वकार्येषु नास्तितेषाममंगलं ॥११॥ येषांहृदिस्थो
भगवान्मंगलायतनोहरिः। यदन्यद्देवताश्रीयाः फलंप्राप्नोतिमानवः ॥१२॥ साष्टांगप्रणिपातेनतत्फ
लंलभतेहरेः। रेणुगुंठितगात्रस्य यावतस्यरजःकणाः। तावद्वर्षसहस्राणि विष्णुलोकेमहीयते ॥१३॥ पू
जायांक्रीयतेरुद्रोजपहोमैर्दिवाकरः। शंखचक्रगदापाणिः प्रणिपातेनतुष्यति ॥१४॥ पाद्मे उत्त
रखंडे हात्रिशतताध्याये। यः संसारेऽस्मिन्कुलेचैवजन्तोर्ह्रते: अद्यहिवैष्णवोजातो विष्णोर्भक्ति
प्रसादतः ॥१५॥ यस्यांशोनेनिवसतोसमोहंइतियोजपेत् तेनपुण्यादियोगेनशिवोवैनात्रसंशयः
॥१६॥ पाद्मेऽन्यत्रातैवधन्यतमालोकेनारायणपरायणाः तेस्त्रभक्तिःसदाकार्यायेवैभागवतानराः १७ ब्र
ह्मांडे श्वेतद्वीपस्वरं प्रतिनारदवाक्यं। मनसोममदेवेशरूपमेतदतींद्रियं। कस्यांचिदप्यवस्थायांईदृश:
माप्यपैकतु १८ त्वन्नामश्रवणेश्रोत्रेजिह्वातेनामकीर्तने चक्षुषीचापितेरूपेत्वय्यंतःकरणानिच १९
दृढीभवंतुमेनित्यं वरमेतद्वृणोम्यहं। भक्तिस्त्वच्चरणांभोजेविमुक्तान्यव्यपाश्रये ॥२०॥ नारायणेतितेनाम
निरंतरं श्रोतुमिच्छाम्यनारतं ॥ सर्वदासर्वभावेषु सर्वावस्थासुतन्मम ॥२१॥ श्रुतिगोचरतामेतियत्रकापिश्रवर्त्ति
तः ॥ श्रीभगवानुवाच ॥ वीणायंमधुरारावाभवत्कर्णेदिवानिशं २२ नारायणेतितन्नाममगायंतित्वत्त्रि
येप्सया सप्ततंत्रीसमायुक्तामहतीमधुरस्वरा २३ अनाहतापिहस्तस्था सदागायत्यभीप्सितं। गा ३
रुडे ॥ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा। यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः

भ० तथा विष्णुं स्मराम्यहं ॥५४॥ न धनेन समृद्धेन विपुलाविद्यया तथा ॥ एकेन भक्तियोगेन यथा विष्णुः प्रसीदति
॥५५॥ वारिं त्यक्त्वा यथा हंसो पयः पिवति नित्यशः ॥ एवं धर्मान्परित्यज्य विष्णोर्भक्तिं समाश्रयेत् ॥५६॥ विष्णुभ
क्तिं विना धर्मान्नुपदिशंति ये नराः ॥ ते पतंति सदा घोरे नरके नात्र संशयः ॥५७॥ शनैः श्रूयते भक्तिः सहस्रै
रपि वोध्यते ॥ तेषां मध्ये तु देवेशि भक्तो ह्येकः प्रजायते ॥५८॥ परेषां वुद्धिदा संति लोके वहुविधा जनाः ॥ स्वय
वि माचरते कोऽपि दृक्कोऽपि सुदृश्यते ॥५९॥ पूजया हसते भक्तिः जपेन परिरक्ष्यते । समाधियोगात्त्वाहिः साभक्तिः केन
गृह्यते ॥६०॥ अन्याशक्ता यथा रामा क्रीडते स्वपतिं प्रति ॥ एवं भावो देवेशि भक्तिस्तेन गृह्यते ॥६१॥ भक्तिः भ
गवति देवि कर्मभिन्नं च वाध्यते ॥ अजामिलः स्वधर्मं च त्यक्त्वा पापं समाचरन् ॥६२॥ पुत्रं नारायणं स्मृत्वा
पु. सं. मुक्तिं वा प्राप्नुयाद्ध्रुवं ॥ विष्णुभक्तिः कृता येन विष्णुलोके वसत्यसौ ॥६३॥ दृष्टांतं हि ध्रुवे पश्य विष्णुभक्तिप्र
२९ सादतः ॥ दर्दुरा वसते नीरे षट्पदो हि वनांतरे ॥६४॥ गंधं वेत्ति कुमुद्वत्यां भक्तो भक्तस्तथा हरेः ॥ कर्पूरागुरु भारो
यमुष्ट्रो वहति नित्यशः ॥६५॥ न च गंधं न जानाति तथा विष्णुवहिर्मुखाः ॥ मृगाः शिलां हि जिघ्रंति कस्तूरी
गंधमिच्छवः ॥६६॥ स्वनाभिस्थं न जानंति तथा विष्णुं वहिर्मुखाः ॥ उपदेशो हि मूर्खाणां यथा वै नगनंदनि ॥६७॥
तथैवान्यभक्तानामुपदेशो वहिर्मुखः ॥ अहिना च पयः पीतं तत्पयो हि विषायते ॥६८॥ तथा चैवान्यभक्तानां राम
विष्णुभक्तिर्विषायते ॥ चक्षुर्हीना यथा दीपं तथा दर्पणमेव च ॥६९॥ समीपस्थं न पश्यंति तथा कृष्णं वहिर्मुखाः ॥ २९
काष्ठे त्वादौ स्थितो वह्निर्मंथनाद्देव दृश्यते ॥ एवं सर्वगतो विष्णुः ध्यानादेव प्रपश्यते ॥७०॥ अग्निरन्नो

न्नोपसीदतहरेर्गदयाभिगुप्तान्नैषांवयंनचवयःप्रभवामदंडे॥३५॥ वैसवेषऐंशो॥ ध्यायन्त्वेतेयकृष्ण
ज्ञेस्मेतायांद्वापरेर्च्चयन्न। यदाज्ञातितदाज्ञातिकौलौसंकीर्त्यकेशवं॥३९॥ पाद्मकुंडलविकुंडलसंवादेय
मदूतवाक्यं॥ तपस्तप्त्वानरोघोरमरण्येनियतेंद्रियः॥ तत्फलंसमवाप्नोतितन्नत्वागरुडध्वजं॥४०॥ क्ला
तुवकुशःपापंनरोमोहसमन्वितः॥ नयातिनरकंनत्वासर्वपापहरंहरिं॥४१॥ देवंशार्ङ्गधरंविष्णुंयेप्रपन्ना
परायणाः॥ नतेषांयमसालोक्यंनचतेनरकौकसः॥४२॥ बाह्मेउत्तरखंडेउमारुद्रसंवादेप्रश्नोत्तराभ्यांस्म
रणलक्षणमुक्तं॥ तत्र॥ पार्वत्युवाच॥४३॥ अनंतवासुदेवस्यकीदृशंस्मरणंस्मृतं॥ यंस्मृत्वानपुनर्देहो
मानुषाणांविजायते॥४४॥ महादेवउवाच॥ कुधातुरातुदेवेशिस्मरंत्यन्नंतुनित्यशः॥ तथाहुराययाआप
तहिंस्रंस्मरम्यहं॥४५॥ भयार्त्तःशरणमिच्छुरर्थिलोभीयथाधनं॥ पुत्रकामीयथापुत्रंतथा०॥४६॥ हंसामान
सभिक्षंतिक्रूरपयःस्मरणंहरेः॥ भक्त्यास्वभक्तिमिच्छंतितथा०॥४७॥ वत्सवत्साच्चयथाभक्तिंपशवस्त्वतृणादय
धर्ममिच्छंतिवैसंतस्तथा०॥४८॥ प्राणिनोवल्लभोदेहायत्रआत्मावतिष्ठते॥ आयुर्वांछंतिजीवास्तुतथा॥४९॥
मातंगाःपार्वतीभृंगिसिंहावनगजादिकं॥ तथैवस्मरणंविष्णोःकर्त्तव्यंपापभीरुभिः॥५०॥ सूर्यकांतिरवियोगा
द्वह्निस्तत्रप्रजायते॥ एवंवैसाधुसंयोगाद्धरौभक्तिःप्रजायते॥५१॥ हिमरश्मिभवाकांतिस्तुचंद्रयोगात्पयःस्र
वत्॥ एवंवैविष्णुसंयोगान्मुक्तिर्भवतिशाश्वती॥५२॥ कुमुद्वतीयथासोमंदृष्ट्वापुष्पंविकाशते॥ तद्वद्देवेकृता
भक्तिःमुक्तिदासर्वदानृणां॥५३॥ गोपीभिर्जारवद्ध्याच्चविष्णोस्तुस्मरणंकृतं॥ तास्तुसायोज्यतांनीता

भ॰

४०

त ॥ तत्र ॥ तस्मात्त्वया महाराज विष्णुक्षेत्रमशेषतः ॥ कार्त्तुनगाननृत्यादिवाद्योत्सवसमन्वितं ॥ ८६ ॥ कर्त्तव्यं
विष्णुभक्तैर्हि पुरुषैरनिशं नृप ॥ श्रोतव्यं च त्वया गीतं श्रोतव्यो च हरिस्त्वया ॥ ८७ ॥ विष्णुक्षेत्रे ततो विद्वान्का
रयेद्भक्तिसंयुतः ॥ गाननृत्यादिकं चैव विष्णोराख्यानकं तथा ॥ ८८ ॥ जातिस्मृतिर्हि मे प्रांचतथैव परमस्मृ
तिं ॥ प्राप्नोति विष्णुसालोक्यं सत्यमेतन्नराधिप ॥ ८९ ॥ हरेः कीर्त्तिं विना चान्यद्ब्राह्मणेन नृपोत्तम ॥ न गेयं
येन गीतव्याविद्यया पकृतात्वया ॥ ९० ॥ ब्राह्मणा वासुदेवाख्यं गीयमानो निशं नृप ॥ हरेः सालोक्यं
माप्नोति रुद्रगानाधिको भवेत् ॥ ९१ ॥ अन्ययानरकं गच्छेज्जायमानोन्यदेवहि कर्मणा मनसा वाचा वासु
देवपरायणः ॥ गायन्नृत्यंस्तवंस्तु समाप्नोति तत्स्माद्विष्णुपरं विदुः ॥ ९२ ॥ काशीखंडे ध्रुवस्तुतौ ॥ ब्राह्मणः क्षत्रि
पु॰सं॰ यो वैश्यः शूद्रो वाथ यदीतरः ॥ विष्णुभक्तिसमायुक्तो ज्ञेयः सर्वोत्तमश्च सः ॥ ९३ ॥ श्रीभागवते प्रथमे सूतवाक्यं ॥ स
४० वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययात्मा संप्रसीदति ॥ ९४ ॥ वासुदेवे भगवति भक्ति
योगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकं ॥ ९५ ॥ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः
नोत्पादयेद्यदि रतिं श्रम एव हि केवलं ॥ ९६ ॥ धर्मस्य ह्यापवर्ग्यस्य नार्थोर्थायोपकल्पते । नार्थस्य धर्मैकांतस्य
कामो लाभाय हि स्मृतः ॥ ९७ ॥ कामस्य नेंद्रियप्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो य राम
श्चेह कर्मभिः ॥ ९८ ॥ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं ॥ ९९ ॥ ४०
तस्मादेकेन मनसा भगवान्सात्वतां पतिः ॥ श्रोतव्यः कीर्त्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ १०० ॥ यदनुध्यासि

स्प

यथाहिप्रःमुक्त्यानतत्प्रयोजनं । यदाभक्तिरसोज्ञातो नमुक्तीरोचतेतदा ॥७१॥ योगैरष्टविधैस्त्रैवनप्राप्यस्त्रे
हजन्मभिः ॥ भक्त्याचप्राप्यतेविष्णुःसर्वदासुलभोभवेत् ॥७२॥ भक्त्याचेत्प्राप्यतेविष्णुःयोगैरष्टविधैस्तु
किं ॥ भक्तिहीनैश्चस्तुवेदैःपठितैःकिंप्रयोजनं ॥७३॥ श्वपचोभक्तियुक्तस्तुत्रिदशैरपिपूज्यते । हरिस्मृतिप्र
मादेनरोमांचिततनुर्यदा ॥७४॥ नयनानंदसलिलंमुक्तिर्दासीभवेत्तदा । कर्माधीनंजगत्सर्वंविष्णुनानि
र्मितंपुरा ॥७५॥ तत्कर्मकेशवाधीनंरामनाम्नाविनश्यति । ब्रह्माद्यैर्दुर्लभःस्वप्नेसुलभोगोपमंदिरे ॥७६॥
गोपोच्छिष्टंयदाभुक्तंतदातेतारितास्वयं । नारदीयेस्तवाकं । सर्वदेवमयोविष्णुःस्मरणात्तुप्रणाश
नः ॥ सद्भक्तिवत्सलोदेवोभक्त्यातुष्यतिनान्यथा ॥७७॥ भगवद्भक्तौविघ्नकरणेनिंदातत्रैव । नरोयःसत्क
थामध्येऽन्यद्वदतिपातकी । सयातिनरकंघोरंतस्मान्नैववदेत्तदा ॥७८॥ तस्मात्सर्वंपरित्यज्यकामं
दुःखस्यसाधनं । समाहितमनाभूत्वाकुर्याद्च्युतचिंतनं ॥७९॥ येनकेनाप्युपायेनस्मृतोनारायणो
ऽव्ययः ॥ अपिपातकयुक्तस्यप्रसन्नःस्यान्नसंशयः ॥८०॥ यस्यनारायणेभक्तिर्विभौविश्वेश्वरेऽव्यये ॥ तस्य
स्यात्सफलंजन्ममुक्तिस्तत्रैवकरेस्थिता ॥८१॥ धर्मार्थकाममोक्षाख्यापुरुषार्थाहिजोत्तमाः । हरिभक्तिपरा
णांवैसंपद्यंतेनसंशयः ॥८२॥ ध्यातःस्मृतःपूजितोवासततंनमितोऽपिवा । स्वपदंयोददातीशस्तंवंदेतंपुरु
षोत्तमं ॥८३॥ योभारतेभुवंप्राप्यविष्णुपूजापरोनरः । नतस्यसदृशंचास्तियथावैरविंजसः ॥८४॥
लिंगपुराणेअंबरीषंप्रति । मार्कंडेयवाक्येनब्राह्मणादिभिःभगवद्गानमवश्यंकार्यंमहाफलजनकत्वा ६०

स्पृहयति भद्रां परस्य मे ते स्नुवते नु लोके ॥१४॥ न कर्हिचिन्मत्पराः शान्तरूपेन नङ्क्ष्यंति नो मेनिमिषो लेढि
हेतिः ॥ येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं ॥१५॥ इमं लोकं तथैवामुमात्मानमुभ
यायिनं ॥ आत्मानमनु ये चेह ये रायो पशवो गृहाः ॥१६॥ विसृज्य सर्वानन्यांश्च मामेव विश्वतोमुखं
भजंत्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥१७॥ नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् ॥ आत्मनः स
१ र्वभूतानां भयं तीव्रं निवर्त्तते ॥१८॥ एतावानेव लोकेस्मिन्पुंसां निश्श्रेयसोदयः ॥ तीव्रेण भक्तियोगेन मनो
मय्यर्पितं स्थिरं ॥१९॥ मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये । मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ ॥
२०॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं ॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥२१॥ सालोक्य
पु॰सं॰ साष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ दीयमानं न गृह्णंति विना मत्सेवनं जनाः ॥२२॥ स एवं भक्तियोगा
८१ ख्य आत्यंतिक उदाहृतः ॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥२३॥ ष ६ वृत्रवाक्यं । अहं हरे तव
पादैकमूलदासानुदासो भवितास्मि भूयः ॥ मनः स्मरेतासुपतेर्गुणानां गृणीत वाक्कर्म करोतु कायः ॥
41 ॥२४॥ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा
विरहय्य कांक्षे ॥२५॥ अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्त्ताः ॥ प्रियं प्रियेव व्युषि राम
तं विषण्णा मनोरविंदाक्ष दिदृक्षते त्वां ॥२६॥ ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ॥ ८१
त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥२७॥ कपिलः ॥ वासुदेवे भगवति भक्ति

नायुक्ताः कर्मग्रंथिनिबंधनं ॥ छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं ॥१॥ अतो वै कवयो नित्यं भक्तिं प
रमया मुदा ॥ वासुदेवे भगवति कुर्वंत्यात्मप्रसादिनीं ॥२॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लो
कस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ॥३॥ तृतीये मैत्रेयवाक्यं ॥ स वै निवृत्तिधर्मेण वासुदेवानुकंपया ॥
भगवद्भक्तियोगेन तिरोधत्ते शनैरिह ॥४॥ यदेंद्रियोपरमोथ द्रष्टात्मनि परे हरौ ॥ विलीयंते तदा क्लेशाः प्रसुप्त ऽज्ञान
स्येव कृत्स्नशः ॥५॥ वृह्मवाक्यं ॥ ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं ॥ भक्त्या
गृहीतचरणः परया च तेषां नापैषि नाथ हृदयांबुरुहात्स्वपुंसां ॥६॥ तावद्भयं द्रविणगेहसुहृन्निमित्तं शोक
स्पृहापरिभवो विपुलश्च लोभः ॥ तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेंघ्रिमभयं प्रवृणीत लोकः ॥७॥
तृतीये कपिलवाक्यं ॥ नियुज्यमानया भक्त्या भगवत्यखिलात्मनि ॥ सदृशोस्ति शिवः पंथा योगिनां ब्रह्मसि
द्धये ॥८॥ देवानां गुणलिंगानामानुश्राविककर्मणां ॥ सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥९॥ अ
निमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥ जरयत्याशु या कोशं निगीर्णमनलो यथा ॥१०॥ नैकात्मतां मे
स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः ॥ येन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ॥११॥
पश्यंति ते मे रुचिराण्यंब संतः प्रसन्नवक्त्रारुणलोचनानि ॥ रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां
वदंति ॥१२॥ तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ॥ हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो
गतिमण्वीं प्रयुंक्ते ॥१३॥ अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं ॥ श्रियं भागवतीं वा

भ॰ गुरुशुश्रूषया भक्त्या लब्धसर्वार्पणेन च ॥ संगेन साधुभक्तानामीश्वराराधनेन च ॥ ४२ ॥ श्रद्धया तत्क
थायां च कीर्तने गुणकर्मणां ॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ॥ ४३ ॥ एवं निर्जितषड्वर्गैः क्रि
यते भक्तिरीश्वरे ॥ वासुदेवे भगवति यया संलभते रतिं ॥ ४४ ॥ निशम्य कर्माणि गुणानतुल्यान्वीर्याणि ली
नि लातनुभिः कृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति च ॥ ४५ ॥ यदा ग्रहग्रस्त
इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं ॥ मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ॥
५२ ४६ ॥ तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः ॥ निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजं ॥ ४७ ॥ अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं ॥
पु॰ सं॰ तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ॥ ४८ ॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपा अनुशरणात्
४२ श्रयाः ॥ भजतानीहयात्मानमनीहं हरिमीश्वरं ॥ ४९ ॥ देवोसुरो मनुष्यो वा [illegible]
यक्षो गंधर्व एव च ॥ भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं ॥ ५० ॥ नालं द्विजत्वं देवत्वमृषित्वं वासुरा
त्मजाः ॥ प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता ॥ ५१ ॥ न दानं न तपो नेज्या न शौचं न व्रतानि च ॥ प्रीयतेऽमल
या भक्त्या हरिरन्यद्विडंबनं ॥ ५२ ॥ ततो हरौ भगवति भक्तिं कुरुत दानवाः ॥ आत्मौपम्येन सर्वत्र सर्वभूता
त्मनीश्वरे ॥ ५३ ॥ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ॥ खगा मृगाः पापजीवाः संति ह्यच्युततां गताः
॥ ५४ ॥ एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ॥ ५५ ॥ स[illegible]मे ७

योगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं ॥ २८ ॥ षष्ठे इंद्रवाक्यं ॥ यस्य भक्तिर्भगवति
हरौ निःश्रेयसेश्वरे ॥ विक्रीडितो मृतांभोधौ किं क्षुद्रैः खातकोदकैः ॥ २९ ॥ षष्ठे रुद्रः पार्वतीं प्रति ॥ वासुदेवे
भगवति भक्तिमुद्वहतां नृणां ॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ३० ॥ चतुर्थे नारदवाक्यं ॥ वासु
देवे भगवति भक्तियोगः समाहितः ॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥ ३१ ॥ सोऽचिरादेव राजर्षे
स्यादच्युतकथाश्रयः ॥ शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ॥ ३२ ॥ यत्र भागवता राजन्साधवो
विशदाशयाः ॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥ ३३ ॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयू
षशेषसरितः परितः स्रवंति ॥ ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंति क्षुत्तृड्भयशोकमोहाः
॥ ३४ ॥ द्वितीये शुकवाक्यं ॥ न ह्यतोऽन्यः शिवः पंथा विशतः संसृताविह ॥ वासुदेवे भगवति भक्तियोगो य
तो भवेत् ॥ ३५ ॥ भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ॥ तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भ
वेत् ॥ ३६ ॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परं ॥ ३७ ॥ एता
वानेव लोकेऽस्मिन्पुंसां निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः ॥ ३८ ॥ सप्तमे प्रह्ला
दवाक्यं ॥ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं ॥ ३९ ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥ क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमं ॥ ४० ॥ सप्त
मे प्रह्लादवाक्यं ॥ तत्रोपायसहस्राणामयं भगवतोदितः ॥ यदीश्वरे भगवति यथा यै रंजसा रतिः ॥ ४१ ॥

भा० हित्वा गुणीतयूसंयतकस्वात्मवं पुरुषं परं ॥६८॥ सद्भीात्मभावो धिकृतो भवती नाम धोक्षजे ॥ विरहेण महाभागा
महान्मेनुग्रहः कृतः ॥६५॥ कुरुक्षेत्रे गोपीपतिकस्यः ॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते । दिष्ट्या
यदासीन्मत्स्नेहो भवती नां मदापनः ॥६९॥ एकादशे तु उद्धवं प्रति भगवानाः ॥ मल्लिंगमद्भक्तजनदर्शन
स्पर्शनार्चनं । परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्तनं ॥७०॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ॥ सर्व
लाभोपहरणं दास्येनात्मनिवेदनं ॥७१॥ मज्जन्मकर्मकथनं मम पर्वानुमोदनं । गीततांडववादित्रगोष्ठीभि
र्मद्गृहोत्सवः ॥७२॥ यात्राबलिविधानं च सर्ववार्षिकपर्वसु । वैदिकी तांत्रिकी दीक्षा मदीयव्रतधारणं ॥७३॥ म
मार्चीस्थापने श्रद्धा स्वतः संहत्य चोद्यमः ॥ उद्यानोपवनाक्रीडपुरमंदिरकर्मणि ॥७४॥ संमार्जनोपलेपाभ्यां
पु०सं० सेकमंडलवर्तनैः ॥ गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥७५॥ अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं । यदि
८२ दिष्टतमं लोके यच्चाति प्रियमात्मनः ॥७६॥ तत्तन्निवेदयन्मह्यं तदानंत्याय कल्पते ॥ यथाग्निः सुसमिद्धार्चिः
करोत्येधांसि भस्मसात् ॥७७॥ तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥ ७ न साधयति मां योगो न सांख्यं ध
43 र्म उद्धव ॥७८॥ न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥ भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः स
तां भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवान् ॥७९॥ धर्मः सत्यदयोपेतो विद्या वा तपसान्विता । मद्भक्त्या
पेतमात्मानं न सम्यक्प्रपुनाति हि ॥८०॥ कथं विना रोमहर्षं द्रवता चेतसा विना ॥ विनानंदाश्रुकलया शुद्ध्येद्भ मम
क्त्या विनाशयः ॥८१॥ वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ॥ विलज्ज उद्गायति नृत्यते च ८२
मद्भक्तियुक्तो भुवनं पुनाति ॥८२॥ यथाग्निना हेममलं जहाति ध्मातं पुनः स्वं भजते च रूपं ॥ आत्मा च क

ह्लादस्तुतौ। मन्ये धनाभिजनरूपतपःश्रुतौजःतेजःप्रभावबलपौरुषबुद्धियोगाः॥ नाराधनाय हि भवं
ति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय॥ ५६॥ विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंद
विमुखात्श्वपचं वरिष्ठं। मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः॥ ५७॥ द
शमे देवस्तुतौ॥ एवं नरा एनं संस्मरंश्चिंतयन्नामानि रूपाणि च मंगलानि। क्रियासु यस्त्वच्चरणारविं
दयोराविष्टचेता न भवाय कल्पते॥ ५८॥ दशमे शुकः॥ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता। स्ववशेना
पि कृष्णेन यस्येदं सेश्वरं वशे॥ ५९॥ नायं सुखापो भगवान्देहिनां गोपिकासुतः। ज्ञानिनां चात्मभूतानां यथा
भक्तिमतामिह॥ ६०॥ दशमे ब्रह्मस्तुतौ॥ ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्तां
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलोक्यां॥ ६१॥ श्रेयःस्रुतिं भक्ति
मुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषा
वघातिनां॥ ६२॥ पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया॥ विबुध्य भक्त्यैव कथोप
नीतया प्रपेदिरेंऽजोऽच्युत ते गतिं परां॥ ६३॥ दशमे गोपीः प्रति उद्धववाक्यं। अहो यूयं स्म पूर्णार्था भवं
त्यो लोकपूजिताः॥ वासुदेवे भगवति यासामित्यर्पितं मनः॥ ६४॥ दानव्रततपोहोमजपस्वाध्यायसं
यमैः॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते॥ ६५॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा
भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा॥ ६६॥ दिष्ट्या पुत्रान्पतीन्देहान्स्वजनान्भवनानि च

मं. स्तु भक्त्या स्वप्राप्तिरुक्ता ॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥ यस्यांतःस्थानि भूतानि येन सर्वमिदं
ततं ॥ ९९ ॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ १०० ॥ येप्य
१०० न्यदेवता भक्ता यजंते श्रद्धयान्विताः ॥ तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं ॥ १ ॥ अहं हि सर्वयज्ञानां भो
५५ क्ता च प्रभुरेव च न तु मामभिजानंति तत्वेनातश्च्यवंति ते ॥ २ ॥ यांति देवव्रता देवान्पितॄन्यांति पितृव्रताः ॥
भूतानि यांति भूतेज्या यांति मद्याजिनोपि मां ॥ ३ ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भ
क्त्युपहृतमश्नामि प्रयतात्मनः ॥ ४ ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कु
पु.सं. रुष्व मदर्पणं ॥ ५ ॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः ॥ संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ ६ ॥
४४ समोहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः ॥ ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं ॥ ७ ॥ अपि चेत्सुदुराचारो
भजते मामनन्यभाक् ॥ साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ॥ ८ ॥ क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छ
ति ॥ कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ९ ॥ मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः ॥ स्त्रियो
वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं ॥ १० ॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥ अनित्यमसुखं लो
कमिमं प्राप्य भजस्व मां ॥ ११ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वैवमात्मानं मत्प राम
रायणः ॥ १२ ॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ॥ इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ १३ ॥ मच्चित्ता म ४४
द्गतप्राणा बोधयंतः परस्परं ॥ कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥ १४ ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्व

मोनुशयं विधूय मद्भक्तियोगेन भजंत्यथो मां ॥ ८३ ॥ यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणा
भिधानैः ॥ तथा तथा पश्यति तत्वसूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं ॥ ८४ ॥ विषयान्ध्यायतश्चित्तं विषयेषु विषज्ज २
ते ॥ मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥ ८५ ॥ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ॥ हित्वा मयि समा
धत्स्व मनो मद्भावभाविते ॥ ८६ ॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं ॥ परिनिष्ठा च पूजायां स्तुति
भिः स्तवनं मम ॥ ८७ ॥ आदरः परिचर्यायां सर्वांगैरभिवंदनं ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥ ८८ ॥
मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं ॥ मय्यर्पणं च मनसः सर्वकामविवर्जनं ॥ ८९ ॥ मदर्थेर्थपरित्या
गो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥ ९० ॥ एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेद
नां ॥ मयि संजायते भक्तिः को न्यो र्थो स्यावशिष्यते ॥ ९१ ॥ प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुने ॥
कामा हृदय्या नश्यंति सर्वे मयि हृदि स्थिते ॥ ९२ ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते
चास्य कर्माणि मयि दृष्टेखिलात्मनि ॥ ९३ ॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ॥ न ज्ञानं न
च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ९४ ॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रे
योभिरितरैरपि ॥ ९५ ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछ
ति ॥ ९६ ॥ न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ॥ ९७ ॥ नै
रपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य जायते ॥ ९८ ॥ भगवद्गीता

भ० देशेर्जुन तिष्ठति ॥ ३१ ॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ तमेव शरणं गच्छ सर्वभावेन भारत ॥ ३२ ॥
तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ॥ सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥ इष्टोसि मे दृढमिति
स्ततो वक्ष्यामि ते हितं ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ ३४ ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रि
योसि मे ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ३५ ॥ उद्यो
45 गपर्वणि विदुरयानभगवद्याने उक्ते धृतराष्ट्र ३० ॥ गावल्गणे यथा भक्तिं जाने नित्यं जनार्दने तथा त्वमभिजा
नासि त्रियुगं मधुसूदनं ॥ ३६ ॥ संजय उवाच ॥ मायां न सेवे भद्रं ते न वृथा धर्ममाचरे ॥ शुद्धभावस्ततो भ
क्त्या शास्त्राद्वेद्मि जनार्दनं ॥ ३७ ॥ द्रोणपर्वणि जयद्रथवधे युधिष्ठिरवाक्यं ॥ स्रष्टारं सर्वभूतानां परमात्मान
पु॰सं॰ मच्युतं ॥ ये प्रपन्नाः हृषीकेशं न ते मुह्यन्ति कर्हिचित् ॥ ३८ ॥ पुराणं परमं देवं देवदेवं सनातनं ॥ ये प्रपन्नाः
८५ सुरगुरुं ते न मुह्यन्ति कर्हिचित् ॥ ३९ ॥ अनादिनिधनं देवं लोककर्तारमव्ययं ॥ तद्भक्त्या ये हृषीकेशं दु
र्गाण्यपि तरंति च ॥ ४० ॥ परं पुराणं पुरुषं पुराणानां परं च यत् ॥ प्रपद्यस्तत्परं मं परां भूतिर्विधीयते ॥ ४१ ॥
गायंति चतुरो वेदा यश्च वेदे च गीयते ॥ तं प्रपद्ये महात्मानं भूतिमाप्नोत्यनुत्तमां ॥ ४२ ॥ धनंजयस
हायं तं धनंजयहिते रतं ॥ धनंजयस्य गोप्तारं प्रपद्ये सुखमेधते ॥ ४३ ॥ इति श्रीमत्पुराणसंग्रहारण्येभिनव
प्रकरणेस्मिन्न हरिभक्तेर्माहात्म्यं नु गुणपुराणवाक्यग्रथनरूपः तृतीयपरिच्छेदः ॥ ३ ॥ समाप्तिमग राम
मत् शुभार्थी ॥ अथ सत्संगमहिमा लक्षणं च ॥ ब्रह्मवैवर्ते सूतवाक्यं ॥ स्वर्गस्तु लेन लभते न तथापवर्गः ॥ ८५
सत्संगमस्य कलयापि न यस्य विष्णो ॥ तस्याशिषः किमुपमानपदं प्रयाति मर्त्यस्य जन्ममरणापहृतस्य विप्र ॥ १ ॥

के ददामि बुद्धियोगं तं येन मामुपयांति ते १५ तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो
ज्ञानदीपेन भास्वता: १६ न वेद यज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः। एवंरूपः शक्य अहं नृलो
के द्रष्टुं त्वदन्येन कुरुप्रवीर १७ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम। देवा अप्यस्य रूपस्य नित्यं दर्शन
कांक्षिणः १८ नाहं वेदैर्न तपसा न दानेन न चेज्यया। शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा १९ भक्त्या
त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परंतप २० मत्कर्मकृन्मत्परमो म
द्भक्तः संगवर्जितः निर्वैरः सर्वभूतेषु यः स मामेति पांडव २१ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः २२ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। अनन्येनैव यो
गेन मां ध्यायंत उपासते २३ तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि नचिरात्पार्थ मय्यावेशितचेत
सां ॥२४॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय॥ निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः।२५। मां च यो
व्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते।२६॥ मक्ते स्वदु व्हीं मत्वमु
के॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते परां २७ भक्त्या मामभिजा
नाति यावान्यश्चास्मि तत्वतः। ततो मां तत्वतो ज्ञात्वा विशते तदनंतरं २८ सर्वकर्माण्यपि सदा कुर्वाणो म
द्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं २९ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः बुद्धि
योगमुपाश्रित्य मच्चित्तः सततं भव ३० मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि। ईश्वरः सर्वभूतानां हृ

वै० हिसः १३ गंधपुष्पादिकं सर्वं शिरसा यो न्वधारयेत्। विष्णवे योग्यमित्येवं मत्वा सौ वैष्णवः स्मृतः १४
विष्णुदेवस्य भान्येव करोति स्नेहसंयुतः प्रतिमां च हरेर्नित्यं पूजयेत्प्रयतात्मवान् १५ विष्णुभक्तः
स विज्ञेयः कर्मणा मनसा गिरा नारायणपरो नित्यं महाभागवतो हि सः १६ भोजनाच्छादनं सर्वं यथा
शक्त्या करोति यः। विष्णुभक्तस्य सततं स वै भागवतः स्मृतः १७ नारायणपरो विद्वान्यः स्वोत्तं प्री
46 तमानसः। अश्नाति तदुरेतस्य गतमेव न संशयः १८ स्वाद्वन्नादपि विश्वात्मा प्रीतो भवति माधवः
महाभागवते दत्तं ज्ञात्वा सो भक्तवत्सलः १९ वासुदेवपरं दृष्ट्वा नरं वेदग्धकिल्बिषं। देवा अपि भीता
संयाति प्राणपत्ययथागतं। २० श्रूयतां हि यथावृत्तं विष्णुभक्तस्य वैभवं। दृष्ट्वा यमोपि वै भक्तं वैष्ण
पु·सं· वं दग्धकिल्बिषं २१ उत्थाय प्रांजलिर्भूत्वा ननाम आहसादरं। तस्मात्संपूजयेद्भक्त्या वैष्णवान्वि
४६ ष्णुवन्नरः २२ स याति विष्णुसान्निध्यं नात्र कार्या विचारणा। गारुडे॥ येन सर्वात्मना विष्णौ भ
क्त्या भावो निवेशितः। विप्रेभ्यश्च कृतात्मत्वात् महाभागवतो हि सः २३ स्मृतः संभाषितो वापि पूजि
तो वा द्विजोत्तमाः पुनाति भगवद्भक्तः श्वपचोपि यदृच्छया २४ सत्रयाजिसहस्रेभ्यः सर्ववेदांतपा
रगः सर्ववेदांतवित्कोट्या विष्णुभक्तो विशिष्यते २५ वैष्णवानां सहस्रेभ्यः एकांत्येको विशिष्यते राम
एकांतिनः सुपुरुषा गच्छंति परमं पदं २६ एकांत्येन सदा विष्णुर्येषां स दा परायणः। तस्मादेकां ४६
तिनः प्रोक्तास्तद्भावितचेतसः २७ प्रियाणामपि सर्वेषां देवदेवस्य सुप्रियः। आपत्स्वपि सदा य

सत्संगमः सुरसरिज्जलसंनिवासः श्रीकांतकांतचरणद्वयसंप्रयोगः । अत्र ऊासतां प्राणतिरत्र तदेव देवसारं
रामरपदप्राणतिर्न्नचान्यत २ पाद्मे मुनीनां वाक्यं व्यासं प्रति । पूर्वजन्मकृतं पुण्यं फलवत्कालयोग
तः । अन्यथा महतां सम्यग्दर्शनं स्पर्शनं कुतः ३ बृहन्नैवर्त्ते ॥ इदं सर्वं स्नाध्यातं दिदमति पुण्यं विमलं
विवेकाख्यं चक्षुः सकलनिगमोक्तं व्रतमिदं ४ प्रतिज्ञातं कार्यं हरिचरणसेवानवरतं विधेयं सत्संगाद्दि
दमपि भवेद्यात्समुदितं ४ तत्रैव पुण्यकीर्तिराज्ञा गंगासंवादे । गंगावुवाच । विष्णुप्रियाः शिवरताः वेदवेद
र्थरूपकाः भक्ता मुक्तिप्रदाः शांता गुरवः परिकीर्तिताः ५ भक्ताः पापहराः समस्तजगतां भक्ताः परं साधवो भ
क्ताः पवपुनंतितीर्थं तनवो भक्ताः सुरत्नामयि । भक्तेष्वेव सुनिश्चिता परतराः संसिद्धयो भूरिशः ॥ भक्ता
नां न च संत्यजेत्स्वमनसो भक्तेषु विष्णुः स्थितः ६ सत्संगात्स्रवणं विष्णोः काश्यां वासः शिवार्चनं ।
भवत्येव सतां संगात्सत्संगः सेवधिर्नृणां इति ७ लिंगे च मार्कंडेयांबरीषसंवादे ॥ श्रणु राजन्यथा
न्यायं यन्मां त्वं परिपृच्छसि । यत्रास्ति विष्णुभक्तास्तु तत्र नारायणः स्थितः ८ विष्णुरेव हि येषां वै दे
वस्ते वै साधवः स्मृताः । कीर्तयेत्तु हरेर्नित्यं रोमांचो यस्य जायते ९ कंपस्वेदस्तथास्नेपु दृश्यंते जलविंद
वः । विष्णुभक्तिसमायुक्ता श्रौतस्मार्तप्रवर्त्तकाः १० प्रीता भवति दृष्ट्वा वै वैष्णवाः सा प्रकीर्तितः । विष्णु
भक्ता महाभागां तं योद्दष्ट्वा सुमुखं प्रियः ११ प्रणामादिकरोत्येवं वासुदेवाय यामतया । स वै विष्णुर्यज्ञे
यः स पुनाति जगत्त्रयं १२ स्कंदाह्वराणे एवं न्वेतया भागवतेर तः प्रणामं पूर्वं ज्ञात्वा यो वदेद्वैष्णवो

काशी प्र
तत्व
प्रकाशे
पत्रा
सा का
श्री ॥८

बृ० यस्यैव तद्भक्तापरमो गुरुः ४२ हरिभक्तिपरो यत्र तत्र ब्रह्मा हरिः शिवः तत्र देवाश्च सिद्धाश्च नित्यं तिष्ठंति
सत्तमाः ४३ हरिस्तेषां महाभागा हृदये शांतचेतसां। हरिः नामपराणां च किमुत ध्यानरतात्मनां ४४ इह
नारदीये भगवद्वाक्यं। लक्षणं भागवतानां च शृणुष्व मुनिसत्तम वक्तुं तेषां प्रभावं तु शक्यते नाब्दकोटिभिः
45 ४५ ये हिता सर्वजंतूनां गतासूया विमत्सराः वशिनो निःस्पृहाः शांतास्ते वै भागवतोत्तमाः ४६ कर्मणा मनसा
वाचा परपीडां न कुर्वते। अपरिग्रहशीलास्ते ते वै भागवतोत्तमाः ४७ मातापित्रोश्च शुश्रूषां कुर्वते ये नरोत्त
माः गंगां विश्वेश्वर धिया ते वै भागवतोत्तमाः ४८ ये तु देवार्चनरता ये च तत्साधका नराः पूजां दृष्ट्वानुमोदं
बृं०सं० ते ते वै भागवताः स्मृताः ४९ सर्वेषां हितवाक्यानि ये वदंति नरोत्तमाः ये गां ब्राह्मणशुश्रूषां कुर्वंति सततं नराः
४७ ५० तीर्थयात्रापरा ये च ते वै भागवतोत्तमाः। अन्येषामुदयं दृष्ट्वा आनंदं यांति मानवाः ५१ हरिनामपरा ये
च ते०। आरामारोपणरतास्तडागपरिरक्षकाः। कासारकूपकर्त्तारस्ते० ५२ ये वै तडागकर्त्तारो देवसद्मानि
47 कुर्वते गायत्रीनिरता ये च ते वै० ५३ ये भिनंदंति नामानि हरेः श्रुत्वाति हर्षिताः। रोमांचशरीराश्च ते वै०
५४ तुलसीकाननं दृष्ट्वा ये नमस्कुर्वते नराः तत्काष्ठांकितकर्णा ये ते वै० ५५ तुलसीगंधमाघ्राय संतो
षं कुर्वते तु ये। तन्मूलमृत्तिकापुंड्रं ते वै० ५६ स्वाश्रमाचारनिरतास्तथैवातिथिपूजकाः। ये च वेदार्थव राम
क्तारस्ते वै० ५७ धर्मशास्त्रप्रवक्तारः सत्यवाक्यरताश्च ये सतां शुश्रूषवो ये च ते० ५८ व्याकुर्वंति पु ४७
राणानि तानि श्रृण्वंति ये तथा। तद्वक्तरि च भक्ता ये ते० ५९ शिवप्रिया शिवासक्ताः शिवपादार्चने रताः।

स्य भक्तिरव्यभिचारिणी। २५ विप हेतिषेधः। अंतर्गतोपि देवानां सर्वशास्त्रार्थवेद्यपि न सर्वेभ्यूरेभ
क्तस्तं विद्यात्पुरुषाधमं २९ पुनर्विधिः। नाधीते वेदशास्त्राणि न कृताध्वरसत्यपि। यो भक्तिं वहते वि
ष्णोस्तेन सर्वं कृतं भवेत् ३० यः कश्चिद्वैष्णवो लोके मिथ्याचारोप्यनाश्रमी। पुनाति सकलाँल्लोकान्स
हस्रांशोरिवोदितः ३१ येन शीघ्रा दुरात्मानः पापाचाररतास्तथा तेपि यांति परं स्थानं नारायणपरा
यणाः ३२ आस्फोटयंति पितरः प्रनृत्यंति पितामहाः। वैष्णवोस्मत्कुले जातः स नः संतारयिष्यति ३३
विष्णुधर्मोत्तरे रुद्रवाक्यं। भक्ता नारायणे ये च दुर्गाण्यतितरंति ते भक्तानां केशवे राम न भयं विद्य
ते क्वचित् ३४ तथा च गीतः। श्लोकोयं यमेन शृणु भार्गव। पृथ्वी च तस्करभुजंगहुताशहिंस्रैर्दुःख
दुष्टगतमृत्युभयत्र जातं। सं विद्यते न हि भयं भुवनेकभर्तुर्भक्ताश्रये मधुरिपोर्मनुजेषु तेषु ३५।
वाराहे गरुडवाक्यं। ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि चेतरः। विष्णुभक्तिसमायुक्तः ज्ञेयः सर्वो
त्तमोत्तमः ३६ शंखचक्रांकिततनुः। शिरसा मंजरीधरः। गोपीचंदनलिप्तांगो दृष्टश्चेद् दघं कुतः ३७
वृहन्नारदीये। ज्ञानाज्ञानकृतं पापं यच्चान्यत्कारितं परैः। तत्सर्वं नाशयत्याशु परिचर्या महात्मनां ३८
सत्संगतिः परां मुक्तिं ददाति हि नृणां सदा। इहामुत्र च विप्रेंद्राः संतः पूज्यतमास्ततः ३९ पुराणानि वद
न्त्यानि धर्मयुक्तानि पंडिताः संसारपाशविच्छेदकरणानि सउत्तमः ४० देवपूजार्हकर्माणि देवतापूजने
फलं यागोपायं च वदति स गुरुः परमः स्मृतः ४१ सर्ववेदार्थसाराणि पुराणानीति देवताः वदंति मुन

वै॰
५३

ते ७६ अनन्यमनसो भूत्वा मद्भक्तेषु नियोजयेत् । पाद्मे विपदेनिवे च ॥ अर्चयित्वा पि गोविंदं तदीयान्ना
र्चयेत्तु यः । न स भागवतो ज्ञेयः केवलं दाम्भिकः स्मृतः ७७ तस्मात्सर्वप्रयत्नेन वैष्णवान्पूजयेत्सदा । सर्वं त
रति दुःखौघं महाभागवतार्चनात् । ७८ वैष्णवानां व्रतानि वाराहे । भावसाध्योऽस्म्यहं देवि न वित्तेन जपैरहं ।
साध्यस्तथापि भक्तानां कायक्लेशैर्वदामि ते ७९ कर्मणा मनसा वाचा मद्व्रतो यो नरो भवेत् । तस्य व्रतानि
वक्ष्यामि विविधानि निबोध मे ८० अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्मषं । एतानि मानसान्याहुर्व्रतानि
ऽभिधास्यामि
तु धरो धरे ८१ एकभुक्तं तथा नक्तमुपवासादिकं च यत् । तत्सर्वं कायिकं पुंसां व्रतं भवति नान्यथा ८२ पा
द्मे भागवतानां लक्षणानि ॥ अर्चनं मंत्रपठनं यागयोगो महात्मनः । नामसंकीर्तनं सेवा तच्चिह्नैरंकनं
पु॰ सं॰ तथा । ८३ तदीयाराधनं प्रह्लाद नवधा भक्तिभिद्यते । तापादिपंचसंस्कारी नवेज्याकर्मकारकः ८४ तापः
४८ पुंड्रं तथा नाम मंत्रो यागश्च पंचमः । अमी च पंच संस्काराः पारमैकान्त्यहेतवः ८५ अर्थपंचकविद्विप्रो
महाभागवतः स्मृतः । नवकर्मविधाने ज्या कर्तव्या तस्य नित्यशः ८६ अर्चनं मंत्रपठनं तदीयानां च पूज
नं । तच्चिह्नैरंकनं सेवा वंदनं नामकीर्तनं ८७ सप्तकर्मविधाने ज्या क्षत्रियस्य विधीयते । तच्चिह्नैरंकनं
सेवा तदीयानां च पूजनं ८८ मंत्ररत्नस्य पठनं नामसंकीर्तनं हरेः । वंदनं च विशां प्रोक्तं षट्कर्मज्या विधान
तः ८९ तच्चिह्नैरंकनं सेवा वंदनं कीर्तनं तथा । अर्चनं च तदीयानां पंचेज्या शूद्रजन्मनः । ९० साधारणं राम
हि सर्वेषां समानेज्या नृणां प्रिये ॥ पाद्मे ३० मद्यपानरता ये च स्त्रीद्विजबालघातकाः । अगम्यागामका ४८
ये वै दृश्यंते भुवि मानवाः । ९१ भक्तानां दर्शनादेव मुक्तिस्तेषां न संशयः ॥ वाराहे । तस्य यज्ञवराहस्य वि

त्रिपुंड्रधारिणो ये च ते० ६० व्याहरंति च नामानि शंभोश्च परमात्मनः रुद्राक्षालंकृता ये च ते० ६१ ये यजंति
महादेवं क्रतुभिर्बहुदक्षिणैः। हरिं वा परया भक्त्या ते वै० ६२ शिवे च परमेशाने विष्णौ च परमात्मनि। सम
बुध्या प्रवर्त्तंते ते० ६३ विदितानि च शास्त्राणि परार्थं प्रवदंति ये सर्वत्र गुणभाजो ये ते० ६४ पानीयदा
ननिरता येन्नदानरतास्तथा। एकादशीव्रतपरास्ते० ६५ गोदाननिरता ये च कन्यादानरताश्च ये। मदर्थं
कर्मकर्त्तारस्ते० ६६ मन्मानसाश्च मद्भक्ता मद्भक्तजनलोलुपाः। मत्कथाश्रवणासक्तास्ते० ॥६७॥ बहुनात्र
किमुक्तेन संक्षेपात्तेब्रवीम्यहं। सद्गुणाय न प्रवर्त्तंते ते० ॥६८॥ पंच मेघ ह्रादः॥ मागारदारात्मजवित्तबंधुषु सं
गो यदि स्याद्भगवत्प्रियेषु नः। यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेंद्रियप्रियः ६९
यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं। हरत्यजोंतः श्रुतिभिर्गतोंगजं को वै न सेवेत
मुकुंदविक्रमं ७० नारदीये विष्णुदूतवाक्यं॥ महापातकयुक्तो वा युक्तो वा सर्वपातकैः। ईक्षितो भगव
द्भक्तैर्लभते परमां गतिं ७१ यतीनां विष्णुभक्तानां परिचर्यापरायणैः। ईक्षिता गच्छंति पापिनोपि परां अपि
गतिं। ७२ वाराहे। सोमशर्मणः मायादर्शनांतरं क्लिश्यमानं प्रति भगवद्वाक्यं। पुनरन्यत्प्रवक्ष्यामि तच्छृ
णोहि द्विजोत्तम। तस्य चैवापराधेन स्वयं कृत्वा भवांतरे ७३ शुद्धा भागवता विप्र मद्भक्ता नामि वंदिताः।
तस्यैवापराधस्य फलं प्राप्तं ततो द्विज ७४ सर्वथा वंदनीया वै भक्ता भागवताः शुभाः येतान्वंदंति विप्रें
द्र भक्ता भागवतान्मम ७५ वंदितास्मीह विप्रेंद्र सत्यमेतन्न संशयः। यो मामृच्छति वै गंतुं यस्य वान च विद्य

वै० मुक्त्वा भोगांश्चानेकशः। एकविंशतिकुलैः सार्द्धं विष्णुलोके समोदते १०५ शंखचक्रांकितो यो वै स वै वैष्णव
उच्यते कंठे मालां धृता येन तुलसीनामं च उच्चरन् १०६ गानं कुर्वन्सदा भक्त्या स नरो वैष्णवः स्मृतः। तेषां निंद
स्तु कुर्वंति ये नरा पापकारिणः। ते मृता कुंभयोनिं वै गच्छंति च पुनः पुनः १०७॥ पार्वत्युवाच॥ के दासा वैष्णवा
के च वै भक्तास्तु विकीर्तिताः। तेषां लक्षणं ब्रूहि याथार्थ्यं वै महेश्वरः॥१०८॥ महादेव उवाच॥ शूद्रा भवंति वै
४१ दासाः वैष्णवा नारदादयः। प्रह्लादांबरीषाद्या भक्तास्ते नगनंदिनि १०९ ब्रह्मक्रियारतो नित्यं वेदवेदांगपा
ठकः। शंखचक्रांकितो यस्तु स वै वैष्णव उच्यते ११० द्विजसेवारतो नित्यं नित्यं विष्णुप्रपूजकः। शृणोति व
कुधा चैव पुराणं वेदसंमितं। १११ स शूद्रो हरिदासस्तु इत्युक्तो नगनंदिनि पंचवर्षत्वमाश्रित्य कृता भक्तिः
पु०सं० स्त्वनेकधा ११२ स वै भक्त इति प्रोक्तः सर्वसाधुषु संमतः। ध्रुवादयस्ते विज्ञेयो अंबरीषाद्यास्तथैव पुनः। ११३
४९ भक्त्या त्वनुनिमित्तस्य सर्वकालेषु भामिनि। कलौ धन्यतमा शूद्रा विष्णुध्यानपरायणाः ११४ इह लो
के सुखं भुक्त्वा याति विष्णोः सनातने। शंखचक्रांकितो यस्तु विष्णुभक्तिप्रकारकः॥११५॥ चतुर्विंशन्म
वा हात्मवानां कथैव विशेषतः। स शूद्रो विष्णुदासस्तु पाखंडः कृते मया॥११६॥ पार्वत्युवाच॥ वैष्णव
जनमालोकयनाम्नु स्थानं करोति यः। प्राप्याद्रतो विप्रसनरो नरकातिथिः॥११७ हरिवासरभक्तानाम च्यु त्यजति
ताच्युतभाषिणां। नाहं शास्त्राविशेषेण तेभ्यो विप्रविभेम्यहं।११८ अपाकरोति दुरितं श्रेयः संयोजयं राम
त्यपि यशो विस्तारयत्याशु नूनं वैष्णवसंगतिः ११९। रसायनशशीजाता परमानंददायिनी नानंदय ४९
ति केनाम वैष्णवाश्रित चंद्रिकाः १२० ये शूद्रा भुवि सच्चिदानंदनिरता पापाद्दूरंगताः। ते विष्णुजना

स्मारमितौजसः। प्रणामं ये प्रकुर्वंति ते पूज्याः सततं सुरैः ९२ तस्मात्त्वं नियतैर्भाव्यं वैष्णवैर्मार्गितां पदं। इल्ली
मं वैष्णवत्वं हि त्रिषु लोकेषु सुंदरि ९३ जन्मांतरसहस्रेण समाराध्य वृषध्वजं। वैष्णवत्वं लभेत्कश्चित्स
र्वपापक्षयं विना ९४ ज्ञानमन्विच्छता रुद्रं पूजयेत्परमेश्वरं। मोक्षमाराध्य संयाति तद्धि ज्ञाः परमं पदं ९५
वैष्णवा हि महाभागे पुनंति सकलं जगत् संस्मृतः कीर्त्तितो वापि दृष्टः स्पृष्टोपि वा प्रिये। पुनाति भग
वद्भक्तश्चांडालोपि यदृच्छया ९६ एतज्ज्ञात्वा तु विद्वांसः पूजनीयो जनार्दनः। वेदोक्तविधिना भद्रे आ
गमोक्तेन वा सुधीः ९७ ततो यमवाक्यं॥ अतो वै यत्नेन भाव्यं वैष्णवेन विपश्चिता॥ ये वैष्णवा महात्मानो
विष्णुपूजनतत्पराः तेषां नैवास्य ये लोका यांति तत्परमं पदं॥९८॥ पाद्मे च॥ तीर्थफलति कालेन सद्यः
संगः सतां खलु अतः सत्संगतिं सुभ्रु प्रशंसंति मनीषिणः॥९९॥ नारदीये॥ महाभाग्योदयेर्विश्वसा
धूनां संगतिर्भवेत् गंगादिसर्वतीर्थेषु यो नरः स्नाति सर्वदा। यः करोति सतां संगः स्तयोः सत्संगमो व १००
रः १०० दधीचिना पुरा गीतं श्लोकोयं श्रूयते भुवि। सर्वधर्ममयः सारः सर्वधर्मेषु संमतः १०१ परोप
कारः कर्त्तव्यः कंठैः प्राणगतैरपि। परोपकारजं पुण्यं न स्यात्क्रतुशतैरपि १०२ पाद्मे स्मृतः संभाषि
तो वापि पूजितो वा द्विजोत्तम पुनाति भगवद्भक्तश्चांडालोपि यदृच्छया १०३ मुखे चोच्चारयन्ना ४९
म हृदये ध्यानतत्परः। शंखचक्रधरो बिह्वान्मालां वै तुलसिजां दधन् १०४ जीवन्मुक्तः स विज्ञेयो

वै०

नां। अपगतमदमानमत्सराणां व्रजभटदूरतरेणमानवानां १३३ हृदियदिभगवाननादिरास्तेहरिर

सिशंखगदाधरोव्ययात्मा। तदघमघविघातकर्तृभिन्नं भवति कथं सति चांधकारमर्के १३४ सकल

मिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः। इति मतिरमला भवत्यनंते हृदयगते व्रजतान्विहाय

दूरात् १३५ कमलनयनवासुदेवविष्णोधरणीधराच्युतशंखचक्रपाणे। भवशरणमितीरयंतिये वै

50 त्यज भटदूरतरेण तानपापान्॥१३६॥ वसति मनसि यस्य सोव्ययात्मा पुरुषवरस्य न तस्य दृष्टिपाते।

तव गतिरथवा ममास्ति चक्रप्रतिहतवीर्यबलस्य सोन्यलोक्यः॥१३७॥ पाद्मे उत्तरखंडे ब्रह्मवाक्यं।

शृणु नारद वक्ष्यामि साधुमहात्म्यमुत्तमं यच्छ्रुत्वा मुच्यते जंतुर्ब्रह्महत्यादिपातकात् १३८ तेषां वै ल

पु॰सं॰ क्षणं यादृक्स्वरूपं यादृशं भवेत्। तादृशं मुनिशार्दूल शृणुष्व मुनिसत्तम १३९ विष्णोरयं यतो ह्या

५० सीत्तस्माद्वैष्णव उच्यते। क्षमादयातपः सत्य येषां वैतिष्ठते सदा। १४० तेषां दर्शनमात्रेण पापं या

ति सत्तूलवत्। हिंसाधर्माद्विनिर्मुक्तः सदा विष्णोस्थितामतिः १४१ शंखचक्रगदापद्मं नित्यं धारये

ति यः तुलसीकाष्ठजां मालां कंठे वै धारयेत्ततः १४२ तिलकानि द्वादशान्येव नित्यं वै धारयेद्बु

धः। धर्माधर्मंतु जानाति स वै वैष्णव उच्यते १४३ वेदशास्त्रपरो नित्यं नित्यं वै यज्ञपाचकः। उत्सवां

श्च चतुर्विंशत्कुर्वीति च पुनः पुनः १४४ तेषां कुले धन्यतमं तेषां वै यश एव च। येषां कुले धन्यतमा राम

७ जाता भागवतानराः १४५ एक एव कुले यस्य जातो भागवतो नरः। तत्कुलं धन्यं तारितं तेन मे योपि वाड ५०

व १४६ अंडजा उद्भिजाश्चैव ये जनानन्ययोनयः ते तु सर्वे विजानीमः शंखचक्रगदाधरः॥१४७

सदैवकुल्लीभंतराह्यस्मिन्कलौसांप्रतं ॥१२१॥ पा॰ खं॰ । पातालखंडेकुंडलाविकुंडलौप्रतिदूतानांवाक्यं ।
तेषांमध्येतुभक्तोयःशिवाख्योवाथवैष्णवः येनकृत्वाविशेषेणमुक्तिभागीभवेन्नरः १२ विष्णुभक्ता
वैष्णवायेशिवभक्तिरताश्चये । ३ भौतोपुण्यकर्मीतौयत्रयत्रहिगच्छतः २३ अतएवकुपूज्यास्तेय
स्माल्लोकेजगत्त्रये तत्संगतिर्विशेषेणमहापातकनाशिनी १२४ विश्रांतोग्रहिणोगेहेसत्व
जन स्त्वाब्रह्मवादिनः । आजन्मसंचितंपापंनाशयंतिह्यणेनवै १२५ संचितंयद्गृहस्थेनपापमामरणांति
कं । निर्दहिष्यतितत्सर्वंएकरात्रोषितोयदि । १२६ वैष्णवेभक्त्येःप्रमानंतरंयमः । नचलतिनिजधर्मवाणि
तोयःसममतिरात्मसुहृद्विपक्षपक्षे । नहरतिनचहंतिकिंचिदुच्चैस्थितमनसंतमवेहिविष्णुभक्तं १२७
कलिकलुषमलेनयस्यनात्माविमलमतेर्मलनीकृतोस्तमोहः । मनसिकृतजनार्दनंमनुष्यंसतत
मवेहिहरेरतीवभक्तं । १२८ कनकमपिरहस्यमवेक्ष्यबुध्यातृणमिवयःसमवैतिवैपरस्वं । भवतिचभ
गवत्यनन्यचेताःपुरुषवरंतमवेहिविष्णुभक्तं १२९ स्फटिकगिरिशिलामलःकविष्णुःमनसिनृणां
श्रीप कचमत्सरादिदोषः । नहितुहिनमयूखरश्मिपुंजेभवतिहुताशनदीप्तिजःप्रतापः १३० विमलमतिर चंद्र
मत्सरःप्रशांतःसुचिरखरोखिलसत्वमित्रभूतः । प्रियहितवचनोस्तमानमायोवसतिसदाहृदितस्यवा
सुदेवः १३१ वसतिहृदिसनातनेचतस्मिन्भवतिपुमाञ्जगतोस्यसौम्यरूपः । क्षितिरसमतिरम्यमात्मनोंतः
तःकथयतिचारुतयैवशालपोतः १३२ यमनियमविधूतकल्मषानामनुदिनमच्युतसक्तमानसा

वै॰ सर्वाणि महा
उपपातकानि सर्वाणि महापातकानि च। तानि सर्वाणि नश्यंति वैष्णवानां च दर्शनात् ॥१६२॥ पावका
इव दीप्यंते ये नरा वैष्णवा भुवि। विमुक्ताः सर्वपापेभ्यो मेघेभ्य इव चंद्रमाः॥१६३॥ आर्द्रं शुष्कं लघु स्थूलं वाङ्म
नःकर्मभिः कृतं। तत्सर्वं नाशमायाति दर्शनाद्वैष्णवस्य च। १६४ निःपापास्ते दिवं यांति पापिष्ठा यांति शुद्ध
तां। दर्शनाद्देवसाधूनां मयोक्तं नगनंदिनि १६५ संसारकर्दमालेपप्रक्षालनविशारदः। पावनः पावनानां
51 च विष्णुभक्तो न संशयः १६६ प्रातरुत्थाय हे विष्णुभक्तो यः स्मरति मधुसूदनं। तं तु विष्णुमया ज्ञेया विष्णुस्तेव न संशयः
१६७ नवनीलघनश्यामं नलिनायतलोचनं। शंखचक्रगदापद्मधरं पीतांबरावृतं॥१६८॥ किरीटिणं महाहे
णवलयांगदनूपुरैः। प्रसन्नवदनांभोजं चतुर्बाहुं श्रियान्वितं १६९ एवं ध्यायंति विप्रा वै वैष्णवास्तु विपा वे
पु॰सं॰ ति ते विप्रा विष्णुरूपा वै वैष्णवास्ते न संशयः १७० तेषां दर्शनमात्रेण भक्त्या वा भोजनेन वा। पूजनेन तु देवि
५१ शिवे वैकुंठं भवते ध्रुवं॥१७१॥ वैष्णवानां शिवनिंदानिषेधः पाद्मे यमदूतवाक्येनोक्तः॥ वैष्णवः पुरुषो वैश्यशि
वनिंदां करोति यः॥ न विंदेद्वैष्णवं लोकं स याति नरकं ध्रुवं॥१७२॥ स्कांदे सह्याद्रिखंडे पिंगलप्रश्नः तवक
आश्रमः तत्र दत्तवाक्येन वैष्णवपरमहंसानां पंचमाश्रमत्वेनोक्तं तस्माद्वैष्णवानामनाश्रमसंदेहापनो
दः॥ तत्र॥ सत्यमेतत्श्रुतिश्रेष्ठ एषे च त्वारस्तु ये उदिताः॥ आश्रमास्तेभ्य एवायं पंचमो हि महाश्रमः॥१७३॥
अभिन्नमात्मना रूपं जगदेतच्चराचरं। अविकल्पेन यः पश्येत्तस्यायं पंचमाश्रमः॥१७४॥ यः क्रोधादी
नरीन्हित्वा सर्वहंसभूतेषु संस्थितः॥ वैराग्याश्रितवेत्तास्तु तस्यायं पंचमाश्रमः॥१७५॥ तत्रैव दत्तदर्शनानंतरं वु राम
लवाक्यं॥ दुर्लभं विष्णुभक्तस्य दर्शनं तव दुर्लभं॥ तच्चलब्धं हृदये देव किमन्यत्प्रार्थयाम्यहं॥१७६॥ दृष्टोसि जग ५१
तां नाथ कृतार्थो दर्शनेन ते। कृतकृत्याव यदेव दत्तात्रेयस्य दर्शनात्॥१७७॥ कूर्मपुराणे सर्वकर्माणि से

यस्यस्पर्शनमात्रेणब्रह्महासुध्यतेसदा किंतुवक्ष्यामिदेवर्षेएतेधन्यतमास्मृताः १४८ वैष्णवायेत
दृश्यंतेभुवनेस्मिन्महामुने तेवैविष्णुस्वरूपाश्चज्ञातव्यास्तत्वकोविदैः १४९ कलौधन्यतमालोके
स्मृतामेनात्रसंशयः। विष्णोपूजाकृतातेनसर्वेषांपूजनंकृतं १५० महादानंकृतंतेनपूजितायेनवैष्ण
वाः। फलंपत्रंतथाशाकंअन्नंवस्त्रमेवच। १५१ वैष्णवेभ्यःप्रयच्छंतितेधन्यास्तुविसर्वदाः येरचि
ताविष्णुजनःतेवैधन्यतमामताः १५२ तेषांदर्शनमात्रेणमुच्यतेपापवान्नरः किमन्यद्बहुनोक्तेन
मेमूयोमन्यस्वबाडव १५३ अतोवैदर्शनंतेषांस्पर्शनंसुखदायकं। यथाविष्णुस्तथाचायंनांतरंव
र्ततेक्वचित् १५४ इतिज्ञात्वातुभोवत्ससर्वदापूजयेद्बुधः। एकएवतुविप्रोवैवैष्णवोभुविभुंजते।
सहस्रभोज्यसमंपुण्यंभवतिनात्रशंशयः १५५ पाद्मेमाघमहात्म्येयमदूतवाक्यं। विष्णुभक्त
स्ययेदासावैष्णवान्नभुजश्चये। तेपिकृतुभुजांवैश्यगतिंयांतिनिराकुलाः १५६ प्रार्थयेद्वैष्णवस्यान्नं
प्रयत्नेनविचक्षणः। सर्वपापविशुद्ध्यर्थंतदभावेजलंपिबेत्। १५७ शंखचक्रांकितांगाःस्युस्तुलसीमालाधा
रिणोनमालिनः। वसंतिवैष्णवेलोकेविष्णुरूपेणतेनराः १५८ हृदिसूर्ये जलेचाग्नौप्रतिमास्थंडिलेषुच।
समभ्यर्च्यहरिंयांतिनरास्तेवैष्णवंपदं॥१५९॥अथवासर्वदापूज्योवासुदेवोमुमुक्षुभिः।पादोदकंहरे
पीत्वाभुक्त्वानैवेद्यमुत्तमं॥१६०॥निमील्यंमूर्ध्निधृत्वाचसयातिपरमांगतिं॥अत्रलक्षणमाभीरा
फलप्रतिपादकानिविशेषणानिबोधव्यानि॥१६१॥पाद्मेउत्तरखंडेपार्वतीरुद्रसंवादेतुरुद्रवाक्यं ५१

वै.

प्यासि दिवौकसां । सर्वभूतेषु गोविंदं परिपश्यन्विशांपते १९१ यो वेदपुरुषो विष्णुर्यो यज्ञपुरुषो हरिः
यो ऽतरात्मास्य जगतः कर्त्ता हर्त्ताविता विभुः । १९२ तन्मयं पश्यतो विश्वं तव भूपालसत्तम । दर्शनं प्राप्य
शुभदं शुचित्वमगमं परं । १९३ एक एव हि सारोऽत्र संसारे क्षणभंगुरे । कमलाकांतपादाब्ज भक्तिर्भावो विरि
लप्रदः १९४ परित्यज्याहि यः सर्वं विष्णुपादं सदा व्रजेत । सुमेधसं भजं त्येनं पदार्थाः सर्व एव हि ॥१९५॥ हृ
षीकेशं हृषीकाणि यस्य स्थैर्यं गतान्यहो । स एव स्थैर्यमाप्नोति ब्रह्मांडे ऽतीव चंचले ॥१९६॥ यौवनं धनमा
ऊ युष्यं पद्मनीदुलबिंदुवत् । अतीव चपलं ज्ञात्वा च्युतमेकं समाश्रयेत् ॥१९७॥ वाचि चेतसि कर्त्तव्ये यस्य
पु.स. देवो जनार्द्दनः । स एव सर्वदा वंद्यो नररूपो जनार्द्दनः ॥१९८॥ विशालोरस्कसततप्रलंबत्कलसीस्वजं । शं
५२ खचक्रांकशुभगभुजद्वयविराजितं ॥१९९॥ प्रथमे सूतवाक्यं । शुश्रूषोः श्रद्दधानस्य वासुदेवकथारु
चिः । स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥२००॥ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया भ
गवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥२०१॥ प्रथमे विदुरं प्रति युधिष्ठिरवाक्यं ॥ भवद्विधा भागवतास्ती
र्थभूता स्वयं विभो तीर्थीकुर्वंति तीर्थानि स्वांतस्थेन गदाभृता ॥२०२॥ सूतं प्रति शौनकवाक्यं ॥ तुलयाम
लवेनापि न स्वर्गं नापुनर्भवं । भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥२०३॥ सूतवाक्यं । अहो रा.म
वयं जन्मभृतो द्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः । दौःकुल्यमाधिं विधुनोति शीघ्रं महत्तमानां ५२
मभिधानयोगः २०४ कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य योऽनंतशक्तिर्भगवान्

न्यस्यसमाधिवलमाश्रितः॥ यत्रास्तेनिश्चलोयोगीससन्यासीचपंचमः॥१७५॥ नारदपंचरात्रे॥ पद्मसंहितायां॥
संकीर्त्तयेत्स्मरेद्वापिवासुदेवंसनातनं। अनेनविधिनायस्तुदीक्षितश्चक्रमंडले १७९ ब्राह्मणोवेदविद्वांसःसर्व-
माश्रमिणांवरः। उच्यतेनाममिश्रैस्तैर्नीवज्येयःप्राकृतोयथा १८० सूरिःसुहृद्भागवतःसात्वतःपंचकालवित्
एकांतिकस्तन्मयश्चपंचरात्रिकइत्यपि १८१ ज्ञानादिगुणसंघातोभगोयत्रसउच्यते॥ भगवद्भक्तिरस्यास्ति
सभगवतउच्यते॥१८२॥स्कांदेकाशीखंडेध्रुवंप्रतिपुलस्त्यवाक्यं। चापचक्रांकितोयस्यनान्यकर्मकरो
करोनत्यप्रतिरमाकांतनामधेयसुधारसं॥१८३॥ रसयंतोचरसनातस्यान्यस्तनिस्पृहा। स्कांदेनागरखंडे॥
सकृत्तंमनसिध्यात्वायैर्न्नरैःपूजितोहरिः॥ आस्तांतेषांवरारोहेदर्शनंस्पर्शनंतथा॥ स्मरणादपिमुच्यंत
नरापापैःपुराकृतैः॥१८४ पेचरात्रेपाद्मसंहितायां॥ अकृत्यमपिकुर्वाणोमुंज्ञानोवायतस्ततःपापैर्नलि-
प्यतेदेहीचक्राद्यायुधलंछितः १८५ हव्यंकव्यंचदातव्यंतस्मैतद्दानमक्षयं स्कांदेकाशीखंडेध्रुवस्तुतौ॥
शंखचक्रांकिततनुःशिरसामंजरीधरः। गोपीचंदनलिप्तांगोसदृष्टश्चेदघंकुतः॥१८६॥ हरिनामाक्षरमु-
खंभालंगोपीमृदंकितं। तुलसीमालितोरस्कंस्पृशेयुर्नयमोद्भटाः॥१८७॥पाद्मेनारदंप्रतिउत्तरखंडेरुद्र-
वाक्यं॥ सर्वेविष्णुसमोज्ञेयोनात्रकार्याविचारणा। वैष्णवोब्राह्मणोयस्तुविष्णुध्यानेषुतत्परः १८८ नांतरस्त-
स्यवेज्ञेयःसर्वेविष्णुर्भवेदिह। शंखचक्रधरोविप्रोवेदाध्ययनतत्परः। सर्वेनारायणइतिदेवर्षिचेवपश्य-
ति॥१८९॥ मद्यपानरतायेचयेचस्त्रीबालघातकाः॥ अगम्यागमकार्येवेदृश्यंतेभुविवाडवा॥१९०॥ भक्तानांद-
र्शनादेवमुक्तिस्तेषांनसंशयः। स्कांदेकाशीखंडेक्षमित्रजितंप्रतिनारदवाक्यं॥ धन्योसिकृतकृत्योसिमान्यो

येषु कृतप्रसंगाः ॥२१९॥ षष्ठे रुद्रः पार्वतीं प्रति ॥ नारायणपराः सर्वे न कुतश्चन विभ्यति । स्वर्गापवर्गनरके-
वै ष्वपि तुल्यार्थदर्शिनः २२० तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु । महापुरुषभक्तेषु शांतेषु समद-
र्शिषु २२१ चतुर्थे पृथुः सनत्कुमारं प्रति अहो आचरितं किं मे मंगलं मंगलायनाः । यस्य वो दर्शनं ह्यासी-
द्दुर्दर्शनं च योगिभिः ॥२२२॥ किं तस्य दुर्लभतरमिह लोके परत्र च । यस्य विप्राः प्रसीदंति शिवो विष्णुश्च सा-
नुगः ॥२२३॥ नैव लक्ष्यते लोको लोकान्पर्यटतोपि यान् । यथा सर्वदृशं सर्व आत्मानं येस्य हेतवः ॥२२४॥
अधना अपि ते धन्याः साधवो गृहमेधिनः । यद्गृहा ह्यर्हवर्यांबुतृणभूमीश्वरा चराः ॥२२५॥ व्यालालयद्रु-
सो मा वै तेऽरिक्ताखिलसंपदः । यद्गृहा तीर्थपादीयपादतीर्थविवर्जिताः ॥२२६॥ तत्र सनत्कुमारः ॥ संगमः
खलु साधूनामुभयेषां च संमतः । यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शं ॥२२७॥ चतुर्थे रुद्रगीते ॥ क्षणा-
पु०सं० र्द्धेनापि तुलये न स्वर्गं नापुनर्भवं । भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥२२८॥ अथानघांघ्रेस्तव की-
५३ र्त्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनां । भूतेष्वनुक्रोशसुसत्वशीलिनां स्यात्संगमोनुग्रह एष नस्तव
५६ ॥२२९॥ न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् । यद्भक्तियोगानुगृहीतमंजसा मुनिर्विच-
ष्टे ननु तत्र ते गतिं ॥२३०॥ प्रचेतसः भगवंतं प्रति । यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः । तावद्भवत्प्रसं-
गानां संगः स्यान्नो भवे भवे ॥२३१॥ यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः । निर्वैरं यत्र भूतेषु नोद्वेगो यत्र
कश्चन ॥२३२॥ यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः । प्रस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ॥ राम
॥२३३॥ तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया । भीतस्य किं न रोचेत तावकानां समागमः ॥२३४॥ सप्तमे ५३
प्रह्लादः ॥ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः । महीयसां पादरजोभिषेकं निःकिं-

नंतोमहद्गुणत्वाद्यमनंतमाहुः॥२०५॥परीक्षिद्वाक्यं॥येषांसंस्मरणात्पुंसांसद्यःशुद्ध्यंतिवैगृहाः।किंपुन
र्दर्शनस्पर्शपादशौचासनादिभिः॥२०६॥सांनिध्यात्तेमहायोगिन्पातकानिमहांत्यपि सद्योनश्यंतिवैपुंसां
विष्णोरिवसुरेतराः॥२०७॥तृतीयेविदुरवाक्यं।यत्सेवयाभगवतःकूटस्थस्यमधुद्विषः।रतिरासोभवेत्तीव्रः
पादयोर्व्यसनार्दनः॥२०८॥दुरापाह्यल्पतपसःसेवावैकुंठवर्त्मसु॥यत्रोपगीयतेनित्यंदेवदेवोजनार्दनः
॥२०९॥तृतीयेदेवहूतिवाक्यं॥संगोयःसंसृतेर्हेतुरसत्सुविहितोधिया॥सएवसाधुषुकृतोनिःसंगत्वायकल्प
ते॥२१०॥कपिलवाक्यं॥प्रसंगमजरंपाशमात्मनःकवयोविदुः।सएवसाधुषुकृतोमोक्षद्वारमपावृतं २११ ति
तिक्षवःकारुणिकाःसुहृदःसर्वदेहिनां।अजातशत्रवःशांताःसाधवःसाधुभूषणाः २१२ मय्यनन्येन
भावेनभक्तिंकुर्वंतियेदृढां।मत्कृतेत्यक्तकर्माणस्त्यक्तस्वजनबांधवाः २१३ मदाश्रयाःकथामृष्टाःशृ
ण्वंतिकथयंतिच।तपंतिविविधास्तापनैतान्मद्गतचेतसः॥२१४॥तएतेसाधवःसाध्विसर्वसंगविवर्जिताः।
संगस्तेष्वथतेप्रार्थ्यःसंगदोषहराहिते॥२१५॥सतांहिसंगान्ममवीर्यसंविदोभवंतिहृत्कर्णरसायनाःकथाः॥
तज्जोषणादाश्वपवर्गवर्त्मनिश्रद्धारतिर्भक्तिरनुक्रमिष्यति॥२१६॥चतुर्थेध्रुववाक्यं॥यानिर्वृतिस्तनुभृ
तांतवपादपद्मध्यानाद्भवज्जनकथाश्रवणेनवास्यात्।साब्रह्मणिस्वमहिमन्यपिनाथमाभूत्किंत्वं
तकासिलुलितात्पततांविमानात् २१७ भक्तिंमुहुःप्रवहतांत्वयिमेप्रसंगोभूयादनंतमहतामलाशया
नां।येनांजसोल्बणमुरुव्यसनंभवाब्धिंनेष्येभवद्गुणकथामृतपानमत्तः २१८ तेनस्मरंत्यतितरांप्रिय
मीशमर्त्यंयेचान्वदःसुतसुहृद्गृहवित्तदाराः।येत्वब्जनाभभवदीयपदारविंदसौगंध्यलुब्धहृद

त्वचैव्युपासते। अहं च भगवान्ब्रह्मा स्वयं च हरिरीश्वरः ॥२४९॥ दशमे कृष्णनिंदां शिशुपाले कुर्वति शुकः ॥ नि
वै दां भगवतः शृण्वंस्तत्परस्य जनस्य वा ॥ ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः २५० एकादशे हरिवा
क्यं ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः भूतानि भगवत्यात्मन्येष भागवतोत्तमः २५१ ईश्वरे तदधीनेषु
54 बालिशेषु द्विषत्सु च। प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः २५२ अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः २५३ गृहीत्वापींद्रियैरर्थान्यो न द्वेष्टि न हृष्यति। विष्णोर्मायामिदं
पश्यन्स वै भागवतोत्तमः २५४ देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः संसारधर्मैरविमु
ह्यमानः स्मृत्या हरेर्भागवतप्रधानः २५५ न कामकर्मबीजानां यस्य चेतसि संभवः। वासुदेवैकनिलयः
पु॰सं॰ स वै भागवतोत्तमः २५६ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः। सज्जतेस्मिन्नहंभावो देहे वै स हरेः प्रियः
५४ २५७ । न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा। सर्वभूतसमः शांतः स वै भागवतोत्तमः २५८ त्रिभुवनविभ
वहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्। न चलति भगवत्पदारविंदाल्लवनिमिषार्धमपि स वै
भगवाग्र्यः। २५९ भगवत उरुक्रमांघ्रिशाखानखमणिचंद्रिकया निरस्ततापे। हृदि कथमुपसीदतां पुनः स प्रभ
वति चंद्र इवोदितेर्कतापः २६० विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोप्यघौघनाशः प्रणयरसनया राम
धृतांघ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥२६१॥ भगवानुद्धवं प्रति। कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहि ५८
नां सत्यसारोनवद्यात्मा समः सर्वोपकारकः २६२ कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः। अनीहो मितभु
क्शांतः स्थिरो मच्छरणो मुनिः २६३ अप्रमत्तो गभीरात्मा धृतिमान्जितषड्गुणः। अमानी मानदः कल्यो मैत्रः
कारु

चनानंनवर्णितयावत॥२३५॥पंचमऋषभदेवः॥ महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसंगिसंगं।
महांतस्तेसमचित्ताप्रशांताविमन्यवःसुहृदःसाधवोये २३६ येवामयीशेकृतसौहृदार्थाजनेषुदेहं
भरवार्त्तिकेषु।गेहेषुजायात्मजरातिमत्सुनप्रीतियुक्तायावदर्थाश्चलोके २३७ ऋषभेगजसुतो॥ ए
कांतिनोयस्यनकंचनार्थंवांछंतियेवैभगवत्प्रपन्नाः। अत्यद्भुतंतच्चरितंसुमंगलंगायंतआनंदसमुद्र
मग्नाः॥२३८॥सप्तमेनृसिंहःप्रह्लादंप्रति॥यत्रयत्रचमद्भक्ताःप्रशांताःसमदर्शिनः।साधवःसमुदाचा
राःस्तेपूयंत्यपिकीकटाः २३९ सर्वात्मनानहिंसंतिभूतग्रामेषुकिंचन।उच्चावचेषुदैत्येंद्रमद्भावेनगत
स्पृहाः॥२४०॥नवमेभगवद्वाक्यं॥अहंभक्तपराधीनोह्यस्वतंत्रइवद्विज साधुभिर्ग्रस्तहृदयोभक्तैर्भक्त
जनप्रियः ४१ नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना।श्रियंचात्यंतिकींब्रह्मन्येषांगतिरहंपरा ४२
येदारागारपुत्राप्तान्प्राणान्वित्तमिमंपरं।हित्वामांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे २४३ मयिनिर्बद्धहृ
दयाःसाधवःसमदर्शनाः वशेकुर्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा २४४ मत्सेवयाप्रतीतंचसालोक्या
दिचतुष्टयं नेच्छंतिसेवयापूर्णाःकुतोन्यत्कालविप्लुतं॥२४५॥साधवोहृदयंमह्यंसाधूनांहृदयंत्वहं।मदन्यं ५४
तेनजानंतिनाहंतेभ्योमनागपि॥२४६॥नवमेगंगांप्रतिभागीरथवाक्यं॥साधवोन्यासिनःशांताःब्रह्मि
ष्ठालोकपावनाः॥हरंत्यघंतेंगसंगात्तेष्वास्तेह्यघभिद्धरिः॥२४७॥द्वादशेरुद्रःपार्वतींप्रति॥अथापिसंवदि
ष्यामोभवान्यैतेनसाधुना अयंहिपरमोलाभोनृणांसाधुसमागमः २४८ सलोकालोकपालांस्तान्वंदे

वै

निर्दह्य पुर्वैतूलराशिमिवानलः २८० तत एव निपद्यैव शिष्याः श्रीघ्रं पलायत॥ आगमस्य सं हितायांम्
तीर्थपर्यटनानंतरं सुतीक्ष्णाख्यमुनिं वक्ष्यामि स्वहृद्धाम यते पुनः भक्तस्य तव यत्नेन यतस्त्वं वैष्णवोत्तमः।
२८१ ये स्मरंति कथां विष्णोर्वदंति चरितं हरेः मुक्तकंठाश्च गायंति हरिं नृत्यंति सुस्वरं २८२ आनंदा
श्रुपरीतांगा गात्रेषु पुलकांचिताः आनंदनिर्भराश्चैव प्रस्खलंतः पदे पदे २८३ उच्चैः श्रीराम रामेति वदंति च
55 हसंति च। एवमादिगुणैर्युक्ताः मान्या राम समाहिते वैष्णवा मानवाः सर्वे मुक्तिदास्युः क्रमेण हि २८४ इति श्री
मत्पुराणसंग्रहे रत्नमिन वप्रकरणे श्रीमत्समस्तसाधनसारभूते वैष्णवमहात्म्यलक्षणानुगुणपुराणवाक्य
स्थलनिरूपणे चतुर्थपरिच्छेदः समाप्तः॥ मगळमस्तु मार्थे ४ अथ वैष्णवैः हरिनामनि सदा रतिः कार्या तस्यापि
वमहत्फलं जनकत्वेश्च वर्णास्सर्वपुराणेषु॥ तथाहि॥ बृहन्नारदीये यमवाक्यं दूतान्प्रति। ये विष्णुभक्तिनिरताः
पु.स. प्रयतात्मतज्ञाः एकादशीव्रतपरा विजितेंद्रियाश्च नारायणाच्युत जनार्दन कृष्णविष्णो पद्मेशपद्मजपितः शि
५५ वाशंकरेति। नित्यं वदंत्यखिललोकहिताः प्रशांताः दूराद्भटास्त्यजत तत्र न मेऽस्ति शिक्षा २ नारायणार्पितक्रि
यान्हरिभक्तिमक्तांस्त्वाचारमार्गनिरतान्गुरुसेवकांश्च सत्पात्रदाननिरतान्हरिकीर्तिभक्तान्दूतास्त्यजध्व
मनिशं हरिनामसक्तान्। ३ नारायण जगन्नाथ वासुदेव जनार्दन। इतीरयंति नित्यं ये ते वै सर्वत्र वंदिताः राम
४ नामोच्चारणादेव महापातकनाशनं यस्मान्मम्यस्वैविप्रेंद्राः परं मोक्षं लभेद्ध्रुवं॥ तत्रैव विष्णुदूतवाक्यं॥ ३ ५५
क्रीतिकालेयन्नामश्रुत्वं तावाथ वैसकृत्। लभंते परमं स्थानं किमु शुश्रूषणे रताः। ६॥ बृहन्नारदीये नारदः वीण
या नामानि गायन्नागतः। नारायणाच्युतानंत वासुदेव जनार्दन। यज्ञेश यज्ञपुरुष कृष्ण विष्णो नमोस्तु ते ७
७ नारायणाच्युत हरे शरणं भवेति शांतावदंति सततं तत सात्यजध्वं १

कारुणिकः कविः २६४ आज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान् धर्मान्संत्यज्य यः सर्वान्मां भजेत्स च
सत्तमः २६५ ज्ञात्वाज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः। भजंत्यनन्यभावेन ते मे भक्ततमा मताः २६६ न
रोधयति मां योगो न सांख्यं धर्म एव च। न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणाः। २६७ व्रतानि यज्ञश्छंदांसि
तीर्थानि नियमा यमाः यथावरुंधे सत्संगः सर्वसंगापहो हि मां २६८ मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः
मय्यात्मनां सुखं यत्तत्कुतः स्याद्विषयात्मनां। २६९ अकिंचनस्य दांतस्य शांतस्य समचेतसः। मया संतुष्ट
मनसः सर्वाः सुखमया दिशः २७० न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुनर्भ
वं वा मय्यर्पितात्मेच्छति मद्विनान्यत् २७१ न तथा मे प्रियतमः आत्मयोनिर्न शंकरः। न च संकर्षणो न श्रीर्नै
वात्मा च यथा भवान् २७२ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं। अनुव्रजाम्यहं नित्यं पूययेत्यंघ्रिरेणु
भिः २७३ निष्किंचना मय्यनुरक्तचेतसः शांता महांतोऽखिलजीववत्सलाः। कामैरनालब्धधियो जुषंति
ते यन्नैरपेक्ष्यं न विदुः सुखं मम २७४ बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः। प्रायः प्रगल्भया
भक्त्या विषयैर्नाभिभूयते २७५ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः। साधूनां समचित्तानां बु
द्धेः परमुपेयुषां॥२७६॥ भारतेरण्यकेपर्वणि दुर्वासावाक्यं शिष्यान्विति॥ वध्या पाकेन राजर्षेरपराधः कृ
तो महान्। मास्मान्धाक्षुर्दृष्ट्यैव पांडवाः क्रूरचक्षुषा २७७ स्मृत्वानुभावं राजर्षेरंबरीषस्य धीमतः।
बिभेमि सुतरां विप्रा हरिपादाश्रयाज्जनात् २७८ पांडवाश्च महात्मानः सर्वधर्मपरायणाः शू
राश्च कृतविद्याश्च व्रतिनश्च तपस्विनः २७९ सदाचाररता नित्यं वासुदेवपरायणाः क्रुद्धा से

णाखिलकल्मषाः सत्यंसत्यंपुनःसत्यंभाषितंममसुव्रत २४ नामोच्चारणमात्रेणमहापापात्प्रमुच्यते
ना. रामरामेतिरामेतिरामेतिचपुनर्जपन् सचांडालोपिपूतात्माजायतेनात्रसंशयः २५ कुरुक्षेत्रंतथाकाशी
गयावैद्वारकातथा सर्वतीर्थंकृतंतेननामोच्चारणमात्रतः। २६ कृष्णकृष्णेतिकृष्णेतिइतिवायोजपन्पठ
न्। इहलोकंपरित्यज्यमोदतेविष्णुसन्निधौ २७ नृसिंहेतिमुदाविष्णइतिवायोजपन्पठन् महापापात्प्र
मुच्यंतेकलौभागवतानराः २८ ध्यायन्कृतेयजन्यज्ञैः त्रेतायांद्वापरेर्चयन्। यदाप्नोतितदाप्नोतिकलौ
संकीर्त्यकेशवं॥२९॥एवंज्ञात्वामनोन्यस्यजगदात्मनिकेशवे सर्वपापपरिक्षीणायांतिविष्णोःपरंपदं ३०
मत्स्यकूर्मौयवाराहोनृसिंहोवामनस्तथा रामोरामश्चकृष्णश्चबुद्धःकल्कीततःस्मृतः ३१ एतेदशावता
पु.सं. राःपृथिव्यांपरिकीर्तिताः॥तेषांतुनाममात्रेणब्रह्महाशुध्यतेसदाः ३२ प्रातःपठन्जपन्ध्यायन्वि
५६ ष्णोर्नामयथातथा।पाद्मे॥ सूर्यबिंबेप्रभातीर्थेतीर्थोनामुत्तमंस्मृतं। विष्णोर्नाममस्तंतीर्थंनभूतंनभवि
ष्यति ३३ ब्रह्महाहेमहारीवाबालघ्नोगोघ्नएववा मुच्यतेनाममात्रेणप्रसादात्केशवस्यतु ३४ पाद्मे
रुद्रवाक्यं। यत्रयत्रहिभोदेविश्रीरामस्मरणंकृतं भवबंधविमोक्षोहिदृश्यतेसचराचरे ३५ अहंहिस
र्वदादेविश्रीरामस्मरणेचरेः। यंस्मृत्वानपुनर्देविनभवोजायतेक्वचित्॥३६ काश्यांवसतोनित्यंश्री
रामेकमलेक्षणं स्मरणंकरोमिदेविशिभक्त्यावाविधिपूर्वकं॥३७॥पंचमेमृतलवर्णनेस्तुकः। यस्यहवा राम
वक्षुत्पतनप्रस्खलनादिषुविवशःसकृन्नामभिगृणन्पुरुषःकर्मबंधनं संसारमंजसाविधुनोति ५६
यस्यहैवप्रतिबाधनंविहमुमुक्षवोन्यथैवोपलभंते॥३८॥शेषवर्णने॥ यन्नामश्रुतमनुकीर्तये

पद्मानाभकमलाकांतगंगाजनककेशव। क्षीरोदशायिन्दैत्यदामोदरनमोस्तुते ८ श्रीकृष्णविष्णोनरहरेमुरा
रेप्रद्युम्नसंकर्षणवासुदेव अजानिरुद्धामलविश्वरूपत्वंपाहिनः सर्वभयादजस्रं॥९॥ इत्युच्चरन्हरेर्नाम
मपावयन्सकलंजगत् नासकेलोपाख्यानेयमनारदसंवादेपृथ्वीवाराहवाक्यं॥ नारायणाच्युतानंतवा
सुदेवेतियोनरः सततंकीर्तयेद्भूमयातिमल्लयतांप्रिये॥१०॥ किंपुनःश्रद्धयायुक्तःपूजयेन्मामनन्यधीः॥
गुरूपदिष्टमार्गेणयातिमल्लयतांनरः॥११॥ पाद्मेउत्तरखंडेरुद्रः॥ चक्रायुधस्यनामानिसदासर्वत्रकीर्तये
त्। नाशौचंकीर्तनेतस्यसपवित्रकरोतियतः॥१२॥ तत्रैवब्रह्मनारदसंवादेनारदउवाच॥ नाम्नोस्यवावतीश
क्तिर्वद विश्वेश्वर प्रभो। कीदृक्नाममहिमा चाव्ययस्यमहात्मनः १३ येयंविश्वेश्वरःसाक्षादयंनारायणो
हरिः॥ परमात्मायंऋषीकेशसर्वज्ञीविष्णुसंमतः॥१४॥ मूढाविमोहितासर्वेभगवंतमधोक्षजं। नजानंत्यसारेस्मि
न्खराजकलौयुगे॥१५॥ अस्मिन्कलौविशेषेणनामोच्चारणपूर्वकं। भक्तिःकार्यासदास्वामिन्नातोवक्तुंत्व
मर्हसि॥१६॥ ब्रह्मोवाच॥ दृष्टेपरेषांपापानामनुक्तानांविशोधनं। विष्णोर्जिसोप्ययत्नेनस्मरणंपापनाशनं
१७ मिथ्याज्ञात्वाततःसर्वेहरेर्नामपठन्नुपन्न। सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदं १८ येवदंतिनरानि
त्यंहरिरित्यक्षरद्वयं तस्योच्चारणमात्रेणविमुक्तास्तेनसंशयः १९ वासुदेवेमनोयस्यजपहोमार्चनादिषु त
दन्तयविजानीयाद्यावदिंद्राश्चतुर्दश २० किंनाकपृष्ठगमनंपुनरावृत्तिलक्षणं। क्वजपोवासुदेवस्यमु
क्तिबीजमनुत्तमं २१ तन्मुखंपरमंतीर्थंयत्रवार्तामितन्वती नमोनारायणायेतिभातिप्राचीसरस्वती २२
तस्मादहर्निशंविष्णुस्मरणात्पुरुषोत्तमः। मुच्यतेनात्रसंदेहःसएवनारायणोभवेत्। २३ नयातिनरकंपुत्रसंही

त्वं न विजानामि भजामि च स्मरामि ते ५२ भागवते प्रथमे शौनकप्रश्ने। आपन्नः संसृतिं घोरां यन्ना-
नां० मविवशो गृणन्। ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं ५३ तत्पादसंश्रयाः सूत मुनयः प्रशमायनाः म
सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया ५४ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः। शुद्धि-
कामो न शृणुयाद्यशः कलिमलापहं ५५ प्रथमे सूतवाक्यं न यद्वचश्चित्रपदं हरेर्यशो जगत्पवि-
ती त्रं प्रगृणीत कर्हिचित्। तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः ५६ तद्वाग्विस-
र्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यत्शृण्वंति गायं-
ति गृणंति साधवः ५७ अत्रैकेन तु तन्नाध्यायमाह। नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरं-
पु.सं. जनं। कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणं ५८ नारदः तत्रैवाह इदं हि पुंसस्तपसः
५७ श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः। अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणा-
नुवर्णनं ५९ कुर्वाणा यत्र कर्माणि भगवच्छिक्षया सकृत्। गृणंति गुणनामानि कृष्णस्यानुस्मरंति
च ६० ॐ नमो भगवते तुभ्यं वासुदेवाय धीमहि। प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च। ६१ घु
इति मूर्त्यभिधानेन मंत्रमूर्तिममूर्तिकं। यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ६२ एतदेवातुरचित्तानां राम
मात्रास्पर्शेच्छया मुहुः। भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ६३ प्रथमे कुंतीस्तुतौ। शृण्वंति गा-
यंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः। त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपश- ५७
मं पदांबुजं ६४ तत्रैव भीष्मवाक्यं। भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन्। त्यजन्कलेवरं यो-

शीघ्र

दकस्मादार्त्तो वा यदि पतितः स्खलन्‌ वा हा हेत्यंहः सपदि नृणां नाम न मन्यं केशवाद्भगवत आश्रयेन्मुमुक्षुः।
३९ वैष्णवे भरत जप्यं॥ यज्ञेशाच्युत गोविंद माधवानंत केशव। कृष्ण विष्णो हृषीकेशेत्याह राजा स केवलं ४०
नान्यज्जगाद मैत्रेय किंचित्स्वप्नांतरेष्वपि। एतत्परं तदर्थं च विना नान्यदचिंतयत् ४१ पाद्मे कृतवाक्ये॥ प
थिव्यां यानि तीर्थानि पुण्यान्यायतनानि च। तानि सर्वाण्यवाप्नोति विष्णोर्नामानुकीर्तनात् ४२ पाद्मे उत्त
रखंडे उमारुद्रसंवादे। दिवारात्रौ च ये भक्ता नाममात्रोपजीविनः। वैकुंठवासिनस्ते वै तत्र वेदादिमाहिपाः ४३
गारुडे प्रेतखंडे॥ कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः। जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहं ४४
बृहन्नारदीये नारदवाक्यं। महिम्नां नलु यन्नाम्नः पारं गंतुं मुनीश्वराः। मनवोपि मुनींद्राश्च कथं तं क्षु मु
द्रलोको बुध्येत ४५ यन्नामश्रवणाच्चापि महापातकिनोपि ये। पावनत्वं प्रपद्यंते कथं स्तोष्यामि क्षुद्रधीः
४६ यथा कथंचित्तन्नाम्नि कीर्तिते वा श्रुतेपि वा। पापिनोपि विशुद्धास्युः शुद्धा मोक्षमवाप्नुयुः ४७
लिंगपुराणे दुःसहं प्रति बृहन्नवाक्यं। शयनाशनकालेषु भोजनाटनवृत्तिषु येषां वदंति वै वाणी नामानि च
हरेः सदा। तद्गृहं न समाख्यातुं समर्थस्मानि वेशितुं ४८ काशीखंडे ध्रुवस्तुतौ। पापिनापि प्रसंगेन विहि
तं स्वहितं परं। पापिनां यानि महोपपक्वं तिच ४९ सुनीलध्यानसंपन्नो नामोच्चारो हरेर्हरेत्। प्रमादाद
पि संस्पृष्टो यथानलकणो दहेत् ५० तथौष्ठपुटसंस्पृष्टं हरिनाम दहेदघं। कृष्णदाहं हरेर्नाम स्फुलिंग
सदृशं ज्वलं। महतां पातकानां च राशिस्तूलोपमः क्व च ५१ गोविंदं परमानंदं मुकुंदं मधुसूदनं त्यक्त्वा

प ना· लं ७६ सप्तमे शुकवाक्यं। जिह्वा लब्ध्वापि यो विष्णुं कीर्तनीयं न कीर्तयेत्। लब्ध्वापि मोक्षनिःश्रेणीं स
नारोहति दुर्मतिः ७७ तस्मात्कोविंदमाहात्म्यमानंदरससुंदरं। स एव यात्कीर्तयेन्नित्यं सकलतीर्थानां ना
न संशयः। ७८ तस्मात् श्रीमन्कोयामपुण्यं गोविंदचरणाश्रितं महापुण्यप्रदं यस्मात्स एव न्नप
सत्तम· ७९ द्वितीये शुकवाक्यं। तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः श्रोतव्यः कीर्तितव्यश्च स्म
र्तव्यश्चेच्छताभयं। ८० एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसां अंते
नारायणस्मृतिः ८१ प्रायेण मुनयो राजन्निवृत्ता विधिनिषेधतः। नैर्गुण्यस्थ्रा रमंते स्म गुणानुक
थने हरेः ८२ एतन्निर्विद्यमानानामिच्छतामकुतोभयं। योगिनां न्यपनिर्णीतं हरेर्नामानुकी
पु·सं· र्तनं ८३ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ८४
५८ पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं पुनंति ते विषयविदूषिताशयं व्रजंति तच्च
रणसरोरुहांतिकं। ८५ ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः केवल्य
संमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ८६ द्वितीये शौनकवाक्यं। आयुर्ह
रति वै पुंसामुद्यन्नस्तं च यन्नसौ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ८७ तरवः किं न जीवंति भस्त्राः
किं न श्वसंत्युत न खादंति न मेहंति किं ग्रामपशवोपरे ८८ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः राम ५८
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ८९ बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नर
स्य जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ९० भारः परं पट्टकिरीटजुष्टमप्यु
१०० भा

ग्गीमुच्यते कामकर्मभिः ६५ तत्रैव शौनकवाक्यं ॥ अहो न लोके पीयेत हरिलीलामृतं वचः यस्मिन्नी
तिकृतं सर्वमिष्टापूर्तं दिवं भवेत् ॥ ६६ ॥ तत्रैव सूतः ॥ यया कथा भगवतः कथनीयोरुकर्मणः । गुणकर्माश्रया
पुंभिः संसेव्यास्ता वुभूषुभिः ६७ तृतीये मैत्रेयवाक्यं । एकान्तलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवाद
माहुः श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगं ६८ को नाम लोके पुरुषार्थसारवित् पु
राकथानां भगवत्कथासुधां । आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरं ॥ ६९ ॥ कपिलवाक्यं
त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः । कथायां कथनीयोरुविक्रमस्य मधुद्विषः ॥ ७० ॥ नूनं दैवेन नि
हता ये चाच्युतकथासुधां । हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव विड्भुजः ॥ ७१ ॥ देवहूतिवाक्यं यन्नाम
८ धेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् । श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुन
स्ते भगवन्नु दर्शनात् ७२ अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यं । तेपुस्तपस्ते पवित्राद
जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते ७३ चतुर्थे दक्षयज्ञे विमुक्तौ सिद्धानां वाक्यं ।
अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः । तृषार्तोऽवगाढो न सस्मार दावं न
निष्क्रामति ब्रह्मसंपन्नवन्नः ७४ चतुर्थे पृथुवाक्यं न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणां
बुजासवः महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ७५ स उत्तमश्लोक महन्मु
खच्युतो भवत्पदाम्भोजसुधाकणानिलः । स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यहो र

ना: स्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवं स्वनमगोह्यवशिष्टोस्तितोयाहिपरांगतिं ३ सयमाराधिध्ये
योभगवान्परमेश्वरः। आत्मभावंनयत्यंगसर्वात्मासर्वसंश्रयः ४ कलेर्दोषनिधेराजन्नस्तिह्येकोम
हान्गुणः। कीर्तनादेवकृष्णस्यमुक्तबंधःपरंव्रजेत् ५ कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतोमखैः द्वा
परेपरिचर्यायांकलौतद्धरिकीर्तनात्। ६ यस्तूत्तमश्लोकगुणानुवादःसंगीयतेभीक्ष्णममंगलघ्नः। तमेव
नित्यंशृणुयादभीक्ष्णंकृष्णेमलांभक्तिमभीप्समानः ७ नवमेडुवीसाभगवंतंवति॥ अजानतातेप
रमानुभावंकृतंमयाघंभवतःप्रियाणां विधेहितस्यापचितिंविधातर्मुच्येतयन्नाम्न्युदितेनारकोपि ८
पु.सं. ५८ द्वादशेस्तत्वाकं मृषागिरस्ताह्यसतीरसत्कथानकथ्यतेयद्भगवानधोक्षजः। तदेवसत्यंतदुहैवमं
गलंतदेवपुण्यंभगवद्गुणोदयं ९ तदेवरम्यंरुचिरंनवंनवंतदेवशश्वन्मनसोमहोत्सवं। तदेवशोका
र्णवशोषणंनृणांयदुत्तमश्लोकगुणानुगीयते १० नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंयादि
५९ वी वक्तिकर्हिचित्। तध्वांक्षतीर्थंनतुहंससेवितंयत्राच्युतस्तत्रहिसाधवोमलाः ११ सवाग्विसर्गोजन
ताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि। नामान्यनंतस्ययशोंकितानियच्छृण्वंतिगायंतिगृणंति
साधवः १२ भारते अनुशासनकेपि॥ दुर्गाण्यतितरत्याशुपुरुषःपुरुषोत्तमं। स्तुवन्नामसहस्रेण राम
नित्यंभक्तिसमन्वितः १३ वासुदेवाश्रयोमर्त्योवासुदेवपरायणः सर्वपापविशुद्धात्मायातिब्रह्मस ५८
नातनं नवासुदेवभक्तानामशुभंविद्यतेक्वचित् जन्ममृत्युजराव्याधिभयंनैवोपजायते नक्रोधो
नचमात्सर्यंनलोभोनाशुभामतिः। भवंतिकृतपुण्यानांभक्तानांपुरुषोत्तमे १६ भारते राजधर्मेभी

तमांगं नन्नमेन्मुकुंदं शावौ करौ नो कुरुतः। सपर्यां हरेर्लसत्कांचनकंकणौ वा ९१ बर्हायिते ते नयने नरा
णां लिंगानि विष्णोर्न निरीक्षितो ये। पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ९२ जी
वंछवो भागवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु। श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसंछवो यस्तु
न वेद गंधं ९३ तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः न विक्रियेताथ यदा विकारो नेत्रे
जलं गात्ररुहेषु हर्षः ९४ अथाभिधेह्यंग मनोनुकूलं प्रभाषसे भागवतप्रधानः। यदाह वैयासि
किरात्मविद्याविशारदो नृपतिं साधु पृष्टः ९५ द्वितीये राज्ञा। शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचे
ष्टितं कालेन नातिदीर्घेण भगवान्विशते हृदि। ९६ प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं धुनोति
शमलं कृष्णः सलिलस्य यथा शरत ९७ पंचमे नाभि ऋत्विजः। अथ कथंचित्स्खलनक्षुत्पतनजृं
भणदुःस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायां अपि सकल
कश्मलनिरसनानि तव गुणगणकृतकथननामधेयानि वचनगोचराणि भवंतु। ९८॥ द्वादशे शुकवा
क्यं॥ पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान्। सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः। ९९ सं
तः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा। नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभं १०० यथा हे
म्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं। एवमात्मगतो विष्णुर्योगिनामशुभाशयं १ विद्यातपःप्राणनि
रोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः। नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते २ त

नी: पुण्ये भारते भरतर्षभ। आदिमध्यावसानेषु विष्णुः सर्वत्र गीयते २८ यथा विष्णुकथा दिव्या श्रुतयश्च
सनातनाः यच्छ्रोतव्यं मनुष्याणां परं पदमिहेच्छता २९ मोक्षधर्मे नारायणीयाख्याने श्रवणानंतरं
जनमेजयवाक्यं नवनीतं यथा दध्नो मलयाच्चंदनं यथा आरण्यकं च वेदेभ्य ओषधिभ्योऽमृतं
त यथा ३० तथा महर्षे श्लिष्टं कथामृतमनुत्तमं त्वयोद्धृतं मतिमता नारायणकथाश्रयं। ३१ अ
60 हो नारायणं तेजो दुर्दर्शं द्विजसत्तम। यदाविशंति कल्पांते ब्रह्मेशानादयः सुराः ३२ अथ यश्चास
गंधर्वा यक्षाः किंचिच्चराचरं न ततोऽस्ति परं मन्ये पावनं दिवि चेह वा ३३ सर्वाश्रमाभिगमनं सर्वतीर्था
वगाहनं। न तथा फलदं मन्ये नारायणकथा यथा ३४ सर्वथा पावितोऽस्म्यद्य श्रुत्वेमामादितः क
पु:सं० थां। हरेर्विश्वेश्वरस्येह सर्वपापप्रणाशनीं ३५ तत्रैव वैशंपायनः। श्रुत्वा तु नारदो वाक्यं नरना
रायणेरितं अत्यंतभक्तिमान्देवे एकांतित्वमुपेयिवान् ३६ त्वमप्यमितविक्रांत पांडवानां कुलोद्व
निवृत्तः ६० ह। पावितात्माद्य संवृत्तः श्रुत्वेमामादितः कथां ३७ नैव तस्य परो लोको नायं पार्थिवसत्तम। कर्मणा
मनसा वाचा यो द्विष्याद्विष्णुमव्ययं। ३८ मज्जंति पितरस्तस्य नरके शाश्वतीः समाः। यो द्विष्याद्विबुध
श्रेष्ठं देवं नारायणं हरिं ३९ कथं नाम भवेद्द्वेष्य आत्मा लोकस्य कस्यचित्। आत्मा हि पुरुषव्याघ्र राम
ज्ञेयो विष्णुरिति स्थितिः ४० स एव गुरुरस्माकं ऋषिर्गंधवतीसुतः। तेनैतत्कथितं सम्यङ्माहात्म्य ६०
परमात्मनः ४१ तस्माच्छ्रुतं मया तेद्य व्याख्यातं तेन पानघ॥ ॥ इति श्रीमत्पुराणसंग्रहाख्येऽभिनव
करतोऽस्मिन् श्रीविष्णोर्नाममध्ये संशाने सर्वपुराणग्रंथनरूपो पंचमः परिच्छेदः समाप्तिमगमत् शुभं भूया

भस्कांदे। प्राणकांतारपाथेयंसंसारच्छेदभेषजं दुःखशोकपरित्राणंहरिरित्यक्षरद्वयं १७ दशमे गोपी
वाक्यं तवकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहं। श्रवणमंगलंश्रीमदाततंभुविगृणंतियेभू
रिदाः जनाः।१८ दशमे सुदर्शनसर्पवाक्यं। यन्नामगृह्णन्नखिलान्श्रोतॄनात्मानमेवच सद्यःपुना
तिकिंभूयस्तस्यस्पृष्टःपदाहितेविभो १९ तत्रैव राज्ञां वाक्यं।। शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रु
ताध्ययनदानतपःक्रियाभिः सत्वात्मनांऋषभतेयशसिप्रवृद्धयच्छ्रद्धयाश्रवणसंभृतया यथास्यु:
२० कुरुक्षेत्रे युधिष्ठिरवाक्यं।। कुतोशिवंत्वच्चरणांबुजासवंमहन्मनस्तोमुखनिःसृतंक्वचित् पिबंति
येकर्णपुटैरलंप्रभोदेहंभृतांदेहकृदस्मृतिच्छिदं। २१ एकादशस्कंधे।। श्रृण्वन्सुभद्राणिरथांगपाणे
ना र्जन्मानिकर्माणिचयानिलोके गीतानिनामानितदर्थकानिगायन्विलज्जोविचरेदसंगः २२ एवंव्र
तःस्वप्रियनामकीर्त्याजातानुरागोद्रुतचित्तउच्चैः। हसत्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबा
ह्यः २३ गीतासु भगवद्वाक्यं। महात्मानस्तुमांपार्थदैवीप्रकृतिमाश्रिताः। भजंत्यनन्यमनसोज्ञा
त्वाभूतादिमव्ययं २४ सततंकीर्तयंतोमांयतंतश्चदृढव्रताः। नमस्यंतश्चमांभक्त्यानित्ययुक्ताउपा
सते २५ ज्ञानयज्ञेनचाप्यन्येयजंतोमामुपासते एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखं २६ भारतां
तेस्वर्गपर्वणि।। भारतपठनकथनेभगवद्व्यासः दृष्टांतत्वेनोक्तं भगवतएवभारतादिविषयत्वंचोक्तं। तथा
हि।। महाभारतमाख्यानंक्षितिंगांगांसरस्वतीं। ब्रह्माणंकेशवंरुद्रंकीर्तयन्नावसीदति २७ वेदरामायणे

श्री

श्यंति ते यमं कर्मणा मनसा वाचा ये च्युतं शरणं गताः १३ न समर्थो यमस्तेषां ते मुक्तिफलभा
गिनः ये जनार्दनं नित्यं नारायणं द्विजाः १४ नमंति न हि ते विष्णोः स्थानादन्यत्र गामि अन्यन्या॰
नः न ते भ्रता न्नमा तेंग नयमं न च तां पुरीं १५ प्रणम्य विष्णुं पश्यंति नरकान्न कथंचन कृत्वा
61 पि वहुशः पापं नरा मोहसमन्विताः १६ न यांति नरकं नत्वा सर्वपापहरं हरिं शाठ्येनापि नरा नित्यं
ये स्मरंति जनार्दनं १७ ते पि यांति नरा नित्यं विष्णुलोकमनामयं अत्यन्यचित्तः क्रुद्धोपि यः सदा वि
त्ति येद्धरिं १८ सोपि दोषक्षयान्मुक्तिं लभे च्चेदिपतिर्यथा । वामनपुराणे च बलिं प्रति प्रह्लादः । ये संस्थित
हरिमनंतमनादिमध्यं विष्णुं चराचरगुरुं हरिमीशितारं संसारगर्तपतितस्य करावलंबं नूनं न ते भुवि
पु॰सं॰ ६१ नरा ज्वरिता भवंति १९ ये संश्रिता हरिमनंतमनादिमध्यं नारायणं सुरगुरुं शुभदं वरेण्यं । शुद्धं ख
गेंद्रगमनं कमलालयेशं ते धर्मराजकिरणं न सहंति धीराः । २० स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति य
मः किल तस्य कर्णमूले । परिहर मधुसूदनप्रपन्नान्प्रभुरहमन्यनृणां न वैष्णवानां २१ तथान्यदुक्तं
न स सत्तमेन इक्ष्वाकुणां महात्मनां श्रुतेन नूनं । ये विष्णुभक्ताः पुरुषाः पृथिव्यां यमस्य ते निर्विषया भवंति २२
हरिवाक्यामृतं पीत्वा विमले श्रोत्रभाजनैः प्रहृष्यति मनो येषां दुर्गाण्यतितरंति ते २३ विषमस्थानि
याता ये ये च दुर्व्रीतसंभवाः । ते नामस्मरणाद्विष्णोर्मोक्षयंति महासुरा २४ अजमनादिमजरमनं ६१
तं हरिं ये स्मरंत्यहरहर्न्नरा भुवि विधूतसकलं हि कल्मषं ते प्रयांति धाममपरमं सवैष्णवं २५ ये मानवा

वैष्णवानां ५ अथ यस्मिन्यस्मिन्पापे यानियानि प्रायश्चित्तानि स्मृतिकारैरुक्तानि। अन्यान्य
तितेषु सर्वेषु हरिभक्तिरतात्मनां परमादृत्यातेषु हरिस्मरणमेव प्रायश्चित्तमिति सर्वपुराणसिद्धं प्रति
पाद्यते तथाहि ब्रह्मे। पापे गुरूणि गुरूणि स्वल्पान्यल्पे च तद्विदः। प्रायश्चित्तानि विप्रेंद्र जगुः
स्वायंभुवादयः १ प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै। यानि तेषामशेषाणां कृष्णानुस्म
रणं परं २ कृते पापेनुतापो वै यस्य पुंसः प्रजायते प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परं ३ प्रा
तर्निशि तथा संध्यामध्याह्नादिषु संस्मरन्। नारायणमवाप्नोति सद्यः पापक्षयान्नरः ४ विष्णुसं
स्मरणात्क्षीणसमस्तक्लेशसंचयः मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोनुमीयते ५ वासुदेवमनोय
स्य जपहोमार्चनादिषु। तस्यांतरायो विप्रेंद्र देवेंद्रत्वादिकं फलं ६ क्व नाकपृष्ठगमनं पुनरावृत्तिल
क्षणं। क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमं ७ तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो द्विजाः। न याति
नरकं शुद्धः संक्षीणाखिलपातक इति ८ एतान्येव श्लोकानि विष्णुपुराणोद्धृतानि। तत्र यमलो
कवर्णने समये। नमो ब्रह्मण्यदेवेति याहरिं चाभिवादयेत् शरीरं साधयेत्तस्य कैवल्येनांतरात्म
ना ९ स रथेनाग्निवर्णेन याति हि त्रिदशालयं। वैष्णवाये च कुर्वंति तितीर्थयात्रां जितेंद्रियाः १० तत्प
थं यांति ते घोरं सुखयानैरलंकृताः। ये नरा नरकध्वंसि वासुदेवमनुव्रताः ११ ते स्वप्नेपि न पश्यं
ति यमं वा नरकाणि वा। अनादिनिधनं देवं दैत्यदानवदारणं १२ ये नमंति नरा नित्यं न हि प

रस्यये भक्ताभक्ता माधवस्य च तेनिस्तरिष्यंति कलौ दोषान्पूर्वं सुदारुणात् ३८ हरिर्हरति पापानि
प्रा० नमंति दुष्टचित्तैरपि स्मृतः अनिच्छयापि संस्पृष्टः दहत्येव हि पावकः ३९ अगम्यागमनैः पापं ब्रह्मव
धादिभिस्तथा। हरिनामकृतं पश्चात्सद्यः पापप्रणाशनं ४० कृतयत्तपसा प्रीतिस्त्रेतायां ध्या
नतो नृप। द्वापरे च क्रतुश्रीभिः कलौ तद्धरिनामतः ४१ हरे मुकुंद गोविंद परमात्मन्नधोक्षज वा
सुदेव हृषीकेश ब्रुवन्मुच्येत पातकात् ४२ न शक्तिर्वर्त्तते तावत्पातकस्य च पापिभिः। हरिनाम्नो
यथा शक्तिः पापनिर्दहने स्मृता ४३ तस्मात्सर्वप्रयत्नेन हरिः सर्वत्र चिंत्यतां। सचिंतितो हरिर्द्दद्या
त्स्थानं स्वभुवनेश्वतं ४४ संप्राप्य मानुषं भावं योनार्चयति केवलं स गतो दूरमध्वानं घोरसुपंडुरा
सदं ४५ प्रायश्चित्तसहस्राणि कर्माणि विविधानि च। कोटितीर्थावगाहानि न नाम्नः सदृशानि वै
पु.सं० कलौ नामैव नामैव नामैव परमं पदं। नामैव तारको मंत्रो पालको भवसागरात् ४७ हरिह्यक्षरं दिव्यं म६
६२ हरत्यमघाहर्त्तं। सिद्धं तु त्रिषु लोकेषु महापातकिनां नृप ४८ किमत्र बहुनोक्तेन पापिनां पापसं
क्षये। कलौ न पवरश्रेष्ठ नाम व्याहरणं हरेः ४९ न त्वं श्रृणु महामंत्रं नामसंज्ञं महाव्रत। सौनारा
यणेति राजेंद्र महापातकनाशनं ५० वपुर्मूत्रविकारेण संजातं कुरुते तथा निसर्गाद्भूमिविमुखं त स्वभावात् २
कुचिः। लक्ष्मसे स्वयात् ५१ शास्त्रं गीता वेदमाता मंत्रः पूज्या विप्राः सच्चरित्रेभिलाषः। भक्तिः क्लेसेत
त्वविज्ञानवांछा संगः सद्भिर्यस्य तस्याकृतं किं ५२ पाप व्यासः। येषामत्यंतसंस्कारात्कदाचिद्धरि राम
कीर्त्तनं तद्दशात्तदवस्थानाद्यातनानैव दृश्यते ५३ हरिकीर्त्तनसंस्कारः क्षालयत्यखिलं मलं। ६२

विगतरागपरावरज्ञानारायणंसुरगुरुंसततंस्मरंति ते धौतपांडुरपटाइवराजहंसाः संसारसागर
जलस्यतरंतिपारं २६ ध्यायंतियेसततमच्युतमीशितारं निःकल्मषंप्रवरपद्मदलायताक्षं। ध्याने
नरूत्तनहतकिल्विषवेदनास्तेमातुःपयोधररसंनपुनःपिबंति २७ आपावंतियेभक्तिपरामनुष्या
संकीर्त्यमानंभगवंतमाद्यं। तेमुक्तपापाःसुखिनोभवंतियथामृतप्राशयतर्पितास्ते २८ तस्माद्ध्या
नंस्मरणंकीर्तनेवानाम्नांश्रवणंपठतांसज्जनानां कार्यविशेषःमुरद्विषानैमनुष्यैःस्तुत्यंपूजयास्तं
प्रशंसंतिदेवाः २९ वृद्धवैवर्तेचपरासरं प्रतिवशिष्ठोपदेशस्तत्वाक्यं श्रोतव्यःसचमंतव्यःध्या
तव्यश्च कृताभयां। यदभिध्यानदावाग्निस्पृष्टकर्माणःपुमान् ३० विमुक्तःपश्यतिव्यक्तमव्य
क्तंमपिकेशवं इतरेमोहसंमूढाःपतंतिभवसागरइति ३१ सर्वासुभमयस्यापिकलेरेषमहा
गुणः कीर्तनादेवकृष्णस्यमुक्तवंधःपरंव्रजेत् ३२ वाराहेकलिदोषकीर्तनानंतरं अगस्त्यवाक्यं
स्मरन्विष्णुपठन्वेदं ददद्दानं बहून्हविः। ब्राह्मणःशुद्धएवासौविरुद्धमपितारयेत् ३३ हरिरेव
सदाध्येयोनरैपातकसंयुतैः। तारयत्येवसततंस्मृतोविष्णुर्महाभयात् ३४ पुंसांकलिकृता
न्दोषान्महापातकमिश्रितान्। तारयत्येवगोविंदोस्मृतमात्रोनसंशयः ३५ स्कांदेःसनमि
तोध्यातश्चादृतःपूजितोथवा। संकीर्तितोनमिर्विष्णुःकलिदोषान्विनिर्हरेत् ३६ कले
रवलुभविष्यंतिनारायणपरायणाः। नतेकलिकृतान्विघ्नुर्थोद्विषंतिमहेश्वरं ३७ महेश्व

ग्रा॰ वदेवस्य शार्ङ्गिणः प्रीतो भवति विष्णात्मा मृत्युं स द्योपनेष्यति ॥७०॥ व्यास उवाच । इत्युक्तस्तं प्रणम्या
थ स जगाम तपोवनं । स ह्यपादेङ्कवायास्तु भद्रायास्तटमुत्तमं ७१ नानाद्रुमलताकीर्णं नानामुनिज
नावृतं । तत्र विष्णुं प्रतिष्ठाप्य गंधपुष्पादिभिः क्रमात् ७२ पूजयामास देवेशं मार्कंडेयो महामुनिः
पूजयित्वा हरिं तत्र तपस्तेपे सुदुस्तरं ७३ निराहारो मुनिस्तत्र वर्षमेकमतंद्रितः । मंत्रोक्तकाले त्वासंने अ॰ ४
दिने तस्मिन्महामतिः ७४ स्नात्वा यथोक्तविधिवत्कृत्वा विष्णोस्तदार्चनं हृदि कृत्वेंद्रियग्रामं विष्णु
द्धेनांतरात्मना ७५ आसनं स्वस्तिकं बध्वा कृत्वासौ प्राणसंयमः ॐकारोच्चारयन्धीमान्हृदिपद्मं वि
काशयन् ७६ तन्मध्ये रविसोमाग्निमंडलानि यथाक्रमं । कल्पयित्वा हरेः पीठं तस्मिन्नेव सनातनं ।
७७ पीतांबरधरं विष्णुं शंखचक्रगदाधरं भावपुष्पैः समभ्यर्च्य तनस्तस्मिन्निवेश्य सः ७८ ब्रह्मरूपं हृ
पु॰ सं॰ दि ध्यायंस्ततो मंत्रमुदीरयन् । ॐ नमो भगवते वासुदेवाय ॥७९॥ व्यास उवाच । इत्येवं ध्यायतस्तस्य मा
६३ र्कंडेयस्य धीमतः । मनस्तत्रैव संलग्नं देवदेवे जगत्पतौ ८० ततो यमाज्ञया तत्र आगता यमकिंक
राः पाशहस्तास्त तं नेतुं विष्णुदूतैस्तु तेहताः ८१ मुशलैर्हन्यमानास्ते इदमुक्त्वा ययुः पुरः । वयं
निवृत्यागता मो मृत्युरेवागमिष्यति ८२ आगत्य स्वयमेवात्र मृत्युः पार्श्वे महात्मनः । मार्कंडेयस्य
वन्नाम विष्णुकिंकरशंकया ८३ तं चाप्युद्यम्य मुशलान्नायशान्त विष्णुकिंकराः विष्णवाज्ञया हनि
ष्यामो मृत्युमप्येति संस्थिताः ८४ ततो विष्ण्वर्पितमना मार्कंडेयो महामतिः तुष्टाव प्रणतो भूत्वा दे राम
वदेवं जनार्दनं ८५ विष्णुनैवायदिष्टं तु ततस्तोत्रं महात्मनः । सुभाषितेन मनसा तेन तुष्टाव माध ६३
वं ८६ ॐ नमो भगवते वासुदेवाय । नारायण सहस्राक्ष पद्मनाभ पुरातन । प्रणतोस्मि हृषीके

नरकस्था विमानस्था विमलाः पीतवाससः ५४ शंखचक्रधराः सर्वे व्रजंति हरिमंदिरे । हरिकीर्त्तनमाहा
त्म्यं वक्तुं केनापि शक्यते ५५ पिशाचयोनिमापन्ना अपि यांति हरेः पदं नारसिंहे च मार्कंडेयमृत्युंज
ये मृगुं प्रति। मार्कंडेय उवाच। सर्वपापहारिणां मृत्युं जेतुमिच्छामि सांप्रतं। तवोपदेशान्मुगुरो तत्रोपायं व
दस्व नः ५६ मृगुरुवाच। नारायणमनाराध्य तपसा महतामुत। को जेतुं शक्नुयान्मृत्युं ततस्तं तपसार्चय।
५७ तमनंतमजं विष्णुमच्युतं पुरुषोत्तमं। भक्तिप्रियं सुरश्रेष्ठं भक्त्या तं पुरुषोत्तमं। ५८ तमेव शरणं पूर्वं
गतवान्नारदो मुनिः। तपसा महता वत्स नारायणमनामयं ५९ तत्प्रसादान्महाभाग नारदो ब्रह्मणः सु
तः। जरां मृत्युं विजित्वासौ दीर्घायुर्वर्त्तते सुखं ६० तमतेपुंडरीकाक्षं नारसिंहं जनार्द्दनं। वत्सानां वत्सलः
कुर्यान्मृत्युसेनानिवारणं ६१ तस्मात्त्रैलोक्यकर्त्तारं विष्णुरूपं श्रियः पतिं गोविंदं गोपतिं देवं सततं श
रणं व्रज ६२ नारसिंहं महादेवं यदि पूजयसे सदा। वत्स जेतासि मृत्युं त्वं सततं नात्र संशयः ६३ व्या
स उवाच॥ उक्तः पितामहेनैवं मृगुणा घृतमब्रवीत् मार्कंडेयो महातेजा विनयान्नं पितामहे ६४ आरा
ध्यः कथितस्तात विष्णुः सोऽति निश्चयात्। आराधितश्च भगवान्मम मृत्युं हरेदिति॥६५॥ कथं कुत्र मया
दोहनदी कार्यमच्युताराधनं गुरो येनासौ मम तुष्टः सन् मृत्युं संप्लोपनेष्यति ६६ मृगुरुवाच॥ उवाच मृगुर्नी
भद्रदेहे नदीतीरे सह्यसंभवे। तायो भद्रा तटे वत्स त्वं प्रतिष्ठाप्य केशवं ६७ तमाराध्य जगन्नाथं गंध
पुष्पादिभिः क्रमात् हृदि कृत्वेंद्रियग्रामं मनः संयम्य तत्वतः ६८ हृत्पुंडरीके देवेशं शंखचक्रगदाध
रं ध्यायन्नेकमना वत्स द्वादशाक्षरमभ्यसेत् ६९ ॐ नमो भगवते वासुदेवाय इमं मंत्रं हि द्विजपतो दे

प्रा.

निवर्त्तास्ततो भग्नैर्मृत्युस्तत्र गतः पुनः । अस्मान्निर्भर्त्स्यतश्चैवं ते नरैर्मुशलैर्हताः ४ एवमुक्तमानेनं लु
ब्राह्मणं तपसि स्थितं अशक्तात्वाभिहं प्राप्ता मृत्युना सह वै प्रभो ५ ब्रवीहि महाभाग तद्बलं ब्राह्मणस्य तु
देवं कं ध्यायते विप्रकेनातेयेहितावयं ६ व्यास उवाच ॥ इत्युक्तः किंकरैः सर्वैः मृत्युना च महामते । ध्या
त्वा क्षणं महाबुद्धिः प्राह वैवस्वतो यमः ॥७॥ यम उवाच । शृण्वंतु किंकराः सर्वे मृत्युश्चान्ये च मे वचः । सत्यमे
तत्प्रवक्ष्यामि ज्ञानं तद्योगभावतः ८ भृगुपौत्रो महाभागो मार्कंडेयो महामतिः । सज्ञात्वा ह्यात्मनः काले
गतो मृत्युं जितो यया ९ भृगुणोक्तेन मार्गेण सतेपे परमं तपः । हरिमाराध्य मेधावी जपतो द्वादशाक्षरं १०
एकाग्रेणैव मनसा ध्यायन्स हृदि केशवं । सततं योगयुक्तस्तु स मुनिस्तत्र किंकराः ११ हृदिस्थे पुंडरी
काक्षे सततं भक्तवत्सले पश्यंतं विष्णुभक्तं तु को हिंस्यात्केशवाश्रयं १२ तेपि वै पुरुषा विष्णोर्ययुर्ये ताडि
ता भृशं । इतऊर्ध्वं न गंतव्यं तत्र यत्राप्यपीडिताः १३ न तत्र ताडनं चित्रमहं मन्ये महात्मनः भवतां जीवि
तं चित्रमहं मन्ये दुरात्मनां १४ नारायणपरं विप्रं कस्त्वं वीक्षितुमुत्सहेत । युष्माभिस्तु महापापे मार्कंडे
ये हरिप्रिये ॥१५॥ नारसिंहं महादेवं येनराः पर्युपासते । तेषां पार्श्वे न गंतव्यं युष्माभिर्मम शासनात् १६
व्यास उ० ॥ इत्येवं किंकरान्मृत्युश्च पुरतः स्थितः । यमो निरीक्ष्य वचनं नरकस्थं प्रपीडितं । १७ कृप
या परया युक्तो विष्णुभक्त्या विशेषतः । जनस्यानुग्रहार्थाय यतेनोक्ता वागिमां शृणु १८ नरके पच्यमा
नस्तु यमेन परिभाषितः । किं त्वयानार्चितो देवः केशवः क्लेशनाशनः १९ उदकेनाप्यलाभे तु द्रव्या
णां पूजितः प्रभुः । यो ददाति स्वकं लोकं स त्वया किं न पूजितः २० नारसिंहो हृषीकेशः पुंडरीकनि

नृ.सं.
६४

राम
६४

शं किं मे मृत्युः करिष्यति ८७ गोविंदं पुंडरीकाक्षमनंतमजमव्ययं। केशवं च प्रपन्नोस्मि किं मे मृ० ८८
वासुदेवं जगद्योनिं भानुवर्णमतींद्रियं दामोदरं प्रपन्नोस्मि किं मे मृ० ८९ शंखचक्रधरं देवं छन्नरू
पिणमव्ययं अधोक्षजं प्रपन्नोस्मि किं मे मृ० ९० वाराहं वामनं विष्णुं नारसिंहं जनार्दनं। माधवं च
प्रपन्नोस्मि किं मे मृ० ९१ पुरुषं पुष्करं पुण्यं क्षेमं बीजं जगत्पतिं। लोकनाथं प्रपन्नोस्मि किं मे मृ०
९२ भूतात्मानं महात्मानं यज्ञयोनिमयोनिजं। विश्वरूपं प्रपन्नोस्मि किं मे मृ० ९३ सहस्रशिरसं
देवं व्यक्ताव्यक्तं सनातनं। महायोगिं प्रपन्नोस्मि किं मे मृ० ९४ इत्युदीरितमाकर्ण्य स्तोत्रं तस्य म
हात्मनः अपयातस्ततो मृत्युर्विष्णुदूतैश्च पीडितः ९५ इति तेन जितो मृत्युः मार्कंडेयेन धीमता। प्र
सन्ने पुंडरीकाक्षे नृसिंहे नास्ति दुर्लभं ९६ मृत्युंजयमिदं स्तोत्रं मृत्युप्रशमनं शुभं। मार्कंडेयहिता
र्थाय स्वयं विष्णुरुवाच तत् ९७ इदं यः पठते भक्त्या त्रिकालं प्रयतः शुचिः नाकाले तस्य मृत्युः स्या
न्नरस्याच्युतचेतसः ९८ हृत्पद्ममध्ये पुरुषं पुराणं नारायणं शाश्वतमादिदेवं संचिंत्य सूर्यादपि राजमानं
मृत्युं स योगी जितवांस्तदैव ९९ व्यास उवाच। मृत्युश्च किं करोत्येव विष्णुदूतैः प्रपीडितः। स्वराजसन्नि
धिं गत्वा चुक्रोशुर्व्यथितां भृशं १०० मृत्युकिंचुः। शृणु राजन्वचोस्माकं तवाग्रे यद्ब्रुवामहे। त्वदादेशा
द्वयं गत्वा मृत्युं संस्थाप्य दूरतः १ ब्राह्मणस्य समीपं तु मृकंडोः पौत्रस्य सत्तम। तं ध्यायमानं कमपि देवमेक
मनन्यमानसं २ गेहे न शक्तास्तत्वाश्चैव यसे सर्वे महात्मनो। यावन्तावन्महाकायैः पुरुषैस्तु शार्ङ्गिणः ३ वयं

ग्रा॰ पूतिगंधान्न मे सन्ति ते ॥३७॥ व्यास उ॰ ॥ इति संकीर्त्तिते विष्णो नारकैर्भक्तिपूर्वकं नरकाः पीडनाः सर्वे तेषां न च
महात्मनां ३८ दिव्यस्रग्धराः सर्वे दिव्यवस्त्रविभूषिताः। दिव्यगंधानुलिप्तांगाः दिव्याभरणभूषिताः ३९
ता नारोप्य विमानेषु दिव्येषु हरिपूरुषाः वाडंपित्वा यमं भुवं नीतास्ते केशवालयं ४० नारकेषु च सर्वेषु नी
तेषु हरिपूरुषैः। विष्णुलोकं यमो भीत्या नमस्चक्रे तदा हरिं ४१ यन्नामकीर्त्तनात्यातानारकाः केशवा
लयं। तन्नमामि महादेवं नारसिंहं महागुरुं ४२ तस्यवै नारसिंहस्य विष्णोरमिततेजसः। प्रणामं ये च कु
र्वंति तेषामपि नमो नमः। ४३ दृष्ट्वा प्रशांतं नरकाग्निमुग्रं यत्रादि सर्वं विपरीतमत्र पुनश्च शिक्षार्थितया स्मभृ
त्यान् यमो हि वक्तुं स्मृतवान्मनःस्वयं ॥४४॥ व्यास उवाच। स्वपुरुषमभिवीक्ष्य पाशहस्तं वदतियमः किलत
स्य कर्णमूले परिहर मधुसूदनप्रपन्नान्प्रभुरहमन्यनृणां नवैष्णवानां ४५ अहममरगणार्चितेन धा
न धात्रा यम इति लोकहिताय सन्नियुक्तः। हरिगुरुविमुखान्प्रशास्मि लोकान्हरिचरणप्रणतान्नमस्करोमि
४६ सुगतिमभिलषामि वासुदेवादहमपि भागवतैः स्थितांतरात्मा। मधुवधवशगोस्मि न स्वतंत्रः प्रभवति सं
यमनेमम।पिरुष्णः। ४७ भगवति विमुखस्य नास्ति सिद्धिर्विषममृतं भवतिनेदमस्ति। वर्षशतमपीह पच्यमानं
व्रजतिन कांचनतामयः कदाचित् ४८ नहि कलुषकृतेविः कदाचिद्विरमतिनोक्षुवितायमस्येति चंद्रः। भगव
ति च हराव नन्यचेता भृशमलिनोपि विराजते मनुष्यः ४९ विषधरकणभर्हाशंकरोक्तीहृशवलपंच शिखा
रू पादवाचः महदपि सुविचार्य लोकतत्वं भगवदुपास्तिमृतेनसिद्धिरस्ति ५० सुरपतिरसुरैः सदाभियुक्तः प
शुपतिरर्थविनीतमत्यवर्गः। सुरगुरुरहप्रसादकर्त्ता हरिचरणोन नमतां परं हितं तु ५१ शुभमिदमुपलभ्यम
चरिते

पु॰ सं॰

काश्मि॰ ६५

राम ६५

मेक्षणः। शरणं मुक्तिदो नृणां स त्वया किं न पूजितः २१ इत्युक्त्वा नारकान्सर्वान्पुनराह स किंकरान्। वैवस्व
तोयमः साक्षाद्विष्णुभक्तिविजृंभितः २२ नारदाद्यसविश्वात्मा ह्याहैवं विष्णुरव्ययः। अन्येभ्यो वैष्णवेभ्यश्च
सिद्धेभ्यश्च श्रुतिनः श्रुतं २३ तद्धत्प्रीत्या प्रवक्ष्यामि हरिवाक्यमनुत्तमं। सिद्धार्थी किंकराः सर्वे शृणुत प्रणत
हरेः २४ कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः। जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहं २५ पुंडरी
काक्ष देवेश नारसिंह त्रिविक्रम। त्वामहं शरणं प्राप्त इति यस्तं समुद्धरे॥२६॥ त्वां प्रपन्नोस्मि शरणं देव देव ज
नार्दन। इति यः शरणं प्राप्तस्तं क्लेशादुद्धराम्यहं २७ व्यास उ॰ इत्युदीरितमाकर्ण्य हरेर्वाक्यं यमेन तु। ना
रकाः कृष्ण कृष्णेति नारसिंहेति चुक्रुशुः। २८ यथा यथा हरेर्नाम कीर्तयंत्यत्र किंकराः। तथा तथा हरेर्भक्ति
मुद्वहंतो ब्रुवन्ति हे॥२९॥ नारका ऊ॰ चु॰ ॐ नमो भगवते वासुदेवाय केशवाय महात्मने भक्तिप्रियाय दे
वाय यज्ञाय हरये नमः ३० लोकनाथाय शांताय यज्ञेशायादिमूर्त्तये अनंतायाप्रमेयाय नारसिंहाय
ते नमः ३१ नारायणाय गुरवे शंखचक्रगदाभृते वेदप्रियाय महते त्रिविक्रम नमो नमः ३२ वाराहाया
प्रतर्क्याय यज्ञांगाय महीभृते महाद्युतिमते नित्यं ब्रह्मण्याय नमो नमः। ३३ वामनाय बहुज्ञाय वेदवे
दांगधारिणे। बलिबंधनदक्षाय वेदपालाय ते नमः ३४ विष्णवे सुरनाथाय व्यापिने परमात्मने च
तुर्भुजाय शुद्धाय शुद्धद्रव्याय ते नमः ३५ जामदग्न्याय रामाय दुष्टक्षत्रांतकाय च। रामाय राव
णांताय नमस्तुभ्यं महात्मने ३६ अस्मानुद्धर सहात्म्य स्मनारसिंह जनार्दन अस्मानुद्धर गोविंद ६५

स्मरते नित्यं सर्वपापैः प्रमुच्यते ६४ स्मृतो वा पूजितो वापि ध्यातो वानमितोपि वा। नाशयत्येव पापानि वि
ग्रा॰ ष्णुरेव सनातनः ६५ संपर्काद्यदि वा मोहाद्यस्तु पूजयते हरिं। सर्वपापविनिर्मुक्तः प्रयाति परमं पदं ६६
सकृत्संस्मरणाद्विष्णोर्नश्यति क्लेशसंचयः। स्वर्गादिभोगप्राप्तिस्तु तस्य विघ्नोनुमीयते ६७ वाराहे मथु
रामाहात्म्ये। इह जन्मकृतं पापं अन्यजन्मकृतं च यत् तत्सर्वं नश्यते शीघ्रं कीर्तने केशवस्य तु ६८ किं तस्य
बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने नरके पच्यमानस्य गतिर्ईश्वो जनार्दनः ६९ स्कांदे ब्रह्मखंडे मेघवा
हननतापितान् ऋषीणां विष्णुस्तुतौ। यथा हि वासुदेवेति प्रोक्ते नश्यति पातकं। तथा विलयमभ्येतु दै
त्यायं मेघवाहनः। यथानविष्णुभक्तेषु पापमाप्नोति संस्थितिं ७० तथा स्मृतमात्रो तथा विष्णुः सर्वपा
पं व्यपोहति॥ रेवाखंडे च॥ संसारार्णवमग्नानां नराणां पापकर्मिणां। नैवोद्धर्ता जगन्नाथं विना नाराय
पु॰सं॰ णं प्रभुं ७१ येनार्चितो भगवाननंतो देवो जन्मार्जितं नश्यति तस्य पापं स याति लोकं गरुडध्वजस्य विधू
६६ तपापः सुरसंघपूज्यः। ७२ शाठ्येनापि नमस्कारं प्रकुर्वन् शार्ङ्गपाणिनः। शतजन्मार्जितं पापं गच्छत्या कुर्वन्
शु न संशयः ७३ भारते राजधर्मे च भीष्म उवाच॥ ईश्वरं सर्वभूतानां जगतः प्रभवाप्ययं। भक्ता नाराय
णं देवं दुर्गाण्यतितरंति ते ७४ य एष पद्मरक्ताक्षः पीतवासा महाभुजः। सुहृद्भ्राता च मित्रश्च संबंधी च
तवाच्युतः ७५ य इमांस्सकलाँल्लोकान् चर्मवत्परिवेष्टयेत्। इह प्रभुरचिंत्यात्मा गोविंदः पुरुषोत्तमः। राम
७६ स्थितः प्रिये हिते नित्यं स एष पुरुषर्षभः। राजंस्तव यदुश्रेष्ठो वैकुंठः पुरुषोत्तमः ७७ य एनं सं ६६

66

ग्रा·

स्मरते नित्यं सर्वपापैः प्रमुच्यते ६४ स्मृतो वा पूजितो वापि ध्यातो वा नमितोपि वा। नाशयत्येव पापानि वि
ष्णुरेव सनातनः ६५ संपर्काद्यदि वा मोहाद्यस्तु पूजयते हरिं। सर्वपापविनिर्मुक्तः प्रयाति परमं पदं ६६
सकृत्संस्मरणाद्विष्णोर्नश्यति क्लेशसंचयः। स्वर्गादिभोगप्राप्तिस्तु तस्य विघ्नोनुमीयते ६७ वाराहे मथु
रामाहात्म्ये इह जन्मकृतं पापं अन्यजन्मकृतं च यत् तत्सर्वं नश्यते शीघ्रं कीर्तने केशवस्य तु ६८ किं तस्य
बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने नरके पच्यमानस्य गतिर्हि वा जनार्दनः ६९ स्कांदे प्रभासखंडे मेघवा
हं नन्ता पिता नौ ऋषी तां विष्णुस्तुतौ। यथा हि वासुदेवेति प्रोक्ते नश्यति पातकं। तथा विलयमभ्येतु दे
त्यायं मेघवाहनः। यथा न विष्णुभक्तेषु पापमाप्नोति संस्थिति ७० तथा स्मृतमात्रो तया विष्णुः सर्वपा
पं व्यपोहति॥ रेवाखंडे च॥ संसारार्णवमग्नानां नराणां पापकर्मिणां। नैवोद्धर्ता जगन्नाथं विना नाराय
पु·सं· णं प्रभुं ७१ येनार्चितो भगवान् नैत्ते देवो जन्मार्जितं नश्यति तस्य पापं स याति लोकं गरुडध्वजस्य विधू
६६ तपापः सुरसंघपूज्यः। ७२ शाठ्येनापि नमस्कारं प्रकुर्वं चक्रपाणिनः। सप्तजन्मार्जितं पापं गच्छत्या कुर्वन्
शु न संशयः ७३ भारते राजधर्मे च भीष्म उवाच॥ ईश्वरं सर्वभूतानां जगतः प्रभवाव्ययौ। भक्त्या नाराय
णं देवं दुर्गाण्यतितरंति ते ७४ यदेष पद्मरक्ताक्षः पीतवासा महाभुजः। सुहृद्भ्राता च मित्रं च संबंधी च
तवाच्युतः ७५ य इमांस्तु कलां लोकान् चर्मवत्परिवेष्टयेत्। इह प्रभुरचिंत्यात्मा गोविंदः पुरुषोत्तमः। राम
७६ स्थितः प्रिये हिते नित्यं स एव पुरुषर्षभः। राजंस्तव यदुश्रेष्ठो वैकुंठः पुरुषोत्तमः ७७ य एनं सं ६६

ताहितेनियुक्तः हरिगुरुवशगोऽस्मिन्न स्वतंत्रः प्रभवति संयमने ममापि विष्णुः ९२ हरिममरवरार्चितांघ्रिपद्मं
प्रणमति यः परमार्थतो मनुष्यः। तमपगतसमस्तपापबंधं व्रजपरिहृत्य यथाग्निमाज्यसिक्तं ९३ भी अव
प्रा० कं। यस्य विष्णुमते नान्यत्त्राणं संसारसागरे। किंकरा दंडपाशास्त्रा न यमो न च यातना। ९४ समर्थोऽत्त
स्य यस्यात्मा केशवालंबनः सदा। ष्टे द्विती ये ध्याये विष्णुदूतानां वाक्यं। अयं हि कृतनिर्वेशो जन्मको
ट्यंहसामपि। यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ९५ एतेनैव ह्यघोनोऽस्य कृतस्यादघनिष्कृतं
यदा नारायणायेति जगाद चतुरक्षरं ९६ स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः। स्त्रीराजपितृगो
हंता ये च पातकिनोऽपरे ९७ सर्वेषामप्यघवतामिदमेव सुनिष्कृतं। नामव्याहरणं विष्णोर्यतस्तद्विष
यामतिः ९८ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुध्यत्यघवान्व्रतादिभिः। यथा हरेर्नामपदैरुदा
पु॰ सं॰ हृतैस्तदुत्तमश्लोकगुणोपलंभकं ९९ नैकांतिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे तत्क
६७ र्मनिर्हारमभीप्सितां हरेर्गुणानुवादः खलु सत्त्वभावनः। २०० अथैनं मापनयत कृताशेषाघनिष्कृतिं
यदसौ भगवन्नाम म्रियमाणः समग्रहीत १ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा। वैकुंठनामग्रहण
मशेषाघहरं विदुः २ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः। हरिरित्यवशेनाह पुमान्नार्हति या
तनां ३ गुरूणां च लघूनां च गुरूणि च लघूनि च। प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः। ४ राम
तैस्तान्यघानि पूयंते तपोदानजपादिभिः नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ५ अज्ञानादथ ६७
वाज्ञानादुत्तमश्लोकनाम यत् संकीर्तितमघं पुंसो दहेदेधो यथानलः। ६ यथागदं वीर्यतममुप

नमइतिशेषः कर्मणि

अयानीहं भक्त्या नारायणं हरिं । तेन रतीह दुर्गाणि नेमे न्नास्ति विचारणा ॥ १८ अस्मिन्नपि कुर्वाणः सर्वभा
वेन सर्वदा कर्मेकमलपत्राक्षं दुर्गाण्यतितरंति ते १९ ॥ पाद्मे ॥ यस्य स्मरणमात्रेण महापातकसंततिः । नरा
णामंतमाप्नोति स एको हरिरुच्यते ८० यमवाक्यं ॥ नान्यत्पश्यामि जंतूनां विहाय हरिकीर्तनं । सर्वपापप्र
शमनं प्रायश्चित्तं द्विजोत्तम ८१ वाराहे ब्रह्मवाक्यं । प्रायश्चित्तानि सर्वाणि तपःकर्मात्मकानि वै यानि तेषाम
शेषाणां कृष्णानुस्मरणं परं ॥ ८२ ॥ प्रातर्निशि तथा सायं मध्याह्नादिषु संस्मरन् । नारायणमवाप्नोति सद्यः पाप
क्षयं नरः ॥ ८३ ॥ विष्णुसंस्मरणाद्देवसमस्तक्लेशसंक्षयात् । मुक्तिं प्रयाति स्वर्गाप्तिः तस्य विघ्नो न मीयते ॥ ८४ ॥ पा
द्मे ॥ प्रमादादपि संस्पृष्टो यथा नलकणो दहेत् । तथौष्ठपुटसंस्पृष्टं हरिनाम दहेदघं ८५ षष्ठे प्रथमेध्याये
केचित्केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वंति कात्स्न्येन नीहारमिव भास्करः ८६ न तथा ह्यघवान्
राजन्पूयेत तपआदिभिः यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया ८७ सध्रीचीनो ह्ययं लोके पंथाः क्षेमो
कुतोभयः । सुशीलाः साधवो यत्र नारायणपरायणाः ८८ व्यतिरेकतस्तत्रैव । प्रायश्चित्तानि चीर्णानि नारायणप
राङ्मुखं । न निःपुनंति राजेंद्र सुराकुंभमिवापगाः ८९ सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यै
रिह । न ते यमं पाशभृतश्च तद्भटान्स्वप्नेपि पश्यंति हि चीर्णनिष्कृताः ९० अजामिलइतिहासोत्र द्रष्टव्यः
वैष्णवे तृतीयेंशे यमकिंकरयोः संवादे । स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले परिह
र मधुसूदनप्रपन्नान्प्रभुरहमन्यनृणां न वैष्णवानां ९१ अहममरगणार्चितेन धात्रा यम इति लोकहि

मुक्तं यदृच्छया। अजानतो प्यात्मगुणं कार्यो ऽग्निर्यथोपदाहतः। ७ तत्र यमः। एतावतालमघनिर्हरणाय पुं
सां संकीर्त्तनं भगवतो गुणकर्मनाम्नां विक्रुश्य पुत्रमघवान्यदजामिलोपि नारायणेति म्रियमाण इ
याय मुक्तिं ८ तत्र शुकवाक्यं॥ तस्मात्संकीर्त्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विद्ध्यैकां पापानां
तिकनिःकृतं ९ श्रृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः। यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादि
भिः १० वैसवेबऐशे समाप्तसमये। दशवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः। पुमान्विमुच्यते सद्यः
सिंहत्रस्तैर्मृगैरिव। ११ यन्नामकीर्तितं भक्त्या विलापनमनुत्तमं मैत्रेयाशेषपापानां धातूनामिव पावकः १२
कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणां प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते १३ हिरण्यग
र्भदेवेन्द्ररुद्रादित्याश्विवायुभिः। किंनरैर्वसुभिः साध्यैर्विश्वेदेवादिभिः सुरैः १४ पाद्मे माघमहात्म्ये
कुंडलविकुंडलयमदूतानां संवादे यमदूतानां वाक्यं। श्रूयतामद्भुतं ह्येतत्तद्रहस्यं वैश्यसत्तम। समं
तेराजस्य सर्वलोकाभयप्रदं १५ न यमं यमलोकं च न दूतान्घोरदर्शनान्। पश्यंति वैष्णवा नूनं सत्यं
सत्यं मयोदितं १६ आहास्माननुना भ्राता सादरं हि पुनः पुनः। भवद्भिर्वैष्णवास्त्याज्या नो तेषु भिमगोचरे
१७ ये स्मरंति सकृद्भक्त्या प्रसंगेनापि केशवं ते विध्वस्ताखिलाघौघा यांति विष्णोः परं पदं १८ दु
कुलोपि दुराचारः सदा पापरतोपि वा। भवद्भिः सर्वथा त्याज्यो विष्णुं चेद्भजते नरः १९ वैष्णवो य ६०
द्गृहे भुंक्ते येषां वैष्णवसंगतिः तस्यैव परिहार्यस्तु तत्संगहतकिल्बिषः २० इति वैश्यानुशास

स्मात् देवो दंडधरः सदा। अतो न वैष्णवो याति राजधानीं यमस्य च २१ विष्णुभक्तिं विना नृणां पा
प्र॰ पिनां विशांवर। उपायो नास्ति नास्त्यन्यः संतर्त्तुं नरकांबुधिं २२ गोविंदेति जपन्यस्तु कुत्रचि
न्म्रियते यदि। स नरो न यमं पश्येत्तं च नेक्षामहे वयमिति २३ पाद्मे उत्तरखंडे रुद्रवाक्यं वकोजल
चरान्भक्षन्मंडूकादींश्च वर्ज्जयेत् तथा यमः सर्वहंता वर्ज्जयेत्वैष्णवान् २४ वृहन्नारदी
ये सूतवाक्यं। अवशेनापि यन्नाम्नि कीर्त्तिते वा स्मृतेपि वा विमुक्तः पातकैः सर्वैः परमं पदमा
प्नुते २५ संसारघोरकांतारदावाग्निर्मधुसूदनः। स्मर्त्तृणां सर्वपापानि नाशयेत्वाशु सत्तमाः
पु॰सं॰ ६८ २६ स्कांदे काशीखंडे पुलस्त्यवाक्यं। यस्य स्मरणमात्रेण महापातकसंततिः परमातंकमाप्नोति नासं
स विष्णुः सर्वदा ध्रुवः २७ वासुदेवजपासक्तानपि पापकृतो जनाः। नोपसर्पंति वै विप्रा यम
दूतास्सुदारुणाः २८ काशीखंडे ध्रुववाक्यं। महापापानि गोविंद वहुजन्मार्जितान्यपि। स
यां द्यो विलयमायांति श्रीवासुदेवेति कीर्त्तनात् २९ प्रथमस्कंधः। श्रृण्वतां स्वकथां कृष्णः पु
ण्यश्रवणकीर्त्तनः। हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां ३० तृतीये ब्रह्मवाक्यं॥
यस्यावतारगुणकर्मविडंवनानि नामानि येऽसुविगमे विवशा गृणंति॥ ते नैकजन्मशमलं सहसै राम ६८
व हित्वा संयांत्यनावृतमृतं तमजं प्रपद्ये ३१ षष्ठे वृत्रवधे इंद्रप्रति ऋषीणां वाक्यं॥ ब्रह्महा पितृहा
गोघ्नो मातृहाचार्यहाघवान्। श्वादः पुल्कसको वापि शुद्ध्येरन्यस्य कीर्त्तनात् ३२ षष्ठे चित्रकेतु

त्रिः ४४ वायुपुराणे माघमहात्म्ये शांडिल्यवाक्यं। अष्टाविंसतिं सुयज्ञं प्रति॥ कलौ कलु
प्रा० षचित्तानां नराणामल्पमेधसां गुणसंकीर्तने विष्णोः सकलाध्ययनसंततिः ४५ विष्णोरेकै
कनामापि सर्ववेदाधिकं मतं। नाम्नि संकीर्त्यते नित्यं किं तस्य सुकृतैः परैः ४६ याशक्तिः पा
पनिर्हारे नाम्नोऽस्ति महती विभोः। तावत्कर्तुं न शक्नोति पातकं पातकी जनः ४७ घोरे प
णः कारितं वापि स्कृतं नामाप्यवाचकः। नयत्यूर्ध्वं न संदेहो नरकस्थानपि ध्रुवं ४८ न जानंति जनाः
किं वा नारदस्य महात्मनः वसंतं यमलोके तु नारकाणां समुद्धृता ४९ अष्टाविंशति पुरुषा ऊचुः
किं व्यधाद्यमलोके तु नारदो भगवान्मुनिः कथं वा मुक्तनारकाणामुद्धारः पापकर्मणां ५० एतदुह
न्वदाश्चर्यं परं कौतूहलेहिनः॥ शांडिल्य उ०॥ कदाचिद्दृष्टलोकोऽयं यमस्य च महात्मनः सद्रष्टुमा
पु.सं. मयेदानीं नरकाश्चापि दारुणाः ५१ विचार्यैवं ययौ धीमान्यमलोकं दुरासदं तत्रापश्यन्मुनींद्रो
६९ सौ पुरीं संयमनीं महान् ५२ नरकान्दारुणांश्चैव भृशमाक्रंदितान्नरान्। तान्दृष्ट्वा कृपयाविष्टो
भगवान्नारदो मुनिः ५३ आपि विस्मयमापन्नो वाक्यमेतदुवाच ह। नारायणेति मंत्रोऽस्ति वागस्ति
वशवर्त्तिनि तथापि नरके घोरे पतंतीत्येतदद्भुतं पापानां हीनकर्मणा अलसानां दुरात्मनां जीव राम
नं हरिनामैव गतिर्नान्याहि विद्यते। विचार्यैवं सुदुःखेन कृपयाकुलचेतनः। शिलामास्थाय महतीं ६९
वीणामादाय सुस्वरं। स जगौ हरिनामानि भृशमुच्चैर्मुदान्वितः ५४ गोविंद नारायण वासुदेव मु

वाक्यं ॥ न हि भगवन्न घटितमिदं त्वद्दर्शनान्नृणां सकलपापक्षयः यन्नामसकृच्छ्रवणात्पुक्कसो
पि विमुच्यते संसारात् ॥ ३३ ॥ सप्तमे नारदः ॥ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः । आवेश्य तदघं हि
त्वा बहवस्तद्गतिं गताः ३४ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः । संबंधाद्वृष्णयः स्नेहाद्यूयं
भक्त्या वयं विभो ३५ तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् । द्वितीये शुकवाक्यं ॥ यत्कीर्तनं यत्स्म
रणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं । लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो
नमः ॥ ३६ किरातहूणांध्रपुलिंदपुक्कसा आभीरकंका यवनाः खसादयः । येन्ये च पापा यदुपाश्रयाः
शुध्यंति तस्मै प्रभविष्णवे नमः ३७ अष्टमे ऽदितिर्हरिं प्रति ॥ महापातकयुक्तोपि यन्नामस्मृतिमात्र
तः प्रयाति मुक्तिं देवेश तं कथं धारयाम्यहं ३८ द्वादशे सूतः ॥ पतितः स्खलितश्चार्तः क्षुत्त्वा वा विव
शो ब्रुवन् हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ३९ संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्य
सनं हि पुंसां । प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोर्कोभ्रमिवातिवातः ४० सहस्रनामभाष्ये शंक
राचार्यैरपि पुराणवाक्यानि लिखितानि । शमायालं जलं वह्नेस्तमसो भास्करोदयः । शांतिः कलेरघौ नाशः
घस्य नामसंकीर्तनं हरेः ४१ हरेर्नामैव नामैव नामैव मम जीवनं । कलौ नास्त्येव नास्त्येव नास्त्येव
गतिरन्यथा ४२ स्मृत्वा विष्णुं वासुदेवं विपापो जायते नरः विष्णोः संपूजनान्नित्यं सर्वपापं प्र
णश्यति ४३ कलावत्यंतदोषाढ्ये विषयासक्तमानसः । कृत्वापि सकलं पापं गोविंदं संस्मरन्मु

हेसर्ववर्णसुखावहं चातुर्वर्ण्यस्य वक्ष्यामि दीक्षामेव यशस्विनि ७ तरंति मनुजा येन गर्भसंसारसा
दी० गरात्। मयि शांतं मनः कृत्वा तत्प्रकृत्तं वसुंधरे ८ अभिगच्छेद्गुरुं देवि शाधि शिष्योस्म्यहं तव ततो गुरु
णानुज्ञातः पश्चाद्द्रव्याणि आहरेत् ९ लाजान्मधु कुशांश्चैव घृतं अमृतसंमितं धूपगंधांश्च माल्यां
श्च पालाशं दंडं तथेष्टिकं १० चर्म कृष्णाजिनं चैव घटं चैव कमंडलुं। वासांसि पादुकांश्चैव वस्त्रं क्षौप
वीतकं ११ पवित्रमर्घपात्रं च चतुष्कोली चदर्भिकां। तिलान्व्रीहियवांश्चैव विविधांश्च फलोदकान् ॥१२॥
भक्ष्यभोज्यान्नपानांश्च कर्मण्येव च संचयान्। दीक्षिता यदि भुंजंति मम कर्मपरायणाः १३ यानि कानि
पु॰ सं॰ ७० च वीजानि रत्नानि विविधानि च। कनकादीनि सुश्रोणि तानि शीघ्रमुपाहरेत् १४ पायसं च गुडं चैव कृ
मिपीडितं क्षतः। कर्मण्याम्नत कल्याणि तत एव मुपाहरेत्। १५ एतान्येवोपहाराणि कर्मण्यश्च यशस्वि
नि पूर्णपात्राण्विशालाक्षि ततश्च्युत्यानि कारयेत् १६ सौवर्णं रजतं चैव ताम्रं मृण्मयकानि च। तानि
संहारयेत्तत्र गुरु मूलेन संशयः। १७ स्नात्वा मंगलसंयुक्तो दीक्षाकामश्च ब्राह्मणः। गुरोश्चरणौ संगृह्य
ब्रूयात् किं करवाणि ते १८ प्रसन्नो मे भव त्वं च कुर्यान्मम प्रियं। ततो गुरुमनुज्ञातो वेदीं कुर्याच्च मं राम
डलं १९ ब्राह्मणो दीक्षमाणस्तु चतुरस्रांस्तु षोडशं मम संस्थाप्यते तत्र यत्र तुर्थान्त विद्यते २० कर्म ७०
णा विधिदृष्टेन मम तत्रैव चार्चयेत् तत्रार्चनविधिं कृत्वा गुरुः कर्म विनिश्चयात् २१ यानि कानि च

कुंदकृष्णार्ज्जुनमाधवेति नृसिंहदेवेशहरे मुरारे रमेश लोकेश जगन्निवास ६० अनंतवैकुंठ दुरंत
शक्ते समस्तलोकस्य निदानमूर्ते। निरंतरानंतगुणाकरेश चिद्रूप निःशेषजगद्विहार ६१ निरूप
नित्याव्यय निर्विकार निराश्रयानंतविचित्रकर्मन् दाशार्ह कृष्ण गरुडवाहन वारिजाक्ष नाराय
णाखिलगुरो जगतामधीश ६२ विश्वोदयस्थितिलयो नितिप्रदेति गायन्मुमोद मुदमापितवान्
जनानां। तच्छ्रुत्वा नरकस्था मे हरेर्नामामृतं शुभं ६३ उत्तस्थुर्नरकान्मुक्तपाशास्ते सर्वजंतवः त
द्गुणास्तु एवकोरूढाः दिव्यरूपा मनोरमाः ६४ दिवं जग्मुः प्रांजलयः स्तुतो नारदं मुनिं २६५ श्री

श्रीमत्पुराणसंग्रहाख्ये मिनवप्रकरणे सर्वप्रायश्चित्ते हरिनामप्रधाने सर्वपुराणग्रथनरूपो षष्ठप
रिच्छेदः॥ अथ चतुर्णां वर्णानां भगवद्दीक्षायामधिकारः। तथा चोक्तं वाराहे॥ धरण्युवाच केन धर्मवि
धानेन दीक्षा लभ्यंत पुष्कला। एवं मे परमं गुह्यं परं कौतूहलं च मे १ धर्मसंहरणार्थाय तद्भवान्वक्तुम संग्रहणार्थाय
र्हसि। ततो महात्मा वचः श्रुत्वा मेघदुंदुभिनिस्वनः २ वाराहरूपी भगवान्प्रत्युवाच वसुंधरां॥ वारा
होवाच॥ शृणु तत्त्वेन मे देवि मम धर्मं सनातनं ३ देवा अपि तं न जानंति ये च योगव्रते स्थिताः। इमं धर्मं वरारो
हे मम अंगविधिनिःसृतं ४ अहमेको विजानामि मद्भक्ताय च वैष्णवाः यच्च पृच्छसि मे भद्रे दीक्षा भागवती क
थं ५ तच्छृणुष्व वरारोहे कर्मसंसारमोक्षणं। दीक्षातो लभते कश्चित्पुनः संसारमोक्षणं ६ मया तत्तु वरारो

शिष्यतन्विवर्ज्जयेत्तउक्तायेचान्यपातकाः ३७ शालपात्रेनभोक्तव्यंनछेत्तव्यंकदाचन। अश्वत्थंच
टी· वटंचैवनछेत्तव्यंकदाचन ३८ नछेत्तव्यंबिल्ववृक्षोदुंबरंचकदाचन। कर्मण्यपिविवर्जयेत्कांसे
नयोज्यमनीषिणा ३९ तेषुशिष्यनगच्छेतकदाचिद्व्यसंशयः यदिच्छेत्परमांसिद्धिंमोक्षंधर्म्मं
सनातनं। ४० मद्यमांसंचतेशिष्यैर्वर्जितव्यंतदंतरे। करीरस्यफलंशस्तंफलान्यौदुंबरस्यच ४१
सद्योमद्यांभवेत्तेनअभक्ष्याःपूतिवासकाः भुक्त्वामांसेवराहस्यमत्स्यांश्चसकलेरिताः ४२ अभ
क्ष्याब्राह्मणीश्चैतदीक्षितैर्हिनसंशयः परिवादंनकुर्वीतनहिंसांवाकदाचन ४३ पैशुन्यंनचकर्त्त
व्यंमनसान्येनवाक्वचित। अतिथिंचागतंदृष्ट्वादूराध्वानगतंक्वचित ४४ संविभागस्तुकर्तव्योयेन
पु·सं० केनापिपुत्रक। गुरुपत्नीराजपत्नीब्राह्मणीवाकदाचन ४५ मनसापिनगंतव्याएवंविष्णुःप्रभाष
७२ ते। कनकादीनिरत्नानिर्योवनस्थाचयोषितां ४६ तत्रचित्तंनकर्तव्यंएवंविष्णुःप्रभाषते। दृष्ट्वा
६६ परस्यभाग्यानिश्मात्मानंविसनंतथा। तत्रमन्युर्नकर्तव्यमेवंधर्म्मःसनातनः। ४७ एवंततःश्राव
यित्वादीक्षाकामान्वसुंधरे छत्रंचोपानहंचैवमनसाचोपकल्पयेत ४८ द्रोहोदुंबरपात्रान्वैवेदी
मध्येप्रस्थापयेत छुरंचैववरारोहे। जलपूर्णंचभाजनं ४९ मनोवाक्कानयेद्भूमिंमंत्रेणविधिनार्च राम
येत॥ ॐ मंत्रः॥ सप्तद्वीपेचसप्तपर्वताश्चसप्तसागरादशास्वर्गासहस्रासमस्ताश्चनमोस्तुसर्वसे ७१
हृदयेवसतियश्चैतद्विपितियश्चपुनरुन्नमति ॐभगवद्वासुदेवनयेतस्मरयउक्तं। वाराहरूप

द्व्याणीवेदिमध्यमुपाहरेत् चतुरः कलशांदत्वा चतुःपार्श्वेषु सुंदरि २२ वारिपूर्णान्शुभान्सिद्धान्
सहकारविभूषितांश्च॥ सर्वतः शुक्लसूत्रेणा वेष्टयेत्तत्तथा नघे २३ पूर्णपात्राणि चत्वारि चतुःपार्श्वे
षु स्थापयेत् एवं मंत्रे ततः कृत्वा द्रव्यदीक्षां गुरुर्याजकाः २४ साचमात्राम्य यथान्यायं येन वा लभ्यते गुरुः
यथान्यायेन संगृह्य गुरुकर्मविनिश्चितः २५ पापस्य शपथं विमोक्षं दीक्षां परिकांक्षिणः उपस्पृश्य य
थान्यायं कृत्वा पूर्वामुखं ततः २६ सेवीषं श्रावयेच्छिष्यान्दीक्षार्थं न संशयः। यस्तु भागवतान्दृष्ट्वा भ
त्वा भागवतः शुचिः २७ अभ्युत्थानं न कुर्वीत अहं तेनापि हिंसितः। ब्राह्मणी नैव गच्छेत गुरुदारान्कदा
चन।२८ न्यासं चैव न हिंसेत नैव गच्छेद्द्रु हस्तलां भूमिदानं च यो दद्यात्पुनश्चाहरते नरः।२९ दास्या
मीति पुनश्चान्यस्मै न देयमिति भाषते। अमावस्यां तु यो मूर्खो दंतकाष्ठं तु भक्षयेत् सोमस्तु हिंसितस्तेन
पितरश्चैव सर्वशः ३० कामभोगपराशक्ताः पुरुषाः पंचपर्वसु प्रमदां येतु गच्छंति आदित्यास्तेस्तु हिंसि
ताः ३१ जलमध्येषु ये गत्वा पुरीषं संप्रमुंचंति। वरुणो हिंसितस्तेन एवमेतन्न संशयः ३२ दिने तु
मैथुनं गच्छेत आकाशे कामसंमोहितः। आदित्या वसवो रुद्राः सोमस्तेन हिंसितः ३३ गावः स्पृशति पा
देन यः कश्चित्कुलपांशनः। अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः ३४ भार्यां प्रियसखीं यस्तु
साध्वीं हिंसति निर्घृणः। न तेषां पुनरावृत्तिर्हिंसिते ये वसुंधरे ३५ स्वसीस्ते यं गवां श्चैव यो न तं कुरुते
नरः न तेषां पुनरावृत्तिर्हिंसितस्यापि सुंदरि। ३६ ब्रह्मघ्नश्च कृतघ्नश्च गोघ्नश्च पापपूरुषाः। एतां

लक्षणोदीक्षणांपुनः गुरुं प्रसादयेत्तत्र मंत्रेण विधिनार्चयेत् ॥ ६५ ॥ त्रयः प्रदक्षिणां कृत्वा देवं भागवतं
टी० गुरुं ॥ गुरोश्चरणौ गृह्य इमं मंत्रमुदीरयेत् ॥ ६६ ॥ ॐ नमंत्रः ॥ गुरो देवप्रसादेन लब्ध्वा दीक्षा यदृच्छया ॥
येनेत्थापकृतं किंचिद् दुष्कर्म क्षम्यतां मम ॥ ६७ ॥ एवं प्रसाद्य शिलिवातु(?) शिष्यो मंत्रेण सुंदरि ॥ वेदीमध्ये स्थाप
यित्वा पूर्वामुखं ततः ॥ ६८ ॥ शिष्यमेव ततो दद्यात् गृह्य चैव कमंडलुं ॥ मुक्तं यज्ञोपवीतं च इमं मंत्रमुदीर
येत् ॥ ६९ ॥ ॐ विष्णुप्रसादेन गतो सिद्धिं प्राप्य च दीक्षां सकमंडलुं च । गृह्य कराबुभाभ्यां युक्तो सिकर्मी
णः ॥ क्रियायाश्चैवामुखं पदं ततः कृत्वा दक्षिणेन गुरुं पातया ॥ ७० ॥ सर्वं प्रदक्षिणं कृत्वा इमं मंत्रमुदाह
रेत् । ॐ धोय यदहं भाग्यलब्धो गुरुः विष्णुदीक्षा च लब्ध्वा तव प्रसादाच्च गुरो धियां वर एतेन मंत्रेण सुखं
यदं कारयेत् । शौचमेकेन वै कुर्याद् देवदेवं तु वाससी । एवं वै विष्णुमादत्ते गृह्य वस्त्रकमंडलुं । इमं लोके
पु०सं० पु विख्यातं शोधनं सर्वकर्मसु ७२ गृहीत्वा गंधपत्राणि सर्वगंधसुखोचितं सर्वं वै स्नवकं गुरुं सर्वसंस
७२ रमोक्षणं । ७३ गृह्य वै मधुपर्कं वै प्राप्य कायविशोधनं । उभौ चरणौ गृह्य उपाध्यायोपकल्पयेत् ॥ ७४ ॥
शिरसा चांजलिं कृत्वा मनश्चैव सुसंयुतं । ॐ अंघ्रिं गृह्य यथान्यायं इमं मंत्रमुदाहरेत् ॥ ७५ ॥ प्राप्तवंतु
ते भागवता सर्वे गुरुः स्वामी कृपयां चकार । ॐ अहं शिष्यो दासभूतस्त्वं चैव देवसमो ध एवं यथोपपन्न राम
७६ एष मा ... सर्वं वर्णबुद्धी [illegible] भूमिं विजानतः । त्रयाणामत्र वर्णानां कुर्यात्त्वन्या विधीयते ॥ ७७ ॥ एत ७२
न विधानेन दीक्षा यतव सुंधरे । उभयोः प्राप्नुयात् सिद्धिं आचार्यः शिष्य एव च ॥ ७८ ॥ इति श्री वाराह पु
राणे गवक्षो [illegible] बृहन्नारदीक्षासूत्रं नाम [illegible] वाराह ८० ॥ [illegible] त्रियस्य प्रवक्ष्यामि तच्छृणु हि वसुंधरे [illegible]

स्पृष्ट्वा पृथिव्यां यान्तु मंत्रमनुस्मरणं च॥ यं आज्ञापयेयान्तु भावनास्माकमज्ञस्तमनु चिंतयित्वा। भगव
न्नागच्छ विप्रादीक्षाकामस्त्वत्प्रसादमुदीरयेति॥ एतन्मंत्रमुदाहरित्वा शिष्यमिर्ज्ञानुर्भ्मिंगत्वा भवि
तव्यं॥ ॐ स्वागतं स्वागतं भवानिति॥ तत्र एतेन मंत्रेण आनयित्वा वसुंधरे॥ अर्घपाद्यं दातव्यं मं
त्रेण विधिना श्रुयात॥ अकृतघ्नं देवानसुराकृतघ्नं रुद्रेण ब्रह्मणा यचल ध्यम घंइमं भगवते स्कंदं
प्रतीच्छ॥ ५५॥ कृत्स्न च लोकनाथ॥ एवं भूमिंततो दत्त्वा अर्घपाद्यं च कर्मणः॥ स्फुरकर्मसु रहस्यं मयान्याय
मिमं मंत्रमुदीरयेत॥ ५६॥ ॐ मे चः॥ एवं तु वरुणः पातु शिष्यं क्लेदयत्तः शिरः। जलेन विमुशात्तेन दीक्षा
संसारमोक्षणं॥ ५७॥ एतस्य कलशं दद्यात्कर्मकारस्य सुंदरि॥ निःकलं तु शिरः कृत्वा शोणितेन विव
र्जितं॥ ५८॥ पुनः स्नानं ततः कृत्वा शीघ्रमेव न संशयः॥ एतस्य विविधं कृत्वा दीक्षाकारस्य सुंदरि॥ ५९॥
दत्वा संसारमोक्षाय सर्वकामविनिश्चितः। जानुभ्यामवनिं गत्वा इमं मंत्रमुदाहरेत्॥ ६०॥ ॐ मंत्रः॥ वे
दाभिभोभागवतो स्नुसर्वीनसुदीक्षितायगुरव अपूर्वविस्मृप्रसादेन चल ध्वदीक्षा मम॥ प्रसीद त्वं न
मामि सर्वीन॥ ६१॥ नमामि त्वा भव भक्त्या॥ प्रज्वाल्य वकुताशनं। घृतेन मधुमिश्रेण लाजाक्षतिले
न च॥ ६२॥ सप्तवारं ततो दद्यात् विशं चैव प्रमोदनं॥ जानुभ्यामवनिं गत्वा इमं मंत्रमुदीरयेत्॥ ६३॥ ॐ मंत्रः॥
अग्नि नैचदिशः सोमः सूर्यस्तु सा हि पाचं चयं प्रसन्नाः॥ अथ एवं तु मेमहृवा वाक्यं ददामि॥ सत्येन धा
र्यते भूमि सत्येन तिष्ठते भूमि सत्येन गच्छते स्वैर्यावायुः सत्येन वायाति॥ ६४॥ एवं सत्यं ततः कृत्वा बु

दी०

रंदंडकाष्ठं गृह्य हस्तेन दक्षिणे ९५ कुर्याद्भगवतामुक्तान त्रीणि वारं प्रदक्षिणं। जानुभ्यामवनिं ग
त्वा इमं मंत्रमुदाहरेत् ९६ अहं वैश्यो भवतामनुप्रागतः प्रमुच्य कर्माणि च वैश्ययोगं। दीक्षा च लब्धा
भगवत्प्रसादात्। प्रसीद संसारतरोहि मोक्षणं ९७ नमेति एवं तत स्तुत्वा मम कर्मप्रसादनात्। गु
रोश्च चरणौ गृह्य इमं मंत्रमुदाहरेत्। ९८ त्यक्त्वा वैश्यभृंगार त्वा वाणिज्यं क्रयविक्रयं। लब्धा च तत्प्र
सादेन विष्णुदीक्षा प्रकारयेत् ९९ इत्वाभिवादनं कृत्वा पुरो भागवतेषु च। पश्चात्तु भोजनं दद्या
त्परापराधवहिः कृतं १०० एवं दीक्षा तु वैश्यानां मम कर्मपरायणः। येन मुच्यति सुश्रोणि घोरसंसा
रसागरात् १ शूद्रस्यापि प्रवक्ष्यामि मद्भक्तस्य वरांगने। यां तु दीक्षां समासाद्य मुच्यते सर्वकिल्बिषैः।
पु॰सं॰ ७३ २ सर्वद्रव्याणि संस्कारान्मे मया पूर्वं भाषितानः। दीक्षाकामस्य शूद्रस्य एतां शीघ्रं प्रकल्पयेत् ३
उपलिप्य स्वकं स्थंडिलं तदनंतरं चर्मणा कृष्णच्छागस्य तस्य गात्राणि वेष्टयेत् ४ खदिरं दंडका
ष्ठं च त्रिगुणात् प्रकल्पयेत् एवं कृत्वा यथान्यायं शूद्रो दीक्षोपकारणं ५ ममैव शरणं गत्वा
इमं मंत्रमुदाहरेत् शूद्रोहं शूद्रकर्माणि त्यक्त्वा मह्यं च सर्वशः ६ एवं वदन्तो देवं शूद्रो दीक्षाभिकां
क्षिणः। विमुक्तः सर्वपापेभ्यो लब्धसंज्ञागतस्पृहः। ७ औ चरणौ संगृह्य गुरुं वै तदनंतरं। गुरोः प्रस
दनार्थाय इमं मंत्रमुदाहरेत् ८ विष्णुप्रसादेन गुरुप्रसन्नो प्राप्तः पूर्वं लब्धा त्वामेव संसारमोक्ष
णाय करोमि कर्म प्रसीद ९ एतन्मंत्रमुदीर्य्य कुर्यात्तत्र प्रदक्षिणं चतुरस्त्रः यथान्यायं प्रपुन
श्चैवाभिवादयेत् १० अशनं तु ततः कुर्यात् तां धमाल्पेन चार्चयेत् भोजयेत यथान्यायमप पत ७३

प्रहरणान्सर्वान्यत्क्षिप्तपूर्वमिहितान् ७९ पूर्वक्रमेणहेमन्तमितस्यदीक्षांचकारयेत मयाचपूर्वमु
क्तानियानिसंभारकानिच ८० तान्सर्वान्समानीयएकंवर्द्धयशस्विनि मत्स्यात्कसमसारस्यचर्म्मंत
चकदाचन ८१ पालाशंदंडकाष्टंतुदीक्षायतनकारयेत कागस्यकृष्णसारस्यचर्म्मंतत्रचकारयेत
८२ अम्बुत्थदंडकाष्टंतुदीक्षायातदनंतरं कृत्वाद्वादशहस्तानिस्थंडिलंचोपलेपयेत ८३ सर्वाणये
तानिकर्त्तव्यंयन्मयापूर्वभाषिते एवंकृत्वाततःसर्वक्षत्रियोदीक्षाकारिः ८४ ममेववराणंकृत्वाइदंमंत्र
मुदाहरेत त्यक्तानिविप्रोशस्त्राणित्यक्त्वाकर्मंचक्षत्रियः ८५ सर्वत्यक्त्वादेवंविष्णुंप्रपन्नोस्मिनाथ
संसारार्थेवज्जातिमंजलयक्ष एवंततोवचश्रोत्क्वाक्षत्रियोममपार्श्वतः॥८६॥उभौतुचरणौग्रहाइममे
त्रमुदीरयेत।नाहंशस्त्रेदेवदेवस्यशास्त्रिपरवाधनं॥८७॥नैवब्रुवीमिकर्मंकरोमिदेवेशसंसारमोक्षणंत्व
याचोक्तमेववराहसंस्थितं ८८ ततएववचोवृतेमर्वंचैवात्रयोजयेत॥विविधैर्गंधपुष्पैश्चधूपैश्चैवय
थोदितं ८९ यथापेनैवतांभूमिंमोजयेत्तदनंतरं।स्नुतांभागवतांचैवदेविमेतन्नसंशयः ९० एषा
वैक्षत्रियेदीक्षादेविसंसारमोक्षणी।मत्प्रसादेनकर्त्तव्यंयदिकांक्षसिद्धिमुत्तमां ९१ वैश्यस्यैवप्रवक्ष्यामि
त्र एतत्वेनसुंदरि।यादीक्षायादृशीतत्रयथाभवतिसुंदरि ९२ त्यक्त्वातुवैश्यकर्माणिममकर्मै
परायणः।यथाचलभतेसिद्धिंततीयावर्त्तिसंस्थितः ९३ सर्वांस्तत्रसमानीययेमयापूर्वभाषिताः
विंशद्धस्तंसमालिप्यपूर्वन्यायेनकारयेत ९४ चर्म्मंवापीतकागस्यत्वगात्रंपरिवेष्टयेत औदुंब

टी०
परं २२ स्नानं दानं तीर्थयात्रां विष्णोर्नाम गृहे मुहुर् इति २४ काशीखंडे। अमित्रजिद्राजवर्णने मए
वदेऽद्यमम तस्य राज्ञो मित्रजितः स्थितौ। यो विष्णुभक्तिरहितः श्वपाकोऽपि धनेश्वरोऽपि २५ अन्यत्र ज्ञानार्पित द्वाःस्थ
शंखचक्रांकधारिणः। संप्राप्य वैष्णवीं दीक्षां दीक्षिता इव संविभुः २६ पंचरात्रे पद्मतंत्रे ब्रह्मप्रश्ने भगवदु
त्तरे। चराचरेषु यद्वस्तु व्याप्य भूतेषु तिष्ठति अमूर्तं निरवद्यं तं स्वसंवेद्यं वदंति के २७ विद्यया भग
वन्मयेतानाचक्ष्वाय याततः। श्रीभगवानुवाच। पंचरात्रोक्तमार्गेण यो दीक्षां चक्रमंडले कल्पयेत्
मर्चनं विष्णोर्हि विद्धि कामहरविद्यया २८ आराधयेति शास्त्रोक्तविधिना देशिकोत्तमाः। तेषां हृदं वै जेय
स्तादाविरक्तिपरः पुमान्। तरंति विष्णोर्मायां ते न तरंतीतरे जनाः॥२९॥ अतः गुरुस्तुतिः। ब्रह्मवैवर्ते। कलिं
प्रतिब्रह्मसेवाकं। गुरुः पिता गुरुर्माता गुरुरेव परं शिवं ३० शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन।
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ३१ गुरुरेव परं तत्त्वं तस्माद्गुरुमुपाश्रयेत् हरौ प्रसन्नेऽपि हि
वैष्णवा जनाः संप्रार्थयेते गुरुभक्तिमव्ययां ३२ गुरौ प्रसन्ने जगतामधीश्वरो जनार्दनस्तु ष्यति। स
र्वसिद्धिदः गुरुं भजन्शास्त्रमार्गान्नवेत्ति तीर्थव्रतं योगतपोसि धर्मान्। ३३ आचारवर्माविविवेक
यज्ञान्ज्ञानं परं भक्तिविरागयुक्तमिति ३४ तत्रैव दीपके प्रति भगवद्वाक्यं। मत्स्वरूपं यतः शुद्धं प्राप्य
ते श्रवणाद्यतः। स्वयं ज्ञात्वा श्रावयति यः स गुरुस्त्वहमेव हि। ३५ यद्वचोभिः सुधामुग्धैः ज्ञापितं हृदयं
सतां न विमुंचति मां प्रीत्या स गुरुस्त्वहमेव हि। ३६ कामादिदोषकलिलं मनस्याशीविषोपमं। न विमुं
चति दौर्जन्यं नरके पातयत्यपि ३७ तच्छोधयति यः शास्त्रैः पुराणैर्मलदाहकैः। ततः परः परो देवः

पु०सं० ७४

राम ७५

राधविवर्जितः ११ दीक्षाप्येषा च शूद्राणां मुपचारस्त्वयेरितः चतुर्णामपि वर्णानां दुःखसंसारमोहिणी १२
अन्त्यं चेत प्रवक्ष्यामि तच्छृणोहि वसुंधरे चतुर्णामपि वर्णानां यदा श्वेतं प्रदीयते १३ ब्राह्मणो पांडुरं देया
प क्षत्रे रक्तमुदाहृतं त्रियो। वैश्यापीतकं देया नीलं शूद्राय दापयेदिति १४ अथ दीक्षासमंतं कारणमप्याव
श्यकी ज्ञेया। तथा च पाद्मे उत्तरखंडे तैलकयां॥ पार्वती विष्णोरर्चनमद्भुतं रुद्रात् श्रुत्वा तमाह। अहमपित
रुद्र.गा स्यार्चनं कर्तुमिच्छामि तदा ते नोक्तं धन्यासि यद्विष्णोरर्चनेते श्रद्धा वैष्णव्यात्वसंबंधेनाहमपि धन्यः॥ अ
पितु गुरुं विनार्चनं न संभवति। तस्माद्वामदेवं गुरुं कुर्वनुज्ञातासि। तथार्चने महत्फलं भवत्यन्यथालि:
फलं स्यात्॥ तदा वामदेवसमीपं गत्वा दीक्षां लब्ध्वागता॥ गुरुणा तस्याः विष्णोर्नामसहस्रं नियमः ग्राहितः
कस्मिंश्चित्काले रुद्रेण भोजनार्थमाहूता॥ तदा तयोक्तं नामसहस्रं मया पठितं नास्ति तन्न भोक्तव्यं। तदा
रुद्रेणोक्तं साधु साधु भाग्यासि विष्णोः धन्यासि त्वं। रामनामाष्टोत्तरशतं पठस्व तेनैव तत्फलं प्राप्स्यसि।
तदा तत्पठित्वा तया भुक्तमित्यनुसंधेयमिति॥ स्कांदे रेवाखंडे श्रीपार्वत्यर्चनविधावुक्तं। पंचरात्रविधाने
न श्रीपतिं योर्चयिष्यति। दीक्षामवाप्यविधिवत्तेः सर्वपापनाशिनी। स्वर्गमोक्षप्रदां पुण्यां भोगदां वित्त
दां तथा। राज्यदां वा महाभाग पुत्रदां भाग्यदां तथा। २१ स्वकलत्रप्रदां वापि विष्णोर्भक्तिप्रदामिति तां रिष्य
ति भवांभोधिं स नरः कुलनंदनः २२ योर्चयिष्यति तत्रैव देवतीर्थं श्रियः पतिमिति स्कांदे काशीखंडपू
र्वार्द्धे पतिव्रताप्रकरणे। विष्णोस्तु पूजनं कार्यं पतिबुद्ध्या न चान्यथा पतिमेव सदा ध्यायेद्विष्णुरूपधरं

त्सृज्यपति

वङ्क्तावधिकारः। अभक्तिकृतमनादृत्यापिहरिर्भजनीयएव ५३ ना॰उवाच विष्णुधर्मान्नरोहित्वायद्
करणस्त्रीणांदेवतापूजनप्रस्तावे ॥७॥ अथवासर्वमुत्सृज्यपतिपूजनेतत्परा केशवाराधनंकुर्या २
२१० क्रियस्वपुरुषर्षभ ५४ तेनैवसर्वमाप्नोतियत्किंचिन्मनसेच्छति। अफलंसर्वमेवस्याद्भर्त्रनुज्ञावि
नाकृतं ५५ केशवाराधनंरामतयापिसफलंस्त्रियाः। गोविंदःसर्वभूतानांभर्त्तानान्यःसयोषितां।
५६ भर्त्तनुज्ञाविनातस्मात्तस्यपूजाविधीयते। नारायणःपूज्यतमोहिलोके नारायणःसर्वगतःप्रधानः
नारायणाराधनतत्परास्त्रीकामानवाप्नोतिनसंशयोत्र ॥५७॥ पाद्मे माघमाहात्म्ये कुण्डलविकुण्डलयम
दूतसंवादेयमदूतवाक्यं। सांगंसमुद्रंसन्यासंसऋषिकंसदैवतं। सदीक्षाविधिसंयुक्तंस्वयंचद्वादशा
अ क्षरं ५८ अष्टाक्षरंचमंत्रेशंयेजपंतिनरोत्तमाः तान्दृष्ट्वाब्रह्महामुच्यतेततस्तेविष्णुवल्लभाः ५९ अत्र
पु॰ सं॰ सदीक्षाविधिसंयुक्तमितिदीक्षावश्यकीतिउक्तंवेदितव्यं ॥२६॥ इति श्रीमत्पुराणसंग्रहाख्येभिनवप्रक
७५ रणोदीक्षानिर्णयोनामसप्तमःपरिच्छेदःसमाप्तिमगमच्छुभमस्तु ॥ दिलीपउवाच ॥ भगवन्भवता
प्रोक्ताःसर्वधर्माविशेषतः। वर्णाश्रमयुताधर्मानित्यनैमित्तिकाःक्रियाः १ राजधर्माश्चयज्ञाश्चतीर्थदा
नव्रतादिकं। कृतामयामुनिश्रेष्ठ अहल्यास्वर्गभोगदाः २ अधुनाश्रोतुमिच्छामिमोक्षमार्गसना राम
तनं। दृष्ट्वाहंयेनगच्छामितद्ब्रूहित्वंमहर्षे ३ कोमंत्रःसर्वमंत्राणांभवरोगैकभेषजं। सर्वेषामेवदेवा ७५
नांकोहिमोक्षप्रदःपरः ४ तन्ममाख्याहितत्त्वेनमयिवात्सल्यगौरवात् वशिष्ठउवाच॥ साधुपृष्टंत्व
याराजन्सर्वलोकहितैषिणा। ब्रह्मादिपरमंगुह्यमेकंसंसारतारकं ५ पुरामहर्षयःसर्वयज्ञदानपराः

कोन्योस्ति जगतीतले ३८ शुभाशुभं दर्शयति कृत्यं चाकृत्यमेव च मार्गामार्गैर्विरागादि रहस्यं च प्रकाश
येत् ३९ अयमेव परः स्वार्थो यद्गुरुः सेव्यते निशं । यदा मम शिवस्यापि ब्रह्मणो ब्रह्मणास्य हि । अनुग्र
हो भवेन्नृणां सेवते सद्गुरुं तदा ४० तत्रैव सूतेनाश्रमाणां दुष्कर्तुं मुक्ता भगवद्दीक्षया तद्भक्त्या तत्र सिद्धि
रुक्ता तेनोक्ता । तन्नैतादृशस्य महाभारस्योद्वहने क्षमानया वत्सकलद्वंद्वप्रहरणद्वारेण भागवती दीक्षा
ऽनुगम्यते । न तावत्संपूर्णप्रशमसुखं प्राप्यते अशेषक्लेशविच्छेदलक्षणो वा महोदयः । इत्यादिकम
नुचिंतयन्नयं भग्नमनोरथो नारंभे कुरुध्वजानुगमनमयमेष्यकोऽद्य व बहिर्निर्गतोपि वर्वस्कमेवानु
सरति भयपंजरं । तदेवंविधे महामोहविकासिततापारतिमिरे भवे निपतितप्राणिवर्गस्योद्धारकः सीधारः पु
राणपुरुष एव भगवन्नारायणोनंतरः ४६ इतिव्यवस्य गोविंदमाराधयति यो द्विजः । न तं विलंपंत्य यस्
स्कराइव कापथं ४७ स एव भगवान्कृष्णो बालः क्रीडनकैरिव । प्राणिभिः क्रीडते सर्गस्थितिसंहारचेष्टि
तैः ४८ तदस्य जगतो मूलं बुद्धेतिपरिपठ्यते प्रवृत्तेश्च निवृत्तेश्च फलदो गरुडध्वजः ४९ अ
नेनाभयोः सेव्यत्वेनोक्तो ज्ञातव्यः । इति विज्ञाततत्वस्य पुंसः श्रीकांतसंश्रयात् विशिष्टपुरुषार्थो न्यो
न कश्चिदिति मे मतिः ५० वाराहे वाराह वाक्यं । ये दीक्षितास्तु सततं मां ध्यायंति सुमेधसः । मद्भक्ताः पू
जकाश्चैव द्वादशीव्रतनिष्ठिताः । ५१ दशमीरहितां ये च शुक्लां कृष्णां च ये नराः । कुर्वंति मन्नुज्ञा
दैवितेयांति मम सन्निधौ ५२ इति श्रीनारायणभट्टरि हरिभक्तौ सतितदाज्ञया दीक्षया भग

निवारणं २२ आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी वापि प्रजायते सद्गुरुत्तमं शरणं याति तत्तत्फलमवाप्नुयात् २३
नादीक्षिताय वक्तव्यं नाभक्ताय न मानिने नास्तिकाय कृतघ्नाय न श्रद्धाविमुखाय च २४ न चाशुश्रूष
प. वे वाच्यं नासंवत्सरवासिने। कामक्रोधविमुक्तस्तु दंभलोभविवर्जितः २५ मां च योऽव्यभिचारेण भक्तियोगेन
सेवते। वक्तव्यं तस्य विधिवन्मंत्ररत्नमनुत्तमं २६ देशकालादिनियमैरिमित्रादिशोधनं। न्यासमुद्रादिकं म
तस्य पौरश्चरणिकं मतं। २७ मच्चक्राङ्कितदेहत्वं मदीयाराधनं तथा। मयि संन्यस्तकर्मत्वं मदनन्यशरण्य
ता २८ मयि सर्वफलन्यासं महाविश्वासपूर्वकं अन्योन साधनायत्तम् अकिंचनत्वमात्मनः २९ अवैष्णव
मंद नां च संभाषावेदनादिविवर्जितं अनन्यदेवतानां च स्मरणं पूजनं तथा ३० एवमाद्याश्च नियमाः प्रपन्न
स्य प्रकीर्तिताः इत्यादिगुणयुक्ताय वक्तव्यं मंत्रमुत्तमं ३१ तस्य नारायणः श्रीमान् महर्षिर्विष्णुः सनातनः देव
पु.सं. ता च श्रिया सार्द्धमहं वात्सल्यसागरः ३२ सर्वलोकेश्वरः श्रीमान् सुशीलः सुभगस्तथा। सर्वज्ञः सर्वशक्ति
७६ श्च सदा पूर्णमनोरथः ३३ सर्वगः सर्वबंधुश्च कृपापीयूषसागरः। श्रीमान्नारायणश्चाहं देवता च उ
दाहृतः ३४ छंदस्तु देवी गायत्री पंचविंशक्षरात्मिका: द्विद्विसप्तषट्त्रिपंच षडंगानि नियोजयेत् ३५
देव्या च मदपायिन्या मां ध्यायेद्विश्वरूपिणं॥ चक्रशंखगदापद्मपाणिनं दिव्यरूपिणं। ३६ वामांक राम
स्थश्रिया सार्द्धं पूजयेच्चायतः शुचिः॥ अनेन मंत्ररत्नेन गंधपुष्पानिवेदनैः। सकृत्संपूज्यमानोपि संतु
ष्टोस्मि प्रजायते॥३७॥ब्रह्मोवाच॥ सम्यगुक्तं त्वया नाथ रहस्यमिदमुत्तमं मंत्ररत्नप्रभावं च सर्वसिद्धिप्र ७६
दं नृणां ३८ पिता त्वं सर्वलोकानां माता त्वं गुरुरेव च। त्वं च स्वामी सखा भ्राता गतिस्त्वं शरणं सुहृत् ३९

शुभाः पप्रच्छुर्ब्रह्मणः पुत्रं नारदं मुनिसत्तमं ६ भगवन् केन मंत्रेण गाकामः परमं पदं तन्मे ब्रूहि महाभाग प्र
सादं कर्तुमर्हसि ॥ ७ ॥ श्रीनारद उवाच । पितामहं पुरा सर्वे योगिनः सनकादयः । पप्रच्छुरेकमेकांते मोक्षमा
र्गं सुदुर्लभं ॥ ८ ॥ श्रीब्रह्मोवाच ॥ शृणुध्वं योगिनः सर्वे रहस्यमिदमद्भुतं । न जानंति सुराः सर्वे ऋषय
श्च तपोधनाः ९ सर्गादौ प्राक् भवान्देवो मम नारायणोऽव्ययः । प्राजापत्यपदे दोमह्यं श्रुतयः सर्ववाङ्मय
१० प्रकाशकानि मंत्राणि व्याप्यान्यव्यापकानि च । ततस्तमब्रुवं देवं पुराणं पुरुषोत्तमं ११ भगवन् केन मंत्रे
ण संसारोत्तरणं नृणां तन्ममाचक्ष्व तत्वेन सर्वलोकहिताय वै ॥ १२ ॥ को मंत्रः सर्वमंत्राणां पुरश्चरणव
र्जितः । सकृदुच्चारणान्नृणां ददाति परमं पदं ॥ १३ ॥ श्रीभगवानुवाच ॥ साधु पृष्टं महाभाग सर्वलोकहितैषि
णा । तस्माद्वक्ष्यामि ते गुह्यं येन मुक्तिं समाप्नुयुः १४ सर्वेषामेव मंत्राणां मंत्ररत्नं शुभावहं सकृत्स्मरणमा
त्रेण ददाति परमं पदं । १५ मंत्ररत्नद्वयं नाम प्रपत्तिः शरणागतिः लक्ष्मीनारायणाख्येति हितं सर्वफल
प्रदं १६ नामानि मंत्ररत्नस्य पर्यायेण निबोधत । तस्योच्चारमात्रेण परितुष्टोऽस्मि नित्यशः १७ कुलजो
वा तपस्वी वा वेदवेदांगपारगः । यज्ञदानपरो वापि सर्वतीर्थोपसेवकः १८ व्रती वा सत्यवादी वा यतिर्वा ज्ञान
वानपि द्वयाधिकारी न भवेत्तस्य यत्नेन च वर्जयेत् १९ ब्राह्मणाः क्षत्रियाः वैश्याः स्त्रियः शूद्रास्तथेतराः
तस्याधिकारिणः सर्वे मम भक्ता भवेद्यदि २० शरण्यं शरणानां च तथैवानन्यसेविनां अनन्यसाधन
नां चैव कर्तव्यं मंत्रमुत्तमं २१ कीर्तितो नामा सुफलदं सकृदेवकृतो ह्यसौ तादृशानामधिजंतूनां देहांतरा-

येद्गुरुः ५५ शंखैर्वा नैवं कुर्याद्वा द्वादशाणासवाप्ययोः होमशेषं समाप्याथ पुनः पूजां समाचरेत् ५६ ततः क-
५० लशमादाय पवित्रोदकपूरितं मंत्रेणाचाभिमंत्र्याथ तस्य मूर्ध्नि निषिंचयेत् ५७ सितवस्त्रधरं सम्यगाची-
तं विनयान्वितं ॐ ह्रीं पुंड्रधरं शिष्यं मंत्रमध्यापयेद्गुरुः ५८ मंत्रार्थं च प्रवक्तव्यो रहस्येव विशेषतः लब्ध-
मंत्रस्तदाचार्यं पूजयेद्भूषणादिभिः ५९ अनेन विधिना मंत्रं योधीते वै भवांकुरः। ततः सर्वे भवं याति ना-
न्यथा सुरसत्तम।६०।। नारद उवाच। एवमुक्तो विधातारं देवदेवो हरिः पिता। स्वच्चक्रेणांकयित्वा तस्मै मं-
त्रं ददौ स्वयं ६१ सर्वलोकेश्वरो देवो ब्रह्मा मम पिता प्रभुः ममापि विधिवन्मंत्रं प्रददौ मुनिसत्तमाः।६२
६ तस्माद्यूयं मुनिश्रेष्ठा धारयित्वा सुदर्शनं। नारायणपदद्वंद्वं गच्छध्वं शरणं द्विजाः ६३ इत्युक्ता मुनयः
सर्वे नारदेन सुरर्षिणा। ह्याधिकारिणः सर्वे याताः विष्णोः परं पदं ६४ वशिष्ठ उवाच। तस्मात्त्वमपि
प्र.सं. ७७ राजर्षे विष्णुसायुज्यमिच्छसि। दीक्षामार्गविधानेन धारयित्वा सुदर्शनं ६५ नारायणपदद्वंद्वं तदेकंश-
रणं व्रज। सर्वलोकेश्वरः साक्षाद्ब्रह्मा त्रिभुवनेश्वरः ६६ ममापि नारदस्यापि प्रोक्तवान्मंत्रमुत्तमं। शौन-
कादिमहर्षीणां नैमिषारण्यवासिनां ६७ नारदः प्रददौ मंत्रं प्रपत्तिं शरणागतिं। एतद्गुह्यतमं राजन्न-
जानंति महर्षयः ६८ देवताश्च न जानंति सिद्धा साध्याश्च दानवाः। मयापि प्रश्रमेवैतद्भक्तिपुत्रात्पर- राम
शरात् ६९ इदं रहस्यं परमं लक्ष्मीनारायणाह्वयं राजन्न तवापि वक्ष्यामि प्रपत्तिं शरणागतिं ७० इया- ७७
त्परतरं मंत्रं नास्ति सत्यं ब्रवीमि ते इयात्परतरं मंत्रं नास्ति लोकेषु किंचन ७१ सत्यं सत्यं पुनः सत्यं ब्रह्म-

अहं तु तव देवेश दासः शिष्यस्तथा सुतः। तस्मान्मम दयासिंधो प्रोक्तवानिदमुत्तमं ४० अधुना मंत्रर
त्नस्य दीक्षां सम्यग्विधानतः ब्रूहि सर्वज्ञ तत्वेन लोकानां हितकाम्यया ४१ श्रीभगवानुवाच। अथ एव
त्स प्रवक्ष्यामि मंत्रदीक्षाविधिं परं आचार्यं संश्रयेत्पूर्वं मदाश्रयणसिद्धये ४२ आचार्यो वेदसंपन्नो वि
ष्णुभक्तो विमत्सरः। मंत्रज्ञो मंत्रभक्तश्च सदा मंत्राश्रयः शुचिः ४३ सत्संप्रदायसंयुक्तो ब्रह्मविद्याविशारदः वि
अनन्यसाधनश्चैव तथानन्यप्रयोजकः ४४ ब्राह्मणो वीतरागश्च क्रोधलोभविवर्जितः सद्वृत्तो
शासिता चैव मुमुक्षुः परमार्थवित् ४५ एवमादिगुणोपेत आचार्यः स उदाहृतः। आचारान्शासये
द्यस्तु स आचार्य इतीरितः ४६ यस्त्वाचार्यपराधीनस्तद्वाक्यं शास्यते हृदि। शासने स्थिरवृत्तिश्च शिष्य
शद्भिरुदाहृतः ४७ एवं लक्षणसंयुक्तं शिष्यं सर्वगुणान्वितं अध्यापयेद्विधानेन मंत्ररत्नमनुत्तमं
४८ द्वादश्यां श्रवणे वापि कर्हिचिद्वैष्णवे दिने। सदाचार्यप्रपत्तौ च तत्र दीक्षां समाचरेत् ४९ सुद
र्शनं पांचजन्यं सुवर्णेन प्रकारयेत्। रौप्येण वापि ताम्रेण कांस्येनापि प्रकारयेत् ५० स्नाप्य पंचामृ
तैः शुद्धैरर्चयेत्सुरतोमम। अर्चयेद्गंधपुष्पाद्यैस्तन्मंत्रेण विधानतः ५१ तद्वत्संस्थापयेदग्निं स्वगृह्योक्त
विधानतः। आचार्यो जुहुयाद्दाज्यं मंत्रेणाष्टद्विजोत्तमः ५२ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा जु
हुयान्मंत्ररत्नेन तथान्यैर्वैष्णवैः शुभैः। ५३ मंत्रैः पुरुषसूक्ताद्यैर्जुहुयात् घृतपायसं तस्मिन्नग्नौ क्षिपेच्च
क्रं शंखं च द्विजसत्तमः ५४ षडक्षरेणाजुहुयाद्दाद्युयर्विंशतिसंख्यया। प्रतप्तं चक्रमादाय मंत्रेणा बाके

सनातनः

तत्त्वं नारायणो विष्णुर्वासुदेवो जनार्दनः

क्तिमुत्तमां तन्मंत्राणां विधानं च स्वरूपं तस्य शार्ङ्गिणः। १५

प॰ परमात्मा परंब्रह्म परंज्योतिः परात्परः १६ अच्युतः पुरुषः कृष्णः शाश्वतः शिव ईश्वरः। नित्यः सर्वगत

स्थाणू रुद्रः साक्षी प्रजापतिः १७ यज्ञो यज्ञपतिः साक्षाद्ब्रह्मणः पतिरेव च हिरण्यगर्भः सविता लोक

कृल्लोकभृद्विभुः १८ ओंकारवाच्यो भगवान् श्रीभूलीलापतिः प्रभुः। उतामृतत्वस्येशानो यदन्नेना

तिरोहति १९ सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्। सभूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं २०

अनंतः श्रीपतिः रामो गुणभृन्निर्गुणो महान्। सर्वलोकेश्वरः श्रीमान् सर्वज्ञः सर्वतोमुखः २१ तस्य लो

कप्रधानस्य जगन्नाथस्य पार्वति महात्म्यं वासुदेवस्य यच्छक्यं तद्ब्रवीमि ते २२ अशक्यं तन्मया वक्तुं

पु॰सं॰ ब्रह्मणा च सुविस्तरं सर्वोपनिषदामर्थं वेदांते परिनिश्चितं २३ तस्योपासनभेदानि शृणु वच्मि यथ

७८ कृपयक्। आद्यं तद्धैतव प्रोक्तं शंखचक्रांकनं हरेः २४ धारणं चोर्ध्वपुंड्राणां तन्मंत्राणां परिग्रहः

अर्चनं च जपध्यानं तन्नामस्मरणं तथा २५ कीर्तनं श्रवणं चैव वंदनं पादसेवनं तत्पादोदकसेवा च त

न्निवेदितभोजनं २६ तदीयानां च सेवा च द्वादशीव्रतनिष्ठितं तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः राम

२७ भक्तिः षोडशधा प्रोक्ता भवबंधविमुक्तये सर्वेषामेव देवानां ममापि पुरुषोत्तमः २८ पूजनीयो हरि ७

र्नित्यं ब्राह्मणानां विशेषतः तस्मात्तु ब्राह्मणो नित्यं विधिवत्पूजयेद्धरिं २९ तच्चिह्नैरंकितः श्रीशं

परं प्राप्नोत्यसंशयः। शंखचक्रांकनं कुर्याद्ब्राह्मणो बाहुमूलयोः ३० हुताग्निनैव संतप्य सर्वपाप

अहंतु तवदेवेश दासः शिष्यस्तथा सुतः। तस्मान्मम दयासिंधो प्रोक्तवानिदमुत्तमं ४० अधुना मंत्रर
त्नस्य दीक्षां सम्यग्विधानतः ब्रूहि सर्वज्ञ तत्वेन लोकानां हितकाम्यया ४१ श्रीभगवानुवाच। शृणुव
त्स प्रवक्ष्यामि मंत्रदीक्षाविधिं परं आचार्यं संश्रयेत्पूर्वं मदाश्रयणसिद्धये ४२ आचार्यो वेदसंपन्नो वि
ष्णुभक्तो विमत्सरः। मंत्रज्ञो मंत्रभक्तश्च सदा मंत्राश्रयः शुचिः ४३ सत्संप्रदायसंयुक्तो ब्रह्मविद्याविशारदः वि
अनन्यसाधनश्चैव तथानन्यप्रयोजकः ४४ ब्राह्मणो वीतरागश्च क्रोधलोभविवर्जितः सद्वृत्तो
शासिता चैव मुमुक्षुः परमार्थवित् ४५ एवमादिगुणोपेत आचार्यः स उदाहृतः। आचारान्शासये
द्यस्तु स आचार्य इतीरितः ४६ यस्त्वाचार्यपराधीनस्तद्वाक्यं शास्यते हृदि। शासने स्थिरवृत्तिश्च शिष्य
सद्भिरुदाहृतः ४७ एवं लक्षणसंयुक्तं शिष्यं सर्वगुणान्वितं अध्यापयेद्विधानेन मंत्ररत्नमनुत्तमं
४८ द्वादश्यां श्रवणे वापि कर्हिचिद्वैष्णवे दिने। सदाचार्यप्रपत्तौ च तत्र दीक्षां समाचरेत् ४९ सुद
र्शनं पांचजन्यं सुवर्णेन प्रकारयेत्। रौप्येण वापि ताम्रेण कांस्येनापि प्रकारयेत् ५० स्नाप्य पंचामृ
तैः शुद्धैरर्चयेत्सुरतोत्तमम्। अर्चयेद्गंधपुष्पाद्यैस्तन्मंत्रेण विधानतः ५१ तदग्रे स्थापयेदग्निं स्वगृह्योक्त
विधानतः। आचार्यो जुहुयादाज्यं मंत्रेण द्विजोत्तमः ५२ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा जु
हुयान्मंत्ररत्नेन तथान्यैर्वैष्णवैः शुभैः। ५३ मंत्रैः पुरुषसूक्ताद्यैर्जुहुयाद्घृतपायसं तस्मिन्नग्नौ क्षिपेच्च
क्रं शंखं च द्विजसत्तमः ५४ षडक्षरेण जुहुयादष्टविंशतिसंख्यया। तप्तं चक्रमादाय मंत्रेणांक

न्तिमुत्तमो तन्मंत्राणां विधानं च स्वरूपं तस्य शार्ङ्गिणः। १५ तत्त्वं नारायणो विष्णुर्वासुदेवो जनार्दनः
प॰ परमात्मा परं ब्रह्म परंज्योतिः परात्परः १६ अच्युतः पुरुषः कृष्णः शाश्वतः शिव ईश्वरः। नित्यः सर्वगत
स्थाणु रुद्रः साक्षी प्रजापतिः १७ यज्ञो यज्ञपतिः साक्षाद्ब्रह्मणः पतिरेव च हिरण्यगर्भः सविता लोक
कृल्लोककृद्विभुः १८ अकारवाच्यो भगवान् श्रीभूलीलापतिः प्रभुः। उतामृतत्वस्येशानो यदन्नेना
तिरोहति १९ सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं २०
अनंतः श्रीपतिो रामो गुणभृन्निर्गुणो महान्। सर्वलोकेश्वरः श्रीमान्सर्वज्ञः सर्वतोमुखः २१ तस्य लो
पु॰सं॰ कप्रधानस्य जगन्नाथस्य पार्वति महात्म्यं वासुदेवस्य यत्किंचित्तद्ब्रवीमि ते २२ अशक्यं तन्मया वक्तुं
७८ ब्रह्मणा च सुविस्तरं सर्वोपनिषदामर्थं वेदांते परिनिश्चितं २३ तस्योपासनभेदानि स्वरूणु वच्मि पंच
कृष्णम्। आदौ तु हेतवे प्रोक्तं शंखचक्रांकनं हरेः २४ धारणं चोर्द्ध्वपुंड्राणां तन्मंत्राणां परिग्रहः
अर्चनं च जपध्यानं तन्नामस्मरणं तथा २५ कीर्तनं श्रवणं चैव वंदनं पादसेवनं तत्पादोदकसेवा च त
न्निवेदितभोजनं २६ तदीयानां च सेवा च द्वादशीव्रतनिष्ठितं तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः
२७ भक्तिः षोडशधा प्रोक्ता भवबंधविमुक्तये सर्वेषामेव देवानां ममापि पुरुषोत्तमः २८ पूजनीयो हरि राम
र्नित्यं ब्राह्मणानां विशेषतः तस्मात्तु ब्राह्मणो नित्यं विधिवत्पूजयेद्धरिं २९ तच्चिह्नैरंकितः श्रीशं ७२
परं प्राप्नोत्यसंशयः। शंखचक्रांकनं कुर्याद्ब्राह्मणो बाहुमूलयोः ३० हुताग्निनैव संतप्य सर्वपाप

णाकथितंपुरा। नारायणात्परोदेवोनास्तिमुक्तिप्रदान्नृणां ७२ तत्सेवैवभवेन्मोक्षःसर्वधर्मनिकृंत
नः इति श्रीपद्मपुराणेउत्तरखंडेवशिष्ठदिलीपसंवादेविद्योपदेशोनामाध्यायः। दिलीपउवाच। भग
वन्सर्वमाचक्ष्वहरिभक्तिसुधामयं। प्रएवेतोनेवतृप्तिर्मेविष्णुभक्तिसुधार्णवे १ तापत्रयमहाज्वा
लावह्निभिःसततंनृणां संतप्तानांमुनिश्रेष्ठविष्णुभक्तिसुधार्णवं २ विनाकिमन्यच्छरणंभवारण्येभ
यानके आचक्ष्वविस्तरेणत्वंभक्तिभेदान्महामुने ३ उपास्यमानान्सततंमुनिभिःपरमात्मनः। श्री
वशिष्ठउवाच॥ साधुपृष्टमिराजेंद्रसंसारोत्तारणंनृणां वैकुंठस्यपरेशस्यभक्तिंनित्यंसुखावहां ५ इ
ममेवमहाप्रश्नंकैलासशिखरेपुरा पप्रच्छगिरिजादेवीशंकरंलोकपूजितं ६ श्रीपार्वत्युवाच। देवदेव
महादेवत्रिपुरघ्नसुरेश्वर। विष्णुभक्तिंममाचक्ष्वमुक्तिदांसर्वदेहिनां ७ उपास्यभेदान्मंत्रांश्चयेपूजावि
धयस्तथा। तस्यविष्णोःस्वरूपंचतद्विभूतिगुणादयः ८ तस्यलोकस्वरूपंचयंप्राप्यननिवर्तते। सर्गस्थि
तिलयंयेनकरोतिभगवान्हरिः ९ यद्गत्वाननिवर्त्तंतेतद्धामपरमंहरेः। येनकेनचकृत्येनसाधनेन
परंपदं १० प्राप्नुवंतिनरापापाविषयासक्तचेतसः। विस्तरेणमयिप्रीत्याब्रूहिसर्वमशेषतः ११ वशिष्ठउवाच
इतिपृष्टोमहादेव्याहरस्त्रिपुरहंतकः। उवाचपरमप्रीत्यानमस्कृत्वाजनार्दनं १२ श्रीरुद्रउवाच॥ साधु
साधुमहादेविसर्वलोकहितेप्रिये। साधुपृष्टमिमंदेविश्रीधाममाहात्म्यमुत्तमं १३ धन्यासिकृतपुण्या
सिविष्णुभक्तासिपार्वति परितुष्टोस्मिभद्रंतेशीलरूपगुणैःसदा १४ अहंवक्ष्यामिगिरिजेभगवद्

ण्यं हरेः सदा। तेन तप्ततनुर्येषां ते यांति परमं पदं ४६ पवित्रं चरणं नेमिहरेः चक्रं सुदर्शनं सहास्र
रं प्रावृत्तत्रं लोकद्वारं महौजसं ४७ नामानि विष्णुचक्रस्य पर्यायेणानि बोधमे सुद्देन वह्नित
५० त्रे न ब्रह्मा तेन पुनाहि नः ४८ येन देवाः पवित्रेण आत्मानं पुनते सदा। तेन सहस्रधारेण पावमा
न्यः पुनंतु मां ४९ प्राजापत्यं पवित्रं तु शतोद्यामं हिरण्मयं। वयं ब्रह्मविदस्तेन पूतं ब्रह्म पुनीम
हि ५० स नेमिचक्रमजनं चक्षुरस्य महात्मनः तस्मिन् चक्रे कृते देहे महान्त्विति पदं ययौ ५१ एवं यत् श्रुतयः
सर्वाः कथयंति वरानने तथैव सेतिहासेषु पुराणेष्वपि वक्ष्यति ५२ तस्मात्तु विधिवद्धार्याः शंखचक्रादि
यस्तथा ब्राह्मणानां विशेषेण वैष्णवानां विशेषतः ५३ धृतोर्ध्वपुंड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो
महात्मा स्वरेण मंत्रेण सदा हृदिस्थं परात्परं याति विशुद्धचेताः ५४ ये कंठलग्नतुलसीनलिनाक्षमाला
पु.सं. ये बाहुमूलपरिचिह्नितशंखचक्राः। ये वा ललाटफलके लसदूर्ध्वपुंड्रास्ते वैष्णवा भुवनमाशु पवित्रय
७९ ति ५५ दिवस्यतेस्युवितंतं पवित्रं तस्य दक्षिणेन नयंति भुजे सम्यक्कृतस्पर्शा चेति हि क्रियाः ५६ ये वहंति भु
जे चक्रं शंखं च विधिना द्विजाः परानयि विलोमस्कां स्तारहंति जनाः सदा ५७ होमाग्निसंतप्तपवित्रलां
छितो मूले च बाह्वोः परमात्मनो हरेः। संतारयित्वा भवसागरं महत् परं पदं याति परेशलोकं ५८ अंके ये
न यच्चक्राद्यैरात्मनो बाहुमूलयोः। कलत्रापत्यमत्येषु पश्वादिषु च संपदि ५९ द्विविधं वैष्णवं प्रो ७९
क्तं बाह्यमाभ्यंतरं तथा शंखचक्रादिभिर्बाह्यमांतरं वीतरागता ६० बाह्याभ्यंतरं साध्यंते देहे वै मुदा सु

पन्नुन्नेय चक्रं वा शंखचक्रे घात यापंचायुधानि वा ३१ धारयित्वैव विधिवत्ब्राह्मकर्मसमारभेत अ
ग्नितप्तं पवित्रं च धृत्वा वै भुजमूलयोः। ३२ त्यक्त्वा यमपुरं घोरं याति विष्णोः परं पदं चक्रचिह्नवि
हीनस्तु यः पूजयति केशवं ३३ तत्सर्वं विफलं याति पूजा मंत्रजपादिकं अग्नितप्तेन चक्रेण ब्राह्म
णो बाहुमूलयोः ३४ अंकयित्वा जपन्मंत्रं संसारान्मोक्षमाप्नुयात सुदर्शनं धारयित्वा वह्नितप्तं द्वि
जोत्तमः ३५ तपनीयविधानेन पंचकर्म सुयोजयेत विष्णुचिह्नविहीनं तु यः श्राद्धे भोजयिष्यति
३६ व्यर्थं भवति तत्सर्वं निराशाः पितरो गताः विष्णुचक्रांकितं विप्रं पूजयेच्छ्राद्धकर्मणि ३७ विष्णुच
क्रविहीनं तु प्रयत्नेन विवर्जयेत दद्याद्धोमं हिरण्यादि चक्रांकितभुजाय वै ३८ यद्दत्तं चक्रहीनाय तत्स
र्वमसुराय वै अग्नितप्तेन चक्रेण बाहुमूले तु लांछिताः ३९ ते सर्वे पापनिर्मुक्ता यांति विष्णोः परं पदं कुता
ग्नितप्तचक्रेण शरीरं यस्य चिह्नितं ४० तस्य तीर्थानि यज्ञानि वसंति नात्र संशयः अधृत्वा विधिना
चक्रं। ब्राह्मणः प्राकृतो भवेत ४१ न किंचित्तस्य अश्नीयाद्दपि कल्पसहस्रिणः। सर्ववेदविदो वापि
सर्वशास्त्रविशारदः ४२ अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत ऊर्द्ध्वपुंड्रविहीनस्तु शंखचक्र
विवर्जितः। सर्वधर्मं समारोप्य वह्निं कुर्यात्स्वपत्तनात ४३ प्रकृतिस्पर्शरहितो वासुदेवो जनार्दनः। त
थैव ब्राह्मणा देवि विष्णुचक्रेण चिह्निताः ४४ तस्मात्प्रकृतिसंसर्गी पापौघदहनं हरेः। प्रतप्तं विभृया
च्चक्रं शंखं च भुजमूलयोः ४५ तेन चक्रेण संतप्तास्तरेयुः पातकांबुधिं। पवित्रं विष्णोः चक्रं जगद्व्या

र्जितः ॥ ११ ॥ दृष्ट्वा यं नैव तत्किंचित् श्मशानसदृशो भवेत् ॥ ऊर्ध्वपुण्ड्रविहीनस्तु संध्याकर्मादिकं च
प॰ रेत् ॥ १२ ॥ तत्सर्वं राक्षसैर्नीतं नरकं चाधिगच्छति ॥ ऊर्ध्वपुण्ड्रं वहेद्विप्रो मृदा शुभ्रेण वैदिकः ॥ १२ ॥
न तिर्यग्धारयेद्विद्वानापद्यपि कदाचन ॥ ऊर्ध्वपुण्ड्रं नरो धृत्वा कुर्याच्छ्राद्धं शुभानने ॥ १३ ॥ क
ल्पकोटिसहस्राणि गयाश्राद्धफलं लभेत् ॥ विप्राणामूर्ध्वपुण्ड्रं स्यात्तिलकं तु महीभृतः ॥ १४ ॥ प
द्माकारं तु वैश्यानां शूद्राणां वै त्रिपुण्ड्रकं ॥ ऊर्ध्वपुण्ड्रं तु सर्वेषां नानिषिद्धं कथंचन ॥ १५ ॥ धारयेत्
त्रियाद्योऽपि विष्णुभक्तो भवेद्यदि ॥ विप्राणां नैव धार्यं स्यात्तिर्यक्पुण्ड्रादिकं तथा ॥ १६ ॥ नारायणा
पु॰सं॰ त्परो देवो नास्ति मुक्तिप्रदो नृणां ॥ नारायणाद्विदेवात्मन्येषामर्चनं न तु ॥ १७ ॥ ब्राह्मणानां कुले
८० जातो भस्मधारी भवेद्यदि ॥ वर्जयेत्तादृशं देवि मद्योच्छिष्टं घटं यथा ॥ १८ ॥ त्रिपुंड्रस्य द्विकल्यानां
धारणं च विधिं तथा ॥ त्रिपुण्ड्रधारणाद्विप्रः पतितः स्यान्न संशयः ॥ १९ ॥ एकान्तिनो महाभागाः सर्व
भूतहिते रताः ॥ सान्तरालं प्रकुर्वन्ति पुण्ड्रं हरिपदाकृति ॥ २० ॥ हरेः पदाकृतं धार्यमूर्ध्वपुण्ड्रं विधा
नतः ॥ मध्ये छिद्रेण संयुक्तं तद्धि वै मन्दिरं हरेः ॥ २१ ॥ ऊर्ध्वपुण्ड्रं मृदा सौम्यं ऋजु पार्श्वं सुमनोहरं ॥ दंडा राम
कारं सुशोभाढ्यं मध्ये छिद्रं प्रकल्पयेत् ॥ २२ ॥ तस्माच्छिद्रान्वितं पुण्ड्रं दण्डाकारं सुशोभनं ॥ विप्रा ८०
णां सततं धार्यं स्त्रीणां च शुभदर्शने ॥ २३ ॥ ऊर्ध्वपुण्ड्रस्य मध्ये तु विशाले सुमनोहरे सान्तराले समा
सीनो हरिस्तत्र श्रिया सह ॥ २४ ॥ निरन्तरालं यः कुर्यादूर्ध्वपुण्ड्रं द्विजाधमः । स हि तत्र स्थितं लक्ष्मीं

तं। तस्माच्चक्रादिचिह्नं तु त्रयमेवैष्णवं स्मृतं॥६१॥ अंतरमानरोगादिविमुक्तं स्वात्मदर्शनं। सर्वभूतदया
शांति सिद्धिप्राप्यं ते फलोलुता॥६२॥ पुत्रदारादसंमत्वं योगाभ्यासरतिस्तथा॥ अनन्यभक्तियोगेन परे
शस्याभिषेचनं॥६३॥ तस्माच्चक्रादिहेतूनामेकं नैवैष्णवं स्मृतं॥ चक्रादिचिह्नहीनत्वाद्वैष्णवत्वं न सं
भवेत॥६४॥ इति श्रीपद्मपुराणे उत्तरखंडे उमामहेश्वरसंवादे सुदर्शनमाहात्म्यं नामाध्यायः। श्रीशं
कर उवाच॥ ऊर्ध्वपुंड्रस्य माहात्म्यं वक्ष्यामि सुभदर्शने॥ धारणादेव मुच्येत भवबंधाद्द्विजोत्तमः॥१॥
ऊर्ध्वपुंड्रस्य मध्ये तु विशाले सुमनोहरे॥ लक्ष्म्या सार्द्धं समासीनो देवदेवो जनार्द्दनः॥२॥ तस्माद्यस्य
शरीरे तु ऊर्ध्वपुंड्रो धृतो भवेत॥ तस्य देहं भगवतो विमलं मंदिरं शुभं॥३॥ स्नातः सर्वतीर्थेषु सर्वय
ज्ञेषु दीक्षितः॥ धारयेदूर्ध्वपुंड्रं यो मंत्रेणैव वैष्णवः॥४॥ ऊर्ध्वपुंड्रधरो विप्रः सर्वलोकेषु पूजि
तः॥ विमानवरमारुह्य याति विष्णोः परं पदं॥५॥ धारयेदूर्ध्वपुंड्रं तु त्रिसंध्यासु द्विजोत्तमः॥ सर्वपाप
विशुद्ध्यर्थमिष्टापूर्तफलाप्तये॥६॥ ऊर्ध्वपुंड्रधरं विप्रं दृष्ट्वा पापैः प्रमुच्यते॥ नमस्कृत्याथवा
भक्त्या सर्वदानफलं लभेत॥७॥ ऊर्ध्वपुंड्रधरं विप्रं यः श्राद्धे भोजयिष्यति॥ आकल्पकोटिपितरस्त
स्य तृप्ताः न संशयः॥८॥ ऊर्ध्वपुंड्रधरो कुर्यात्तस्य पुण्यमनंतकं॥ ऊर्ध्वपुंड्रविहीनस्तु किंचित्कर्म
करोति यः॥९॥ इष्टापूर्त्तादिकं सर्वं निःफलं स्यान्न संशयः॥ यच्छरीरं मनुष्याणां ऊर्ध्वपुंड्र विव

विरं धम्मवसहायं च पुंड्रमाकुरनर्थकं ॥ ३९ ॥ आरभ्य नासिकामूलं ललाटं तु लिखेन्मृदा ॥ समारभ्य भ्रुवो
प. र्मध्यमंतरालं प्रकल्पयेत् ॥ ४० ॥ अंतरालं द्व्यंगुलं स्यात्पार्श्वे व्यंगुलिमात्रको ॥ मृदा शुभ्रेण विलिखेत्तु
द्धं ऋजुं तु तरं शुभं ॥ ४१ ॥ ललाटे केशवं ध्यायेन्नारायणमथोदरे ॥ वक्षस्थले माधवं च गोविंदं कंठकू
बरे ॥ ४२ ॥ विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनं ॥ त्रिविक्रमं कंधरे तु वामनं वामपार्श्वके ॥ ४३ ॥ श्री
धरं वामबाहौ तु ऋषीकेशं तु कंधरे ॥ पृष्ठे तु पद्मनाभं च ककुद्दामोदरं न्यसेत् ॥ ४४ ॥ तत्प्रक्षाल
नतोयेन वासुदेवं तु मूर्द्धनि । ललाटेषु जयुग्मे तु पृष्ठयोः कंठकूबरे ॥ ४५ ॥ धारयेदूर्ध्वपुंड्राणि च
तुरंगुलमायतं ॥ कुक्षौ तत्पार्श्वयोः प्रोक्तं मायतं तु दशांगुलं ॥ ४६ ॥ बाहौ वक्षस्थले पुंड्रमष्टांगुल
पु.सं. मुदाहृतं ॥ एवं द्वादश पुंड्राणि ब्राह्मणः सततं धरेत् ॥ ४७ ॥ तत्तत्पुंड्राणि तन्मूर्तिं ध्यात्वा मंत्रेण धारये
त् ॥ अंतरालेषु सर्वेषु हरिद्रां धारयेत्क्रियं ॥ ४८ ॥ चत्वारि भूभृतां प्रोक्तं पुंड्राणि द्वे विशां स्मृतं ॥ एकं पुंड्रं
८१ तु नारीणां शूद्राणां च विधीयते ॥ ४९ ॥ ललाटे हृदि बाह्वोश्च चतुःपुंड्राणि धारयेत् ॥ ललाटे हृदये द्वे तु
भाले त्वेकं विधीयते ॥ ५० ॥ ऊर्ध्वपुंड्रं ललाटे तु सर्वेषां प्रथमं स्मृतं ॥ ललाटादि क्रमेणैव धारणं तु विधी
यते ॥ ५१ ॥ मूर्तयो वासुदेवाद्याः स्थूलः पुंड्रेषु धारयेत् ॥ हृदयोः गोविंदकस्तोतु एकं नारायणं धरेत् ॥ ५२ ॥ राम
एवं पुंड्रविधिः प्रोक्तः सर्वेषां गिरिजे मया ॥ अश्वत्थपत्रसंकाशं वेणुपत्राकृतिस्तथा ॥ ५३ ॥ पद्मकु ८१
ड्मलसंकाशं मोहनं त्रितयं स्मृतं । महाभागवताः शुद्धाः पुंड्रं हरिपराकृति ॥ ५४ ॥ दंडाकारं तु वा देविधा

विघ्नं चैव व्यपोहति २५ अच्छिद्रं ऊर्ध्वपुंड्रं तु ये कुर्वंति द्विजाधमाः। तेषां ललाटे सततं शुनः पादं न
संशयः २६ तस्माच्छिद्रान्वितं पुंड्रं मध्यच्छिद्रं शुभान्वितं धारयेद्ब्राह्मणो नित्यं हरिसालोक्यसि
द्धये २७ श्रीकृष्णतुलसीमूलेमृदमादाय भक्तिमान्। धारयेदूर्ध्वपुंड्राणि हरिस्तत्र वसीदति २८
द्वारवत्यां शुभे रम्ये वासुदेवह्रदे तथा। तत्रोद्भवं मृदं शुभ्रमादाय द्विजसत्तमः २९ धारयेदूर्ध्वपुं
ड्राणि सर्वकामफलाप्तये। आदाय परया भक्त्या गंगातीरोद्भवां मृदं ३० तया धृतोर्ध्वपुंड्रेण सर्वयज्ञ
फलं लभेत्। चंदनं च हरिद्रां च तथा भस्माग्निहोत्रजं सर्वं वश्यकरं प्रोक्तं ऊर्ध्वपुंड्रस्य धारणात् ३१
यत्तु दिव्यं हरिक्षेत्रं तस्यैव मृदमाहरेत् पर्वताग्रे नदीतीरे बिल्वमूले जलाशये ३२ सिंधुतीरे च वल्मी
के हरिक्षेत्रे विशेषतः। विष्णोः स्नानोदकं यत्र प्रवाहयति नित्यशः ३३ पुंड्राणां धारणार्थाय गृह्णीया
पर्वत त्तन्मृत्तिकां। श्रीरंगे वेंकटाद्रौ च श्रीकूर्मे द्वारके शुभे ३४ प्रयागे नारसिंहाद्रौ वाराहे तुलसीवने
गृहीत्वा मृत्तिकां भक्त्या विष्णुपादजलैः सह ३५ धृत्वा पुंड्राणि चांगेषु विष्णुसायुज्यमाप्नुयात्। यस्मि
न्कस्मिन्महाभागा क्षेत्रे वा धारयंति वै ३६ तस्मिन्वै मृत्तिका ग्राह्या ऊर्ध्वपुंड्रस्य धारणे श्यामं शांति
करं प्रोक्तं रक्तं वश्यकरं तथा। श्रीकरं पीतमित्याहुः श्वेतं मोक्षकरं शुभं ३७ वक्रं स्थूलं तिर्यगच्छिद्रं ह्रस्वं दी
र्घतनुं तनु। वक्रं विरूपं बद्धाग्रं छिन्नमूलं पदच्युतं ३८ अशुभं रूक्षमारक्तं तथा नंगुलिकल्पितं
वि:

रीनभवेत्सर्वमंत्रेषु नाहं इति ॥१२॥ तस्मात् हृदयमध्ये त्वेवतस्मान्मंत्रमनुत्तमं ॥ श्रीमदष्टाक्षरं मंत्रं अभ्यसेद्
प॰ द्विजसत्तमः ॥१३॥ मंत्रमष्टाक्षरं प्रोक्तं प्रणवस्यैव संग्रहात् ॥ नैसर्गि प्रणवार्थत्वात् मंत्रवित् उच्यते बुधैः ॥१४॥
नान्यत्र सर्वमंत्रेषु प्रणवस्य स्वभावतः ॥ पूर्वैः सर्वमंत्राणां योजयेत् प्रणवं शुभं ॥१५॥ ओंकारं प्रणवं ब्रह्म
सर्वमंत्रेषु नायकः ॥ आदौ सर्वत्र युंजीत मंत्राणां च शुभानने ॥१६॥ स्वभावात् प्रणवं तस्मिन् मूलमंत्रे प्रतिष्ठि
तं ॥ ओं इत्येकाक्षरं पूर्वं द्व्यक्षरं नम इत्यथा ॥१७॥ ततो नारायणायेति पंचैतानि यथाक्रमात् ॥ एवं त्र्यष्टाक्ष
रो मंत्रो ज्ञेयः सर्वार्थसाधकः ॥१८॥ सर्वदुःखहरः श्रीमान् सर्वमंत्रात्मकः शुभः ॥ ऋषिर्नारायणस्तस्य देवता
श्रीश एव च ॥१९॥ छंदश्च देवी गायत्री प्रणवं बीजं उच्यते ॥ नित्यानपायनी शक्तिस्तस्य श्री रुच्यते म
पु॰सं॰ नोः ॥२०॥ प्रथमं पादमोंकारः द्वितीयं नम उच्यते ॥ तृतीयं नारायणायेति पदत्रयमुदाहृतं ॥२१॥ अकारस्त्व
८२ थ उकारश्च मकारश्च ततः परः ॥ वेदत्रयात्मकं शक्तं प्रणवं ब्रह्मणः पदं ॥२२॥ अकारेणोच्यते विष्णुः श्रीरु
कारेण चोच्यते ॥ मकारस्तु तयोर्दासः पंचविंशः प्रकीर्तितः ॥२३॥ वासुदेवस्य रूपं तदकारेणोच्यते बुधैः ॥
उकारेण श्रियादेव्या रूपं मुनिभिरुच्यते ॥२४॥ मकारेणोच्यते जीवः पंचविंशाक्षरः शुभानने ॥ भूतानि चक
वर्गेण चवर्गेणेंद्रियाणि च ॥२५॥ टवर्गेण तवर्गेण ज्ञानगंधादयस्तथा ॥ मनः पकारेणैवोक्तं फकारेण राम
त्वहंकृतिः ॥२६॥ बकारेण भकारेण महान् प्रकृतिरुच्यते ॥ आत्मा तु समकारः स्यात् पंचविंशः प्रकीर्तितः ८२
॥२७॥ देहेंद्रियमनःप्राणादिभ्योऽन्यो नन्यसाधनः ॥ भगवच्छेषभूतो सौ मकाराख्यः सचेतनः ॥२८॥ अव

रम्यमूर्ध्वपुंड्रकं ॥ सुदर्शनेनांकितबाहुमूलास्तथोर्ध्वपुंड्रांकितसर्वगात्राः ॥ मालारविंदाक्षधरा
विमुद्धारहंतिलोकांस्तु रिरौघसंघात ॥ ५५ ॥ इति श्रीपद्मपुराणे उत्तरखंडे उमामहेश्वरसंवादे ऊ
र्ध्वपुंड्रनामाध्यायः ॥ श्रीशंकर उवाच ॥ न्यासेवा प्रपत्त्यैवापि मंत्रमेकांतिनः श्रयेत् ॥ अवैष्ण
वोपदिष्टेन मंत्रेण न परा गतिः ॥ १ ॥ अवैष्णवोपदिष्टस्य पूर्वमंत्रवरद्वये ॥ पुनश्च विधिना सम्यक् वैष्ण
वाद्ग्राहयेन्मनुं ॥ २ ॥ सहस्रसाखाध्यायी च सर्वयज्ञेषु दीक्षितः ॥ कुले महति जातोपि न गुरुः स्यादवैष्णवः ॥ ३ ॥
यस्तु मंत्रद्वयं सम्यगध्यापयति वैष्णवः ॥ स आचार्यस्तु विज्ञेयो भवबंधविदारकः ॥ ४ ॥ आचार्यं संश्र
यित्वा च वत्सरं सेवये द्विजः ॥ तस्य वृत्तिं परिज्ञात्वा मंत्रमध्यापयेद्गुरुः ॥ ५ ॥ कृत्वा तापादिसंस्का
रान्पश्चान्मंत्रमुदीरयेत् ॥ तापः पुंड्रं तथा नाम कृत्वा वै विधिना गुरुः ॥ ६ ॥ पश्चादध्यापयेन्मंत्रं शि
८२ ष्यं निर्मलचेतसं ॥ चक्रेण विधिना सम्यक्कृत प्रतापइत्यविधीयते ॥ ७ ॥ पुंड्रमूर्ध्वं यथा प्रोक्तं नाम वै
ष्णवमुच्यते ॥ ततो मंत्रविधानेन शिष्यमध्यापयेद्गुरुः ॥ ८ ॥ न्यासेतत्त्वपुण्याक्षरमंत्रमन्यश्च वैष्ण
वं परं ॥ न्यासमेवात्र परमे वैष्णवानां सुभाततने ॥ ९ ॥ तस्मात्तु न्यासमेवैषामत्तिरिक्तमिहोच्यते ॥ षा
न्यासविद्यापरो यस्तु ब्राह्मणः श्रेष्ठ उच्यते ॥ १० ॥ न्यासात्परतरं मंत्रं नास्ति सत्यं ब्रवीमि ते ॥ न्या
सद्वयं प्रपत्तिः स्यात्तया योगाग्निबोधने ॥ ११ ॥ दयापदेशपूर्वेण सर्वकर्म समाचरेत् ॥ दयाधिका

प॰

तदायत्तास्यजीवनः ॥४४॥ तस्मात्साधनकर्तृत्वं चेतनस्य न विद्यते । ईश्वरस्यैव संकल्पाद्वर्तते सचरा
चरं ॥४५॥ तस्मात्स्वसामर्थ्यविधिं त्यक्त्वा सर्वमशेषतः । ईश्वरस्य तु सामर्थ्यान्नालभ्यं तस्य विद्यते ॥४६॥
तस्मिन्न्यस्तभरः श्रीशे तत्कर्मैव समाचरेत् ॥ परमात्माहरेर्दासः स्यामहं तस्य सर्वदा ॥४७॥ इत्थं या विनि
योक्तृव्यक्तस्यैवात्मेश्वरस्य हि ॥ इत्येवं मनसा त्यक्तमहंता ममता ऽर्जिता ॥४८॥ देहेष्वहंमतिर्मूलं संसृतौ
कर्मबंधने । तस्मान्मह्यदहंकारो मनसा वर्जयेद्बुधः ॥४९॥ अथ नारायणपदं वक्ष्यामि गिरिजे शुभे
नाराइत्यात्मनो संहस्तेषां गतिः सो पुमान् ॥५०॥ तान्यवायनं तस्य तस्मान्नारायणः स्मृतः ॥ सर्वं हि चिद
चिद्व्यक्तं श्रूयते दृश्यते जगत् ॥५१॥ यो सौ व्याप्य स्थितो नित्यः स वै नारायणः स्मृतः । नार[illegible]ति सर्वे
पु॰ सं॰ पुंसां समूहः परिकीर्तितः ॥५२॥ गतिरालंबनं तेषां तस्मान्नारायणः स्मृतः ॥ नराज्जातानि तत्त्वानि नाराइ
५ २४ ति जगुर्बुधाः ॥५३॥ तान्येव चायनं तस्य तेन नारायणः स्मृतः ॥ कल्पांते पिंडजगत्कृत्स्नं ग्रसित्वा येन धार्य
८३ ते । पुनः संसृज्यते येन स वै नारायणः स्मृतः ॥५४॥ चराचरं जगत्कृत्स्नं नार इत्यभिधीयते ॥ तस्यावासं
गतिर्यत्तेन नारायणः स्मृतः ॥५५॥ नारो नराणां संघातस्तस्यास्याप्ययनं गतिः । तेनास्मिन्नु निभिर्द्वि
त्वं नारायण इतीरितः ॥५६॥ प्रभवंति यथा लोका महाब्धौ बुद्बुदा इव ॥ पुनर्यस्मात्प्रलीयंते तस्मान्ना राम
रायणः स्मृतः ॥५७॥ यो वै नित्यपदो नित्यो नित्यमुक्तैकभोगवान् ॥ ईशः सर्वस्य जगतः स वै नारायणः २४ ८३
स्मृतः ॥५८॥ नारायणः परं ब्रह्म तत्त्वं नारायणः परः ॥ नारायणः परो ध्याता ध्यानं नारायणः स्मृतः ॥५९॥ यस्मि

धारणावाचकेन उकारः कश्चिदुच्यते ॥ श्रीशब्दमपि तत्पश्चादीकारेणैव चोच्यते ॥ २९ ॥ भास्करस्य प्रभाय
द्वत्स्यानपायानपायिनी ॥ अकारेणोच्यते विष्णुः श्रीशः कारणकारणं ॥ ३० ॥ श्रीशः सर्वात्मनां शेषी ज
गद्बीजं परः पुमान् । जगत्कर्त्ता जगद्धर्त्ता ईश्वरो लोकबांधवः ॥ ३१ ॥ जगतामीश्वरी नित्या विष्णोरनपगामि
नी ॥ माता सर्वस्य जगतः पत्नी विष्णोर्मनोरमा ॥ ३२ ॥ जगदाधारभूता श्रीरुकारेणैव चोच्यते ॥ मका
रेण तयोर्दासः क्षेत्रज्ञः प्रोच्यते बुधैः ॥ ३३ ॥ ज्ञानाश्रयो ज्ञानगुणश्चेतनः प्रकृतेः परः ॥ न जातो निर्वि
कारश्च एकरूपस्वरूपभाक् ॥ ३४ ॥ अणुर्नित्यो व्याप्तिशीलश्चिदानन्दात्मकस्तथा । अहमर्थोऽव्ययः क्षेत्री
भिन्नरूपः सनातनः ॥ ३५ ॥ अदाह्योऽच्छेद्योऽक्लेद्योऽशोष्योऽक्षर एव च । एवमादिगुणैर्युक्तः शेष
भूतः परस्य वै ॥ ३६ ॥ मकारेणोच्यते जीवः क्षेत्रज्ञः परवान् सदा ॥ दासभूतो हरेरेव नान्यस्यैव कदाच
न ॥ ३७ ॥ एवं दासत्वमेवास्य मध्यमे वा धार्यते ॥ इत्येवं प्रणवस्यार्थो ज्ञातव्यो क्तोमयात्तघे ॥ ३८ ॥ विवृते
प्रणवस्यार्थमेवं शेषणे वै शुभे । परस्य दासभूतस्य स्वातंत्र्यं नेह विद्यते ॥ ३९ ॥ तस्मान्मह इदं हंकारं मनस्य
पि निवर्त्तयेत । स्वोपायबुद्ध्यायत्नत्यं तदपि प्रतिषिध्यते ॥ ४० ॥ अहंकृतिर्मकारः स्यान्नकारस्तन्निषे
धकः । तस्मात्तन्नमनेनैवास्य अहंकारविमोचनं ॥ ४१ ॥ मनसा सर्वसिद्धिः स्यादन्यथा नाशमाप्नुयात् ॥ म
नसा सहितं किंचित्तदहंकार उच्यते ॥ ४२ ॥ स्वाहंकारेण युक्तस्य सुखं किंचिन्न विद्यते ॥ अहंकारवि
मुक्तात्मा आनंदं तमसिमज्जति ॥ ४३ ॥ तस्मात्स्वमनसा स्वेन स्वातंत्र्यं प्रतिषिध्यते ॥ भगवत्परतंत्रो सो

र्थमखिलं जगत ॥ भोगक्रीडनया विष्णोर्विभूतिहृदयसंस्थितं ॥९॥ भोगो नित्यद्वयोस्तत्र लीलां सं
प. हरते कदा ॥ भोगो लीला उभौ तस्य धार्य्येते शक्तिमत्तया ॥१०॥ त्रिपाद्व्याप्तेः परं धाम्नः पदेस्य
हाभयस्तु पुनः ॥ त्रिपाद्विभूतिर्नित्यं स्यादनित्यं पादमस्येश्वरे ॥११॥ नित्यं तद्रूपमीशस्य परं धा
म्नि स्थितं हि शुभं ॥ अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितं ॥१२॥ नित्यं संभोगमैश्वर्य्यं श्रि
याह्यस्याच संवृतं ॥ नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ॥१३॥ यथा सर्वगतो विष्णुस्त
थालक्ष्मीः शुभानने ॥ ईशाना सर्वजगतो विष्णुपत्नी सदाशिवा ॥१४॥ सर्वतः पाणिपादान्ता सर्व
पु.स. तोक्षिशिरोमुखा ॥ नारायणी जगन्माता समस्तजगदाश्रया ॥१५॥ यदपांगाश्रितं सर्वं जगत
हरि स्थावरजंगमं ॥ जगत्स्थितिलयौ तस्य उन्मीलननिमीलनात् ॥१६॥ सर्वस्याद्या महालक्ष्मीस्त्रि
८५ गुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥१७॥ तोयादिरसरूपाणि सेव
लीलावपुर्भवेत् ॥ लक्ष्मीरूपत्वमापन्ना धनवत्ताप्रीतिर्हि सा ॥१८॥ एवंविधस्वरूपा सा जगतः श्रीः
श्रिता हरिं ॥ समस्तवेद्यं वेदाश्च लक्ष्मीरूपं वरानने ॥१९॥ स्त्रीरूपमखिलं सर्वं तस्यैव वपुरुच्य
ते ॥ सौन्दर्य्यं शीलवृत्तं च सौभाग्यं स्त्रीषु संस्थितं ॥२०॥ तत्स्वरूपं च गिरिजे सर्वासां वरयोषितां ॥ य राम ८५
स्याः कटाक्षायतमात्र दृष्ट्या ब्रह्मा शिवस्त्रिदशाधिपतिर्महेन्द्रः ॥ चंद्रश्च सूर्यो धनदो यमोऽग्निः हरि
प्राप्तमैश्वर्यमथाप्नुवंति ॥२१॥ लक्ष्मीः श्रीः कमला विद्या माया विष्णुप्रिया सती ॥ पद्मालया

स्करः। न नष्टप्राणिलोकानि न चाहं महदावृतः॥८९॥ यस्माज्जगद्भूतं तेन संसारं हरिणास्तु मे। स्पृष्ट
पुनस्तथा सर्गं तस्मान्नारायणोच्यते॥९०॥ तस्य दासं चतुर्थ्यन्तं मंत्रैः प्रोक्तं तु पार्वति। दासभूत
मिदं तस्य ब्रह्मादं सकलं जगत्॥९१॥ एवमर्थं विदित्वा वै पश्चान्मंत्रं प्रयोजयेत्। अविदित्वार्थ
मंत्रस्तु संसिद्धिं नाधिगच्छति॥९२॥ इति श्रीपद्मपुराणे उत्तरखंडे उमामंत्रार्थोपदेशो नाम द
त्रिंशोध्यायः। श्रीपार्वत्युवाच॥ विस्तरेण मम चेदमंत्रार्थपदगौरवं। ईश्वरस्य स्वरूपं च तत्
त्त्वाश्च विभूतयः॥१॥ तद्विभोः परमं धाम व्यूहभेदांस्तथा हरेः। सर्वमाख्याहि तत्त्वेन मम सर्वसुरे
श्वर॥२॥ श्रीरुद्र उवाच॥ शृणु देवि प्रवक्ष्यामि स्वरूपं परमात्मनः। विभूतिगुणसंघातं तत्त
वस्यात्मकं हरेः॥३॥ यः परः पुरुषो विष्णुर्नारायण उदाहृतः। स ईश्वरश्च जगतां परमात्मा सनात
नः॥४॥ विश्वतः पाणिपादश्च चक्षुष्मान् विश्वतः प्रभुः। विश्वानि भुवनान्यस्मिन् धामानि पर
माणि वै॥५॥ धारयन्सोप्यतिष्ठन्मनो सिद्धमहर्षिणां॥ एवं वहत्स्वरूपो यः सः परः पुरुषोत्तमः॥६
ईश्वर्य्यसहभोगार्थं दिव्यमंगलरूपवान्॥ वहत्कारोग्निसमानरूपो वा कुमारत्वमुपेयिवान् यु
न्हरिः। रमेश्रिया सोऽजगतां जनन्यास्वज्योत्स्नया चंद्रइवामृतांशुः॥७॥ अस्यैव च तु गदीश्वर्या
कुमारो नित्ययौवनः॥ कंदर्पकोटिलावण्यः संतस्थौ परमे पदे॥८॥ भोगार्थं परमे व्योमलीला

विभर्ति द्वयमेश्वर्यं तथैव सकलात्मनः ॥७४॥ श्रीमल्लीलापतिर्योसाव ध्वतःसमुदाहृतः ॥ तस्मात्स
प० र्वेश्वर त्वं तु वासुदेवे प्रतिष्ठितं ॥७५॥ योसौ यज्ञेश्वरो यज्ञो यज्ञभुक् यज्ञकृद्विभुः ॥ यज्ञभृत् यज्ञपु
रुषः स एव परमेश्वरः ॥७६॥ यज्ञेश्वरो हव्यकव्योव्ययात्मा हरिरीश्वरः ॥ तत्संनिधाद्यपर्यंति सद्योरह्यां
स्वशेषाण्यसुराश्च मृताः ॥७७॥ योसौ विराट्त्वमापन्नो हरिर्भूतिजनार्दनः ॥ संतर्पयति लोकांस्त्रीन्त्र
एव परमेश्वरः ॥७८॥ येन पुरुषेणेह विष्णुदेव यज्ञमतन्वत ॥ तस्माद्यज्ञात्समुत्पन्ना ये केच नो भया
दतः ॥७९॥ तस्माद्यज्ञात्सर्वभूत ऋचः सामानि यज्ञिरे ॥ तस्माद् अश्वा अजायंत गावश्च पुरुषादयः
पु॰स॰ ॥८०॥ पुरुषस्य तेनोरस्य सर्वं यज्ञमयस्य वै ॥ हरेः सर्वं समुद्भूतं जगत्स्थावरजंगमं ॥८१॥ मुखबाहूरुपादे
८५ भ्यस्तस्य वर्णा यथाक्रमं । पद्भ्यां तु पृथ्वी तस्य शिरसो द्यौरजायत ॥८२॥ मनसश्चंद्रमा जातश्चक्षुष
श्च भास्करः ॥ मुखादग्निशीर्षितोद्यौ वायुः प्राणात्सदागतिः ॥८३॥ नाभेर्वियद् ध्रुवर्गगनं जगत्सर्वं
चराचरं ॥ यस्मात्सर्वं समद्भूतं जगद्धि त्वा सनातनात् ॥८४॥ तस्मात्सर्वमयो विष्णुर्नारायण इतीरि
तः ॥ एवं सृष्ट्वा जगत्सर्वं पुनः संग्रसते हरिः ॥८५॥ निजलीलासमुद्भूतं तातवं सोर्णनाभिवत् ॥ ब्रह्माणमिं
द्रं रुद्रंश्च यमं वरुणमेव च ॥८६॥ निगत्स्वेहरते यस्मात्तस्माद्धरिरिहोच्यते ॥ असावेकार्णवीभूते राम
मायावटदले पुमान् जगत्स्वजठरे कृत्वा शेते तस्मिन्सनातनः ॥८७॥ आसीदेको हवै चात्र विष्णु ५५
नारायणोव्ययः ॥ न ब्रह्मा न च रुद्रश्च न देवा न महर्षयः ॥८८॥ नेमे द्यावापृथिवी न सोमो न च स

चिज्जगत्यस्मिन्दृश्यते श्रूयतेपि वा ॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥६०॥ अपहतपाप्मा
पुरुषः सर्वभूतांतरात्मा स्थितः ॥ दिव्यः एकः सदा नित्यो हरिर्नारायणोच्युतः ॥६१॥ यत्र द्रष्टा च द्रष्टव्यं श्रो-
ता श्रोतव्यमेव च । स्प्रष्टा स्प्रष्टव्य तथा ध्याता ध्यातव्यमेव च ॥६२॥ वक्ता च वाच्यं च ज्ञानं ज्ञातव्यं चित्
चिज्जगत ॥ तच्च सर्वं हि हरिः श्रीशो नारायण उदाहृतः ॥६३॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्
स लोकान्सर्वतो व्याप्य अत्यतिष्ठद्दशांगुलं ॥६४॥ यद्भूतं यच्च भाव्यं च सर्वं नारायणो हरिः । उतामृतत्व-
स्येशानो यदन्नेन विराट्पुमान ॥६५॥ स ईश्वरः पुरुषो विष्णुर्वासुदेवोच्युतो हरिः । हिरण्मयो यो भगवा-
नमृतः शाश्वतः शिवः ॥६६॥ पतिर्विश्वस्य जगतः सर्वलोकेश्वरः प्रभुः ॥ हिरण्यगर्भः सविता अनंतो सै
महेश्वरः ॥६७॥ भगवानिति शब्दोयं तथा पुरुष इत्यपि वितौ । निरुपाधिश्च वासुदेवे खिलात्मनि ॥६८॥
ईश्वरो भगवान्विष्णुः परमात्मा जगद्गुरुः ॥ शास्ता चराचरस्यैको यतीनां परमा गतिः ॥६९॥ यो वेद-
दौश्वरः प्रोक्तो वेदांते च यतीरितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥७०॥ यो सावकारो वै
विष्णुर्विष्णुर्नारायणो हरिः ॥ स एव पुरुषो नित्यः परमात्मा महेश्वरः ॥७१॥ यस्मिन्नीश्वरसंज्ञापि प्रोच्य-
ते मुनिभिस्तथा ॥ निरुपधीश्वरत्वं हि वासुदेवे प्रतिष्ठितं ॥७२॥ आत्मेश्वर इति प्रोक्तो वेदवादैः स-
नातने ॥ तस्मान्महेश्वरत्वं तु वासुदेवे प्रतिष्ठितं ॥७३॥ असौ त्रेपाङ्गेषु लीलाया अपि चेश्वरः

वाप्नुयो ॥३५॥ एवंविदित्वा मं आर्थी तद्वृत्तिं सम्यगाचरेत् । दासभूतमिदं तस्य जगत्स्थावरजंगमं ॥३६॥
प. श्रीमन्नारायणः स्वामी जगतां प्रभुरीश्वरः । माता पिता भ्राता बंधुर्निवासः शरणं गतिः ॥३७॥ कल्या
णगुणवान्श्रीशः सर्वकामफलप्रदः । योसौ निर्गुण इत्युक्तः शास्त्रेषु जगदीश्वरः ॥३८॥ प्राकृतैर्हे
यसंयुक्तैर्गुणैर्हीनत्वमुच्यते ॥ यत्र मिथ्याप्रपंचत्वं वा क्वचिद्वेदांतगोचरैः ॥३९॥ दृश्यमानमिदं स
र्वमनित्यमिति चोच्यते ॥ अत्रापि प्राकृतं रूपं मंडस्यैव विनाशनं ॥४०॥ आकृतानो हि रूपाणाम
नित्यत्वं तथोच्यते ॥ इममर्थं महादेवि प्रकृतेरुद्भवं हरेः ॥४१॥ क्रीडार्थं देवदेवस्य विष्णोर्लीला वि
पु. सं. काशिनः ॥ लोके चतुर्दश भूर्भुव सागरे द्वीपसंयुतैः ॥४२॥ ततैश्चतुर्दशभिः भूधैश्च महात्सवैः
८६ परिपूर्णमिदं रम्यमंडं प्रकृतिसंभवं ॥४३॥ सप्तैरावरणैर्युक्तं दशोत्तरगुणान्वितैः ॥ कलाकाष्ठादिरू
पेणाय कालः परिवर्तते ॥४४॥ कालेनैव जगत्सर्वं स्थितिसंहारकं भवेत् ॥ चतुर्युगसहस्रे द्वे
ह्मणो दिवसं भवेत् ॥४५॥ तावंति शतवर्षाणि ब्रह्मणो व्यक्तजन्मनः । सोयलु ब्रह्मणः अन्ते सर्वसं
हारको भवेत् ॥४६॥ अंडमधिगता लोका दह्यंते कालवह्निना । सर्वात्मनस्तथा विष्णोः प्रकृतौ वि ८६
निवेशिताः ॥४७॥ अंडावरणभूतानि प्रकृतौ लीनमाप्नुयुः । सा सर्वजगदाधारा प्रकृतिर्हि हरिसंश्रि ८७
ताः ॥४८॥ तया जगत्सर्गलयौ करोति भगवान्सदा ॥ क्रीडायां देवदेवेन सृष्टा माया जगन्मयी ॥४९॥
अविद्या प्रकृतिर्माया महाविद्या जगन्मयी ॥ अविद्याप्रकृतिर्माया गुणत्रयमयी सदा ॥५०॥

पद्महस्ता पद्माक्षी पद्मसुंदरी ॥२२॥ भूतानामीश्वरी नित्या सत्या सर्वगता शुभा। विष्णुपत्नी
महादेवी क्षीरोदतनया रमा ॥२३॥ अनेनलोकनारी भूर्लीला सर्वसुखप्रदा। रुक्मिणी च तथा
सीता सर्ववेदवती शुभा ॥२४॥ सीता सरस्वती गौरी शांतिः स्वाहा स्वधा रतिः। नारायणी वरारोहा
विष्णोर्नित्यानपायिनी ॥२५॥ एतानि पूर्वनामानि प्रातरुत्थाय यः पठेत्। स महच्छ्रियमाप्नोति
धनधान्यमकल्मषं ॥२६॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां। चंद्रां हिरण्मयीं लक्ष्मीं
विष्णोरनपगामिनीं ॥२७॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहो
पह्वये श्रियं ॥२८॥ एवं श्रुत्यिक्संसिता यांस्तूयमानां महेश्वरीं॥ सर्वैश्वर्यसुखप्रदा शिवादी
नांदिवौकसां ॥२९॥ अस्येशाना हि जगतो विष्णुपत्नी सनातनी। यस्या अपांगाश्रये सर्वं जग
त्स्थावरजंगमं ॥३०॥ यस्य वक्षसि सा देवी प्रभा गत्वा विवर्तिष्टति। स वै सर्वेश्वरः श्रीमान् अक्षरः
पुरुषोऽव्ययः ॥३१॥ स वै नारायणः श्रीमान् वात्सल्यगुणसागरः॥ स्वामी सुशीलः सुभगः सर्व
ज्ञः सर्वशक्तिमान् ॥३२॥ नित्यं संपूर्णकामश्च नैसर्गिकसुहृत्सुखी। कृपापीयूषजलधिः
शरण्यां सर्वदेहिनां ॥३३॥ स्वर्गापवर्गसुखदो भक्तानां करुणाकरः॥ श्रीमते विष्णवे तस्मै दास्यं स
र्वं करोम्यहं ॥३४॥ देशकालाद्यवस्थासु सर्वास्वकमलापतेः॥ इति स्वरूपे संसिद्धं सुखं दास्यम

ल्पकोटिशतैरपि ६४ हरेः पदं वर्णयितुं न शक्यं मया च धात्रा च मुनीन्द्रवर्यैः यस्मिन्पदे त्र्य
प. च्युत ईश्वरो यो सौ वेद्यदिवानवेद ६५ यदक्षरं वेदगुह्यं यस्मिन्देवा अधिविश्वे निषेदुः
तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ६६ अक्षरं शाश्वतं नित्यं दिवीव चक्षुराततं अप्रवेष्टुम
शक्यं तद्ब्रह्मरुद्रादिदैवतैः ६७ ज्ञानेन शास्त्रमार्गेण वक्ष्यते योगिपुंगवैः अहं ब्रह्मा च देवाश्च
न जानंति महर्षयः ६८ सर्वोपनिषदामर्थं दृष्ट्वा वक्ष्यामि सुव्रते। विष्णोः पदे हि परमे व्योम्नि पदे
मुक्ताः कृपः ६९ यजमानो भूरिशृंगा आसते तत्सुखं हरेः। अत्राह तत्परं धाम सम्यक्तामस्य
शार्ङ्गिणः ७० तद्भाति परमं धाम योनिमेषैः सुखावृत्यैः। आदित्यवर्णं तमसः परस्ताज्ज्योतिर
पु.सं च्युतं ७१ अथातो ब्रह्मणो लोकः प्रभुरूः सत्वसनातनः। सामान्यं विद्यते भूते अंते स्मिन्शाश्व
८७ ते पदे ७२ तस्य तु ज्ञागरूकेस्मिन्युवानो श्रीः सनातनः। यतः स्वसारौ युवती भवतीनो विभुवल्ल
भौ ७३ अत्र पूर्वे ये च साध्या विश्वे देवाः सनातनाः। ते ह नाकं महिमानः सर्वतः समदर्शनाः
७४ तत्पदं ज्ञानिनो विप्रा यांति स्तुवास मिश्रुतः। तद्विष्णोः परमं धाम मोक्ष इत्यभिधीयते ७५ राम
तस्मिन्बंधविनिर्मुक्ताः प्राप्यं ते तत्सुखं पदं यं प्राप्य न निवर्त्तंते तस्मान्मोक्ष उदाहृतः ७६ नि ८७
त्यं परं पदं लिंगममतं विष्णुमंदिरं। अक्षरं परमं धाम वैकुंठं शाश्वतं परं ७७ नित्यं च परमव्योमसर्वे

सर्गस्थितिलयानांसाहेतुभूतासनातनी॥योगनिद्रा महामाया प्रकृतिस्त्रिगुणान्विता॥५१॥
अव्यक्ताच प्रधानञ्च विष्णोर्लीलाविकारिणः॥जगत्सर्गलयोस्यातां प्रकृतेरेवसर्वदा॥५२॥अ
संषंप्रकृतिस्थानंनिबिडध्वांतमव्ययं॥सीम्निसाम्नि विरजा निःसीमाकुसनातनी॥५३॥त
याबतंजगत्सर्वं स्थूलसूक्ष्माद्यवस्थया॥विकारसंकोचावस्थाभ्यांतस्यांसर्गलयौस्मृतौ
॥५४॥एवंभूतानिसर्वाणि प्रकृत्यंतर्गतानिवै।ततःसूक्ष्ममिदंसर्वं प्रकृत्यंतर्गतमहत्॥५५॥
एवंप्राकृतरूपेस्य विष्णोरूपमुत्तमं।त्रिपाद्विभूतिरूपंतुशृणुभूधरनंदनि॥५६॥प्रधानप
रमव्योम्नोरंतरे विरजानदी।वेदांगस्वेदजनिततोयैःप्रस्राविताशुभा॥५७॥तस्याःपरेपरव्यो
मत्रिपाद्भूतंसनातनं॥अमृतंशाश्वतंनित्यं अनंतंपरमंपदं॥५८॥शुद्धसत्वमयंदिव्यमक्षरं
ब्रह्मणःपदं।अनेककोटिसूर्याग्नितुल्यवर्च्चसमव्ययं॥५९॥सर्ववेदमयंशुद्धंसर्गप्रलयवर्जि
तं।असंख्यमजरंनित्यंजाग्रत्स्वप्नादिवर्जितं॥६०॥हिरण्मयंमोक्षपदंब्रह्मानंदसुखाह्वयं
समानाधिक्यरहितमाद्यंतरहितंशुभं॥६१॥तेजसाद्भुतंरम्यंनित्यमानंदसागरं॥एवमादि
गुणोपेतंतद्विष्णोःपरमंपदं॥६२॥नतद्भासयतेसूर्यो नशशांको नपावकः॥यद्गत्वाननिव
र्तंते तद्धाम परमं हरेः॥६३॥तद्विष्णोःपरमंधामशाश्वतंनित्यमच्युतं॥नहिवर्णयितुंशक्यंक

दै
लेस्तु कुमुदारव्यैस्सुरक्षिता। चंडप्रचंडौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ १३ वारुण्यां जयविजयौ सौ
प॰ म्ये धातृविधातरौ कुमुदः कुमुदाक्षश्च पुंडरीकोथ वामनः १४ शंकुकर्णः सर्वनिद्रः सुमुखः
सुप्रतिष्ठितः एते दिक्पतयः प्रोक्ताः पुर्य्यामुत्तमसुभानने १५ कोटिवैश्वानरप्रख्यैर्गृहपंक्तिभिरा
वृता। आरूढयौवनैर्नित्यैर्दिव्यनारीनरैर्युता १६ अंतःपरं तु देवस्य मध्ये पुर्य्या मनोहरं। मणि
प्राकारसंयुक्तं वरतोरणसंवृतं १७ विमानैर्गृहमुख्यैश्च प्रासादैर्बहुभिर्वृतं। दिव्याप्सरोगणैः स्त्री
भिः सर्वतः समलंकृतं १८ मध्ये तु मंडपं दिव्यं राजस्थानं महोत्सवं। माणिक्यस्तंभसाहस्रं जुष्टं र
त्नमयं शुभं १९ दिव्यमुक्तैः समाकीर्णं सामगानोपशोभितं। मध्ये सिंहासनं रम्यं सर्ववेदमयं शुभं २०
पु॰सं॰ धर्म्मादिदेवतैर्नित्यैर्वृतं वेदमयात्मकैः। धर्मज्ञानतथैश्वर्यवैराग्यैः पादविग्रहैः २१ ऋग्य
८८ जुः सामाथर्वैः सारूपैर्नित्यैर्वृतं क्रमात् शक्तिराधारशक्तिश्च चिच्छक्तिश्च सदाशिवा २२ धर्मा
दिदेवतानां च शक्तयः परिकीर्त्तिताः वसंति मध्यमं तत्र वह्निसूर्यसुधाशिवः २३ कूर्मश्च नागरा राम
जश्च वैनतेयस्त्रयीश्वरः। छंदांसि सर्वमंत्राश्च पीठरूपत्वमास्थिताः। २४ सर्वाक्षरमयं दिव्यं ८९
योगपीठमिति स्मृतं। तन्मध्येष्टदले पद्ममुद्यार्कसमप्रभं २५ तन्मध्ये कर्णिकायां तु सावित्र्यास्तु ८८
भद्रशीने ईश्वर्यासह देवेशस्तत्रासीनः परःपुमान् २६ इंदीवरदलश्यामः कोटिसूर्यप्रकाशवान्

त्व एवं सनातनं पर्य्यायवाचकान्यस्यपरं धाम्नोच्युतस्यहि ७८ तस्य त्रिपाद्विभूतेस्तु स्वरूपं वक्ष्यामि
विस्तरात्। इति श्रीपद्मपुराणे उत्तरखंडे उमामहेश्वरसंवादे त्रिपाद्विभूतिकथनं नाम त्रयविंशोध्यायः
श्रीरुद्र०। त्रिपाद्विभूतेर्लोकास्तु ह्यसंख्याः परिकीर्त्तिताः। शुद्धसत्वमयाः सर्वे ब्रह्मानंदसुखाह्वयाः १
सर्वे नित्या निर्विकारा हेयरागविवर्जिताः। सर्वे हिरण्मयाः शुद्धाः कोटिसूर्यसमप्रभाः। २। सर्वे वेद
मया दिव्याः कामक्रोधादिवर्जिताः। नारायणपदांभोजभक्त्यैकरससेविताः ३ निरंतरं सामगानपरि
पूर्णसुखं श्रिताः सर्वे पंचोपनिषदस्वरूपा वेदवर्चसः ४ सर्वे वेदमयैर्दिव्यैः पुरुषैस्त्रीभिरावृताः।
वेदैकरसतोयाढ्यैः सरःकूपशोभिताः ५ श्रुतिस्मृतिपुराणादिरूपस्थावरसंयुताः। सर्वावस्थितं दि
शकं नमयालोकविभक्तिः। ६ विरजायाः परव्योम्नो ह्यंतरं केवलं स्मृतं तत्स्थानमुपभोक्तव्यम
व्यक्तं ब्रह्मसेवितं ७ स्वात्मज्ञानंदसुखदं केवलं परमं पदं निःश्रेयसं च निर्वाणं कैवल्यं मोक्ष उच्य
ते ८ श्रीशांघ्रिभक्तिसेवैकरसभोगविवर्जिताः। महात्मानो महाभागा भगवत्पादसेवकाः ९
तद्विष्णोः परमं धाम यांति ब्रह्मसुखप्रदं। नानाजनपदाकीर्णं वैकुंठं तद्धरेः पदं। १० प्राकारैश्च वि
मानैश्च सौधरत्नमयैस्तथा तन्मध्ये नगरी दिव्या साऽयोध्येति प्रकीर्त्तिता ११ मणिकांचन
८७ चित्राद्यैः प्राकारैस्तोरणैर्वृता चतुर्द्वारसमायुक्ता तुंगगोपुरसंवृता १२ चंडादिद्वारपा

स

दिव्यचंदनलिप्तांगा दिव्यपुष्पोपशोभिता। ४१ मंदारकेतकीजातीपुष्पांचितकुंतला सुभ्रूसुना
सा सुश्रोणी पीनोन्नतपयोधरा ४२ परिपूर्णेंदुसंकाशसुस्मिताननपंकजा तरुणादित्यवर्णा- ९९
भ्यां कुंडलाभ्यां विराजिता ४३ तप्तकांचनवर्णाभा तप्तकांचनभूषणा। हस्तैश्चतुर्भिः संयुक्ता क-
नकांबुजभूषिता: ४४ नानारत्नविचित्राढ्या कनकांबुजमालया। हारकेयूरकटकैरंगुलीयै
श्च शोभिता ४५ भुजद्वयधृतादर्शपद्मयुग्मविराजिता गृहीतमातुलंगाख्यजांबूनदकरां
चिता: ४६ एवं नित्यानपायिन्या महालक्ष्म्या महेश्वरः। मोदते परमव्योम्नि शाश्वते सर्वदा
प्रभुः ४७ पार्श्वयोरवनीलीले समासीने सुभानने। अष्टदिक्षु दलाग्रेषु विमलाद्याश्च शक्त-
पुसं यः ४८ विमलोत्कर्षिणीज्ञाना क्रियायोगा तथैव च। प्रह्वी सत्या तथेशाना महिष्यः परमा-
त्मनः ४९ गृहीत्वा चामरान् दिव्यान् सुधाकरसमप्रभान्। सर्वलक्षणसंपन्ना मोदंते पतिम-
८ ६५ च्युते ५० दिव्याप्सरगणाः पंचशतसंख्याश्च योषितः अंतःपुरनिवासिन्यः सर्वाभरणभूषिता:
५१ पद्महस्ताश्च ताः सर्वाः कोटिवैश्वानरप्रभा सर्वलक्षणसंपन्नाः शीतांशुसदृशाननाः ५२ ता- राम
भिः परिवृतो राजा शुशुभे परमः पुमान्। अनंतविहगाधीशसेनान्याश्च सुरेश्वरैः ५३ अन्यैः पा- ६०८६
र्षदैर्नित्यैर्मुक्तैश्चापरिसेवितः। मोदते रमया सार्द्धं भोगैश्वर्यैः परः पुमान् ५४ एवं वैकुंठनाथो-
ऽसौ नाद्यते परमे पदे तद्व्यूहमंदालोकांश्च वक्ष्यामि गिरिजे शुभे ५५ प्राच्यां वैकुंठलोक

युवाकुमारः स्निग्धांगः कोमलावयवैर्युतः २७ फुल्लरक्तांबुजनिभकोमलांघ्रिकराब्जवान् प्र
फुल्लपुंडरीकाक्षः सुभ्रूलतयुगांकितः २८ सुनासासुकपोलाढ्यसुशोभमुखपंकजः। मुक्ताप्र
लाभदंताढ्यः सस्मिताधरविद्रुमः २९ परिपूर्णेंदुसंकाशस्सुस्मिताननपंकजः तरुणादित्यव
र्णाभ्यां कुंडलाभ्यां विराजितः ३० सुस्निग्धनीलकुटिलकुंतलैरुपशोभितः मंदारपारिजाता
द्यैः कबरीकृतकेशवान् ३१ प्रातरुद्यत्सहस्रांशुनिभकौस्तुभशोभितः हारस्वर्णस्रगासक्तकं
बुग्रीवाविराजितः ३२ सिंहस्कंधनिभैः प्रौढैः पीनैरंसैर्विराजितः पीनवृत्तायतभुजैश्चतुर्भिरुप
शोभितः ३३ अंगुलीयैर्लक्रटकैः केयूरैरुपशोभितः बालार्ककोटिसंकाशैः कौस्तुभाद्यैः सुभूष
णैः ३४ विराजितमहावक्षा वनमालाविभूषितः। विधातुर्जन्मस्थाननाभिपंकजशोभितः ३५
बालातपनिभश्लक्ष्णपीतवस्त्रसमन्वितः। नानारत्नविचित्राभ्यां कटकाभ्यां विराजितः ३६ सज्यो
त्स्नचंद्रद्युतिमनखपंक्तिभिरावृतः। कोटिकंदर्पलावण्यः सौंदर्यनिधिरच्युतः दिव्यचंदनलि
प्तांगो दिव्यमालाविभूषितः।। शंखचक्रगृहीताभ्यामुद्राकुभ्यां विराजितः ३८ वरदाभयहस्ता
भ्यामितराभ्यां तथैव च। वामांके संस्थिता देवी महालक्ष्मीर्महेश्वरी। ३९ हिरण्यवर्णा हरिणी सुवर्ण
रजतस्रजा सर्वलक्षणसंपन्ना यौवनारंभविग्रहा ४० रत्नकुंडलसंयुक्ता नीलकुंचितशीर्षजा।। ९०

९१ व्यं प्रपन्ने हे सनातने ६९ श्रीपार्वत्युवाच। साधूक्तं परमं त्वगीस्त्वहं पृष्टं भगवता प्रभो। परव्यो
म्नि स्थितो देवः कथं प्रीतिमंडले ७० स्थितवान् किंनिमित्तेन लीलया किंप्रयोजने शुद्धसत्व
मये लोके संस्थितः परमेश्वरः ७१ कथं रजस्तमोभिश्च अविभूतो स्थितवान् प्रभुः। श्रीरुद्र उवाच॥ त्रिपा
द्विभूतौ भगवान् ईश्वर्या परमेश्वरः। नित्यमुक्तैकभोग्योसौ मोदते सततं विभुः ७२ तमीश्वरं महा
माया प्रकृत्या जगदाश्रया। कृतांजलिपुटा भूत्वा तुष्टाव परमेश्वरं ७३ महामायोवाच। नमस्ते
त्रिजगद्धाम्ने नमस्ते विश्वरूपिणे। पुराणाय नमस्तुभ्यं जगदुत्पत्तिहेतवे ७४ श्रीभूलीलाधिपतये
नमो नारायणाय च। नमो भगवते तुभ्यं वासुदेवाय शार्ङ्गिणे ७५ सर्वदेवस्वरूपाय विश्वेविजिस्वेन
मः। सहस्रमूर्तये तुभ्यं अनंताय नमोस्तु ते ७६ अच्युताया विकाराय शुद्धसत्वस्वरूपिणे। आदिमध्यां
९१ तरहितस्वरूपाय नमो नमः। नमो हिरण्यगर्भाय यज्ञानायपरमात्मने ७७ सर्वभूतात्मने तुभ्यं सर्वभूताश्र
याय च ब्रह्मणे ज्योतिषे तुभ्यं नमस्ते विश्वरूपिणे ७८ नमः शुचिषदे तुभ्यं सूर्याय शुभवर्चसे अ राम
ग्नये हव्यभोक्त्रे च तस्मै यज्ञात्मने नमः ७९ नमस्ते प्रसवित्रे च सर्गस्थित्यंतहेतवे निर्गुणाय नमस्तु
भ्यं सर्वात्मांतर्वर्तिने। ८०। अव्यक्ताय नमस्तस्मै विश्वेलोकसाक्षिणे नारायणाय ईशाय पूर्णषा
ड्गुण्यमूर्तये। ८१ अनंतगुणपूर्णाय नमः सर्वार्थदायिने। नमस्ते वासुदेवाय पंचावस्थस्वरूपि ९१
णे ८२ नमः पंचनवव्यूहभेदरूपायते नमः। नमो यज्ञवराहाय गोविंदाय नमो नमः। ८३ अविकृ
ताय प्रबुद्धायाहे यप्रतिभटाय च। नारायणाय कूर्माय नमः सिंहायते नमः ८४ केशवाय नम

स्यवासुदेवस्यमंदिरं आग्नेय्यांलक्ष्म्यालोकस्तुयाम्यांसंकर्षणालयः ५६ सारस्वतंतुनैरृत्यांप्राद्यु
म्नःपश्चिमेतथा ईरतिलोकस्तुवायव्यामुदीच्यामनिरुद्धकः ५७ ऐशान्यांशांतिलोकःस्या
त्प्रथमावरणंस्मृतं। मत्स्यकूर्मादिलोकास्तुद्वितीयावरणंपरं ५८ सत्याच्युतानंतदुर्गाविष्वक्से
नगजाननाः। शंखपद्मनिधीलोकाश्चतुर्थावरणंस्मृतं ५९ ऋग्यजुःसामथर्वाणलोका
दिषुमहत्सुच। सावित्र्याविहगेशस्यधर्मस्यचमखस्यच ६० पंचमावरणंप्रोक्तंमहयं
सर्ववाङ्मयं। शंखचक्रगदापद्मखड्गशार्ङ्गहलंतथा ६१ षष्ठमावरणंप्रोक्तंमंत्राष्टद
शमद्वरं। ऐंद्रपावकयाम्यानिनैरृतंवारुणीतथा ६२ वायव्यसौम्यमैशानंसप्तमंमुनि
भिःस्मृतं। साध्यामरुद्गणाश्चैवविश्वेदेवातथैवच ६३ नित्याःसर्वेपरंधाम्नियेचान्येच
दिवौकसः। तेवैप्राकृतनाकेस्मिन् अनित्यास्त्रिदशेश्वराः ६४ तेनाकंमहिमानःसचंतइ
तिवैश्रुतिः। एवंपरंपदंनित्यंमुक्तभोगपरायणैः। दिव्याभिर्मूर्तिभिश्चराजतेविष्णुरीश्वरः
नतद्भासयतेसूर्योनशशांकोनपावकः। यद्गत्वाननिवर्तंतेयोगिनःशंसितव्रताः। हृद्येकं
मंत्रनिष्ठायेतेवैयांतितदव्ययं। नवेदयज्ञाध्ययनैर्नदानैर्नव्रतैस्तुभैः। नतपोभिर्निरा ९१
हारैर्नचसाधनकर्मभिः ६५ एकेनहृदयमंत्रेणतथाभक्त्यात्वनन्यया। तद्गम्यंशाश्वतंदि

९१ इति श्रीपद्मपुराणे उत्तरखंडे उमामहेश्वरसंवादे महदादिभूतसर्गो नामाध्यायः। श्रीपार्वत्यु
प० वाच विस्तरेण मम ख्याहि देवसर्गमनुत्तमं। ब्रह्मादित्रिदिवश्रेष्ठाः कथं जाताः सनातनाः १ ई
श्वरस्यावतारांश्च विस्तरेण वदस्व मे श्रीरुद्र उवाच। आकाशानिलतेजोंबुभुवः सृष्ट्वा यथाक्रमं
तासां मध्ये स हि ब्रह्माण्डमगाधजलमर्णवं २ अस्मिन्नेकार्णवीभूते जले मायावटच्छदे। आदा
य सर्वभूतानि योगनिद्रां ययौ हरिः ३ समागत्य सुकामस्तु योगनिद्रामुपेयिवान् तस्यां रेमे चिरं
कालं मायायां मधुसूदनः ४ तस्यां तु जनयामास कालात्मानमनुत्तमं। कलाकाष्ठामुहूर्ताद्य
पक्षमासादिरूपिणः ५ तस्मिन्काले हरेर्नाभिपंकजं मुकुलाकृति। विकसत्सर्वतः संधिं जगद्भूतं सुव
पु·सं० र्चसं ६ उद्भूतं तत्र च ब्रह्मा चतुर्मुखो महामतिः जगतस्स्रष्टुकामस्तु रजोगुणविबोधितः ७ तु
९२ ष्टाव योगनिद्रां यां शयानं परमेश्वरं। ब्रह्मोवाच। नमोस्तु विश्वचैतन्य सर्गस्थित्यंतहेतवे ८
जगद्भूषणभूषाय श्रीपते विश्वरूपिणे। नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ९ जगद्धिताय राम
कृष्णाय गोविंदाय नमो नमः। प्रधानकालात्मापुरुषायेश्वराय च १० नमः प्रपंचरूपाय निःप्रपं
चस्वरूपिणे नारायणाय विश्वाय विश्वेशाय नमो नमः ११ श्रीमल्लीलाधिपतये ब्रह्मणे परमात्म
ने। नमोस्तु वासुदेवाय विश्वरूपाय शार्ङ्गिणे १२ त्रयीनाथाय हरये वेदार्थात्मस्वरूपिणे अनंतक ९२
ल्याणगुणपरिपूर्णाय ते नमः १३ जगदुत्सर्गसंहारस्थितिलयहेतवे जगत्पते वृतं सर्वं जगन्नाथ प्रपंचं
सचराचरं १४ त्वमेव कारणं कर्ता कार्यं त्रिगुणवानसि। स्रष्टा धाता विधाता च त्वमेव परमेश्वर १५

स्माद्भयं जगतां क्लेशहारिणे। त्वमेव सर्वलोकानां आश्रयः पुरुषोत्तमः ८५ विष्णो प्रसीद देवेश सर्वलोक
हिताय वै। मत्स्यस्याचेतनाः सर्वे नीता येऽरा निराश्रयाः ८६ हीनदेहा निराकाराः सर्वेन्द्रियविवर्जिताः सर्व
गुणान्तरहिताः सततं दुःखभागिनः ८७ तेषां लोकांश्च देहांश्च दातुमर्हसि केशव। लीला विभूतिं स
र्वेज्ञ यथापूर्वं प्रकल्पय ८८ चेतनाचेतनं कृत्स्नं जगत्स्थावरजंगमं पश्यामि मोहितं पश्य लीलार्थं
रमेश्वर ८९ प्रकृत्याच मया सार्धं सृज त्वं परमेश्वर। धर्माधर्मैः सुखं दुःखं तस्मिन्निक्षिप्य संस्थितो।
ममाधिष्ठाय लीलां वै कर्तुमर्हसि माचिरं। ९० श्रीरुद्र उवाच। एवमुक्तस्तया देव्या पार्वति जगदीश्व
रः तस्यां निर्दिश्यमानायां जगत्स्रष्टुमुपक्रमे ९१ योसौ प्रकृतिपुरुषः प्रोच्यते स हाच्युतः। स एव भ
गवान्विष्णुः प्रकृत्यां प्रविवेश ह ९२ असृजत्प्रकृतौ ब्रह्मा भूतादिं महदाह्वयं। महतः पुरुषात्त
स्मादहंकारो ह्यजायते ९३ तेभ्यो गुणेभ्यस्तस्मादसृजद्विश्वभावनः। तस्मात्त्रिभ्यो ह्यजायन्त म
हाभूतानि तत्त्वशः ९४ आकाशं जनयत्याशु बुद्धात्त्रिगुणात्मनः। आकाशाज्जनयद्वा
युं वायोरग्नेरापः समुद्भुत ९५ अद्भ्यश्च पृथिवी मता। आकाशादीनि भूतानि सृष्टान्येकोत्तरगु गि
णा वै। शब्दः स्पर्शश्च रूपं च रसो गंधश्च तद्गुणाः। एकोत्तरगुणान्सृष्टा तान्यादाय महाप्रभुः। तेभ्यं
विमश्रमसृजद्देवः अंडं महत्तरं ९६ असृजत्त्रलोकान्वै संख्ययाये चतुर्दश। ब्रह्मादीन्निदशा
न असृजत्पुरुषोत्तमः ९७ देवं तिर्यक्तथा मनुष्यं स्थावरं च चतुर्विधं। तथा सृष्टे महत्सर्गे तेनैव ज
लेक्षणे ९८ ततत्कर्मानुरूपेण ब्रह्मादिषु योनिषु। संस्थिता प्रकृतौ पूर्वं आत्मनः प्रभवं तिहि

३२ स एव व्यक्तरूपः सन् व्याप्य स्वात्मन्य् एव स्थितः सर्गस्थितिलयं ब्रह्मा स्वयमेव प्रवर्तते ३३ षाड्
९० गुण्यपरिपूर्णोसौ वासुदेवः सनातनः । त्रिधाकृत्वा मनोरूपं चतुर्धा कुरुते जगत् । ३४ प्रद्युम्नमूर्ति
भगवान्स वैश्वर्यसमन्वितः । विधेः प्रजापतीनां च कालस्य जनकस्य च ३५ अंतर्यामित्वमापन्नः
सर्गं सम्यक् करोति हि सेतिहासांस्ततो वेदान्ददौ तस्मै महात्मने ३६ प्रद्युम्नस्यांशभूतोसौ ब्रह्मा लो
कपितामहः । जगत्सर्गस्थितिं सर्वमकरोत्पद्मसंभवः । ३७ अनिरुद्धो भगवान् शक्तितेजःसमन्वितः
मनूनां पार्थिवानां च कालस्य च जनस्य च ३८ स्थितिं करोति भगवानंतर्यामित्वमास्थितः । संकर्षणो ९२
महाविष्णुः विद्याबलसमन्वितः ३९ कालस्य सर्वभूतानां रुद्रस्य च यमस्य च । अंतर्यामित्वमास्था
य जगत्संहरते प्रभुः ४० इत्यंतर्याम्यवस्थाय विज्ञेया परमात्मनः । मत्स्यकूर्मवराहश्च नारसिंहो
पु० सं० थ वामनः ४१ रामो रामश्च कृष्णश्च बुद्धः कल्कीति ते दश । एते तु विभवावस्था ब्रह्मणः परमात्मनः ४२
नृसिंहरामकृष्णेषु षाड्गुण्यपरिपूरितं । परावस्था तु देवस्य दीपादुत्पन्नदीपवत् ४३ महावस्था हरे राम
९३ रस्य शृणुष्व गिरिजे शुभे । वैकुंठे परमे लोके विष्णुलोकमनुत्तमे ४४ श्वेतद्वीपं सुरम्यं तु क्षीरसाग
रमनुत्तमं । एवं चतुर्द्धा व्यूहं तु सम्यगुक्तं महर्षिभिः ४५ जलावरणमध्ये तु वैकुंठं कारणं शुभं । कोटिवै
श्वानरप्रख्यं परं धाम पदव्ययं ४६ आमोदसंभारकरैर्दिव्यैर्वृक्षैरभिराश्रितं नानामणिमयैर्दिव्यैर्विमा ९३
नकोटिभिर्वृतं ४७ यदुक्तं परमे धाम्नि तादृक्लक्षणसंस्थितं । तस्मिन्वैकुंठनगरे नानारत्नमयोज्ज्व
ले ४८ मध्ये देववती नाम पुरं रम्यमनुत्तमं । चतुर्द्वारसमायुक्तं हेमप्राकारतोरणं ४९ चंडादिद्वार

नागर्षिमुद्दसत्वस्त्वंतत्र निद्राकुलः प्रभो। देहित्वयिस्थितान्लोकान्समीवक्ष्योस्सनातनः। १६ एवमु
ऋ क्तो हृषीकेशो ब्रह्मणा परमेश्वरः। उत्तस्थौ शयनात्तस्माद्विमुक्तो योगनिद्रया। नियम्य योगनिद्रां तां
जगत्स्रष्टुमुपक्रमे। अचिंतयत्क्षणं देवो जगतां प्रभुरच्युतः। १८ चिंतयित्वा जगत्सर्वं सस्रुजद्दृष्टयस्त
तः लोकांश्चसर्वांश्चतदुपेतमंडं हिरण्मयं १९ सप्तद्वीपान्समुद्रांतान्मेदिनीभूधरैर्युता सहैवांडक
टाहेन नाभियज्ञेस्सृजत्प्रभुः २० तदंडमध्ये ब्रह्मांडईश्वरः कृतवान्हरिः। अथ नारायणः काममध्या
यतचेतसा २१ ध्यानांतस्तस्य भालानु स्वेदविंदुरजायत सस्वेदाबुद्बुदाकारः पृथिव्यामपतत्क्षणात २२
तस्मात्तु बुद्बुदात्सोहमुत्पन्नोस्त्रिवरानने त्र्यक्षश्शूलहस्ताहं जटामुकटमंडितः २३ किंकरोमीति
देवेशमेवोचं विनयान्वितः। ततो नारायणो देवो मामित्याह मुदान्वितः २४ करोषि जगतां रुद्र
संहारं भीमदर्शनः साक्षात्संकर्षणांशेन संहारार्थं वरानने २५ तस्मान्नारायणो देवाडुत्पन्नोस्मि
भयंकरः। नियोज्यमां तु संहारे पुनरेव जनार्दनः २६ नेत्राभ्यामसृजच्चंद्रसूर्यौ ध्वांतापहारिणौ
वायुं दिशश्चश्रोत्राभ्यां पिंडाग्नी स्वमुखांबुजात २७ नासाभ्यां वरुणं मित्रमसृजत्पंकजेक्षणः। व
कुभ्यामश्विनौ देवौ सध्यांश्च समरुद्गणाः। २८ समस्तरोमकूपेषु वनान्योषधयस्तथा त्वचि शैलाःस
मुद्राश्चगवाद्याः पशवस्तथा २९ मुखतः ब्राह्मणाः सृष्टा बाहुभ्यां क्षत्रियस्तथा ऊरुभ्यां वैश्यस्ततः प
द्भ्यां शूद्रश्चैवमजायत ३० एवं सृष्ट्वा जगत्सर्वं सचेतनमचस्थितं। विश्वरूपेण देवेशो व्याप्यांतर्वहि
रास्थितः ३१ शक्तिं विनाहरे [illegible] तेजनः। तस्मात्सर्वं जगत्प्राणो विष्णुरेव सनातनः।

गुणवान्नरस्त्वेव न संशयः ६७ तस्माद्दष्टाक्षरं मंत्रं जप्त्वा सुखतरं शुभं संप्राप्नोति परं लोकं वैकुंठं सर्वका
प० मदं ६८ तस्मिन्मणिमयस्तंभसहस्रसूर्यवर्चसि विमाने सुशुभे दिव्ये संस्थितो भगवान्हरिः ६९ तत्र चा
धारशक्त्यादिधृते पीठे हिरण्मये नानाहिरण्मयैर्दिव्यैर्नानावर्णसमन्वितैः ७० तस्मिन्नष्टदलेप
द्मे मंत्राक्षरपदे शुभे कर्णिकायां सुरम्यायां लक्ष्मीबीजं शुभाक्षरे ७१ तस्मिन्बालार्कसाहस्रकोटितु
ल्यप्रभान्वितः। दिव्यो नारायणः श्रीमानुपासीनः पंकजासने ७२ तस्य दक्षिणतः पार्श्वे जगन्माता ९३
हिरण्मयी। सर्वलक्षणसंपन्ना दिव्यमालाविभूषणा ७३ वसुपात्रं मातुलिंगं स्वर्णमयं च तं करैः। वा
मतः पृथिवी देवी नीलोत्पलदलप्रभा ७४ नानालंकारसंयुक्ता विचित्रांबरभूषिता। साधृता चोर्द्ध
बाहुभ्यां रम्यरक्तोत्पलद्वयं ७५ इतराभ्यां वृता देवी धान्यपात्रं शुभं तथा गृहीत्वा चामरान्दिव्या
पु॰सं॰ न्शक्त्यो विमलाद्याः ७६ दलाग्रेषु समासीनाः सर्वलक्षणशोभिताः। तासां मध्ये समासीनो भगवा
६४ नच्युतो हरिः ७७ शंखचक्रगदापद्मपाणिभिर्दिव्यभूषणैः। केयूरांगदहाराद्यैर्भूषणैरुपशोभितः ७८
श्रातरुद्यत्सहस्रांशुकुंडलाभ्यां विराजितः। पूर्वोक्तैस्त्रिदशैर्नित्यैः समंतैः। परमेश्वरः ७९ आस्ते वैकुं
ठनगरे नित्यशक्त्यैकभोगवान्। श्रीमदष्टाक्षरं मंत्रं सिद्धानां वै मनीषिणां ८० रम्यं तद्धि सर्वलोकं ने
तरेषां कदाचन। इत्येवं प्रथमं व्यूहं कथितं ते वरानने ८१ द्वितीयं वैष्णवं लोकं शृणु वक्ष्यामि सुव्रते यो ६४
र्यो नित्य इति ख्यातो लोको यं वैष्णवः स्मृतः ८२ तं लोकं विमलं पुण्यं शुद्धसत्वमयं शुभं। मध्याह्नसू
र्यसाहस्रं युगपद्भासितं सदा ८३ न[illegible]तेपि न लीयेत सत्यलोकमहत्तरं समब्रह्मादिदेवानां नद्र

पालाद्यैः कुमुदाद्यैः सुरक्षितं नानामणिमयैर्दिव्यैर्गृहपंक्तिभिरावृतं ५० विततं पंचपञ्चाशद्योज-
नैश्च समंततः सहस्रयोजनैस्तुंगैः प्रासादैः कोटिभिर्वृतं ५१ आरूढयौवनैर्दिव्यैः पुंभिः स्त्रीभिश्च
शोभितं स्त्रियश्च पुरुषास्तस्मिन्सर्वलक्षणशोभिताः ५२ समानरूपाः श्रीविष्णोः सर्वालंकारभूषिताः
दिव्यस्रग्वस्त्रसंछन्नाः दिव्यचंदनभूषिताः ५३ मोदंते तत्र देवेशं भक्त्याह्लादमनोरमैः मंत्राणाम्
रसंसिद्धा भक्त्या षोडशरूपया ५४ वृतास्तत्पदमाविश्य मोदंते मनसीप्सितं। गत्वास्मिन्न निवर्तंते वि-
ष्णुना सह संस्थिताः ५५ अविच्छिन्नात्मनां तेषां विष्णुना संगतिं शुभां तत्समानसुखं नित्यं प्राप्नुवंति मनी-
षिणः ५६ यत्र यत्र हरेर्लोकानाविश्य शुभचेतसः। नाप्नुवंति पुनः सर्गे स्वर्गस्था इव जंतवः ५७ यथा से-
भिर्भरतो यथा संकर्षणादयः। तथा ते नैव जायंते सत्यलोके यथेच्छया ५८ पुनस्तेनैव यास्यंति तत्पदं
शाश्वतं परं। न कर्मबंधनं जन्म वैष्णवानां च विद्यते ५९ विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः। नदा-
स्यं वै परेशस्य बंधनं परिकीर्तितं ६० सर्वबंधननिर्मुक्ताः हरिदासा निरामयाः। आब्रह्मभुवनाल्लोकाः
पुनरावर्तिलक्षणाः ६१ कर्मबंधमया दुःखमिश्राः साध्वसभयप्रदाः। बह्वायासफला दुःखजनिनाश-
करहेतवः ६२ स्वर्गोपभोगास्तत्क्षणं विषमिश्राशनं यथा। स्वर्गसंस्थान्नरान्दृष्ट्वा क्षीणकर्माणि देवताः ६३
कुपिताः पातयंत्येव संसृतौ कर्मबंधने। तस्मात्स्वर्गसुखं देवि बह्वायासप्रसाधनं ६४ अनित्यं कुटिलं दुः-
ख खमिश्रं योगी परित्यजेत् सततं च स्मरेद्विष्णुं सर्वदुःखौघनाशनं ६५ नामोच्चारणमात्रेण प्राप्नुवंति परं
पदं तस्माद्देव सर्वत्र हि गौरि संप्रार्थयेत्सुधीः ६६ भक्त्यालंबनरूपया देवं भजेत करुणां बुधिं ससर्वज्ञान

इ

प॰ तः १०१ सुवर्णसूत्रयुग्मश्लक्ष्णनासोच्चिताननः । स्निग्धापांगसुलावण्यकपोलाभ्यां विराजि
तः १०२ नीलकुंचितकेशाढ्यो रक्ताब्जदललोचनः मंदारकेतकजातीकवरस्थितकेशवान् १०३ स्नि
ग्धबिंबफलाभोष्ठः सुस्मिताननपंकजः । अनर्घ्यमौक्तिकाभासदंतावलिविराजितः १०४ हरिचं
दनलिप्तांगः कस्तूरीतिलकांकितः । उन्नतांसभुजैर्दीर्घैश्चतुर्भिरुपशोभितः १०५ जपाकुसुमसंका
शकरपल्लवशोभितः । स्फुरत्केयूरकटकैरंगुलीयैश्च शोभितः । १०६ श्रीवत्सकौस्तुभाभ्यां च शो
स् भितः पृथुवक्षसा । मुक्तामयैः शोभमानैर्दिव्यस्रग्भिरलंकृतः १०७ बालार्कसदृशज्योत्स्नापीतवस्त्र
शोभितः । माणिक्यनूपुरोपेतपदपद्मविराजितः १०८ अलक्तांकितचंद्राभनखपंक्तिविराजितः
रक्तोत्पलनिभश्लक्ष्णशुभांघ्रियुगपंकजः १०९ पीवराजान्यरथांगाभ्यां बाहुयुग्मविराजितः । इ
पु॰ सं॰ तराभ्यां श्रियं गात्रे श्लिष्यन्भुजवक्षसि ११० स्फुरत्विद्युल्लताकांतश्रिता भद्रं विराजते तप्तजां
९५ बूनदश्लक्ष्णशुभांघ्रियुगपंकजः १११ अत्र क्रीडति देवेशो वासुदेवः सनातनः । तप्तकांचनसंकाशा
सर्वाभरणभूषिता ११२ सुस्निग्धनीलकुटिलचंद्राकारविराजिता मंदारपारिजातादिदिव्यपुष्पैर्वि राम
राजिता ११३ रत्नावतंसशोभाढ्या चिकुरांतेऽलिसंनिभे । पीनोत्तुंगस्तनाभ्यां च पीडंती हरिवक्षसा १४
केयूरांगदहाराद्यैर्भूषणैरुपशोभिता आरूढयौवना नित्यं सर्वलोकैकरक्षिणी १५ तत्र क्रीडति
लोकेशी शापत्या सह निरंतरं । स एव वासुदेवोऽत्र सर्वभूतमनोहरः १६ क्रीडते सर्वलोकेऽस्मिन्सर्व ९५
कामवरदाननं अत्राष्टशतयोलक्ष्म्यास्तव परितः स्थिताः १७ रमा चरूक्मिणीसीतापद्माप

न

पुमपिशाकयुते ८४ स्वर्णकल्पद्रुमवनैः परिपूर्णैः समंततः सुधांबुपरिपूर्णाभिर्वैडूर्यमणिकुट्टिमैः ८५
स्वर्णिरत्नमयैर्दिव्यैः पंकजैरुपशोभितैः। कूजितैर्मत्तविहगैः सरद्भिरुपशोभितं ८६ क्रीडंति तास्तु योषि
द्भिः सह रामासु नित्यशः। दिव्याप्सरगणा नित्यं विमानेषु रमंत्यु च ८७ ज्वलदग्निनिभैर्दिव्यैर्भूषणैः
कोटिभिर्वृतं निरंतरसामगानकूजितैः कोकिलालिभिः। ऊह्यमानैर्गंधवहैः पुष्पकैरुपशोभितं ८८ तन्म
ध्ये नगरी रम्या मणिप्राकारशोभिता कोटियोजनविस्तीर्णा हारकानामनामतः ८९ संकाशैर्धवलैः स्व
र्णहेमभिश्च परिशोभिता ऊनषोडशवर्षीयैर्दिव्यनारीनरैर्वृता ९० सर्वलक्षणशोभाढ्यैः दिव्याकल्प
विभूषणैः तत्र प्रदेशे रम्येषु देशेषु कमलापतिं। ९१ मुदितैः पतिभिः सार्द्धमर्चयंति सुयोषितः। तत्प्रसा
दोपलब्धं वै सुखमश्नंति सर्वदा ९२ गायंति पतिभिः सार्द्धं कृष्णस्य चरितं महत् पद्मेक्षणाः पद्महस्ताः प
द्मास्याः शरदशाम्बुभाः ९३ दिव्यस्रग्वसनोपेताः क्रीडंति स्म सुयोषितः। शंखचक्रधराः सर्वे सर्वाभरणभू
षिताः ९४ स्रग्विणः पीतवसनाः पुरुषास्तत्र संस्थिताः अन्योन्यस्पर्शनात्तत्र स्त्रीपुंसाः क्रीडमानयो
९५ तावत्तावत्प्ररूढतहरिभक्तिसुखं रसं। तन्मध्ये तु पुरं रम्यं वासुदेवस्य शोभितं। ९६ चतुर्द्वारसमायु
क्तं हेमप्राकारशोभितं। नानामणिमयैर्दिव्यैर्नादेवैर्कुभिरावृतं ९७ अगरचंदनकर्पूरकुंकुमामोदसंयु
तं। नानापुष्पवितानाद्यैः सर्वतः समलंकृतं ९८ तन्मध्ये कल्पवृक्षस्य छायायां परमासने विचित्रस्त
रणपर्यंके शुभास्तरणसंवृते ९९ दिव्यगंधसुशोभाढ्यैर्नानापुष्पपरिच्छदैः। तस्मिन्मनोरमे दिव्ये समा
सीनः श्रिया सह १०० ईश्वर्यासह देवेशो वासुदेवः सनातनः। सुधांशुकोटिसंकाशो दिव्याभरणभूषि

तानैः समलंकृतं ३५ दिव्याप्सरःसमाकीर्णं सामगानोपशोभितं मध्ये सिंहासनं तत्र सूर्यवैश्वानरप्र
१० मं ३६ तन्मध्ये ष्टदलं पद्मं चंद्रबिंबमिवापरं तन्मध्ये कर्णिकायां तु समासीनो जनार्दनः ३७ शुद्ध
जांबूनदप्रख्यो मुक्ताहारविभूषितः शंखचक्रगदापद्मशक्तिहस्तचतुष्टयः ३८ हारकेयूरकटके
रंगुलीयैश्च भूषितः सुवर्णपद्मजप्रख्यपादयुग्मविराजितः ३९ संतानकनिभैः शुभ्रैः नखपंक्ति
विराजितः। षोडशाब्दवयारूपयौवनेन विराजितः ४० विशालभालदेशे तु कुंकुमेन सुगंधिना। रचिते
नोर्ध्वपुंड्रेण सीमंतेनोपशोभितः ४१ सुवर्णपंकजप्रख्यपादयुग्मविराजितः मथितामृतफेनाभशुक्ल
वस्त्रेणावेष्टितः ४२ मुक्तामयाभ्यां शुभ्राभ्यां कुंडलाभ्यां विराजितः पद्मासनसमासीनो जगन्मोहन
विग्रहः ४३ वामांके संस्थिता देवी तस्य देवस्य रूपिणी। तस्यैव सदृशी लक्ष्मी शीलसौंदर्यगुणादिभिः
पु॰सं॰ ४४ पद्मकिंजल्कसंकाशा यौवनारंभशोभिता सर्वलक्षणसंपन्ना तप्तकांचनभूषणा ४५ दिव्य
९६ स्रक्वसनोपेता नीलकुंचितशीर्षजा। चतुर्भुजैर्विराजंती केयूरांगदभूषिता ४६ मुक्ताहारैर्विराजं एम
ती मंदारांचितशीर्षजा। सुलक्षणा नासापुट स्फुताल सदंतविराजिता ४७ कस्तूरीतिलकोपेता नासाग्रं
चितमौक्तिका। स्वर्णकुंभसमप्रह्वपीनोन्नतपयोधरा ४८ दिव्यकुंकुमलिप्तांगा पद्ममालोपशो
भिता। वसुपात्रमातुलिंगं दर्पणं हेमपंकजं ४९ करपद्मैर्धृता देवी चेतसाभीष्टदायिनी। तस्यैव ९६
सदृशास्तत्र शक्तयः परितो हरेः ५० ईशावास्या महादेवी जाह्नवी कमलालया। सावित्री सर्वंग
पद्माशक्तयः परिकीर्तिताः ५१ श्रद्धा मेधा धृतिः प्रज्ञा धारणा शांतिरेव च। श्रुतिः स्मृतिर्मति

95

मालया शिवा सुलक्षणा सुशीला चरतिकामप्रदा तथा १८ शंखचक्रगदापद्मशार्ङ्गाद्यैर्हेति
भिस्तथा । परितः पुरुषाकारैः सा लोकं परिरक्षते १९ एवं द्वितीयं व्यूहं च संप्रोक्तं शुभदर्शने संक्षेप
तो मया प्रोक्तं न शक्यं विस्तरेण हि २० द्वादशाक्षरमंत्रं ये जपंति सुखावहं ते प्राप्नुवंति सततं शा
श्वतं शुभमक्षयं २१ न वेदयज्ञाध्ययनैर्व्रतैर्न चोपवासनैः । प्राप्यते वैष्णवं लोकं विना दास्येन कुत्रचि
त् २२ तस्माद्दास्येन हरे भक्त्या भजेतानन्यमानसः । प्राप्नोति परमां सिद्धिं कर्मबंधविमोचनं २३ एवं संप्रोच्य
ते देवि द्वितीयं व्यूहमव्ययं तृतीयं तु परं व्यूहं शृणु वक्ष्यामि पार्वति २४ तोयाब्धेरुत्तरं कूलं श्वेतद्वी
पमिहोच्यते सुदर्शनाय योगीनां सनकादिमहात्मनां २५ सनकश्च सनंदश्च तृतीयश्च सनातनः
सनत्कुमारजातश्च वोढुः पंचशिखस्तथा २६ सप्तैते ब्रह्मणः पुत्राः योगिनः सुमहौजसः । विरक्ताः
सर्वभोगेषु शुद्धसत्त्वगुणाः सदा २७ भगवद्दर्शनोद्भूतसुखैकरससेविताः । नरनारायणाभ्यां च श्वेत
द्वीपं वसंति ते २८ तेषां संदर्शनार्थाय तत्र संनिहितो हरिः । शुभ्रांशुकोटिसंकाशे नानारत्नमयोज्ज्व
ले २९ श्वेतद्वीपे महायोगिसेविते भयवर्जिते तत्रोद्यानिरम्याणि पारिजातसमानि वै ३० संतानक
लताकीर्णचंदनद्रुममंडितं फुल्लपद्मोत्पलोपेतं नानातोयालयैर्युतं ३१ तन्मध्ये नगरी रम्या ना
म्ना वैरावती शुभा नानारत्नमयैर्दिव्यैर्विमानैरुपशोभिता ३२ दिव्यस्त्रीपुंभिराक्रांता बहुप्रासादसं
कुला । तन्मध्येंतःपुरं रम्यं बहुरत्नसमाकुलं ३३ बालसूर्यनिभैस्तुंगैः प्रासादैर्बहुभिर्युतं । तन्मध्ये मं
डपं दिव्यं माणिक्यकांचनशोभितं ३४ चंदनागुरुकर्पूरकुंकुमामोदशोभितं नानाकुसुमशोभाढ्यैः वि

पुष्पैर्मनोरमैः। सुस्निग्धनीलकुटिलकबरीकृतकेशवान् ६९ कृहेणान्नतैनासांसज्ञानुयुग्म
विराजितः मणिविद्रुमशाखाभनूपुरांघ्रिविराजितः ७० अकलंकितचंद्राभनखपंक्तिविराजि
प०। तः। अशोकपुष्पसंकाशरक्तोष्ठमुखपंकजः ७१ अनर्घ्यमुक्तिकाभासदंतपंक्तिविराजितः सं
पूर्णचंद्रप्रतिमस्मितवक्त्रसुशोभितः ७२ आरूढयौवनः श्रीमान्कोमलावयवोज्वलः। शरण्यः
सर्वलोकानां सर्वलोकफलप्रदः ७३ सदृशी तस्य देवी तु रूपशीलगुणादिभिः। तप्तकांचनसं ९६
काशा तप्तकांचनभूषणा ७४ तरुणी रूपलावण्यकांतिशीलगुणान्विता दुग्धाब्धिफेन
संकाशा शुभ्रवस्त्रेण वेष्टिता ७५ मंदारकेतकीजातीपुष्पांचितशिरोरुहा। कस्तूरीतिलको
पेता रत्नसीमंतशोभना ७६ नानावर्णसुशोभाढ्याकर्णभूषणभूषिता। प्रवालशदृशजोत्स्न
रक्ताधरशुचिस्मिता ७७ मत्तभृंगोपमैः स्निग्धैरलकैः सुविराजिता। तनुमध्या विशालाक्षी पी
पु०सं० ८७ नोन्नतपयोधरा ७८ चतुर्हस्तैर्विराजंती सर्वाभरणभूषिता उद्यद्धुम्यां धृता देवी हिमपद्मयु राम
गांशुभे ७९ इतराभ्यां समाश्लिष्य भर्तारं निविडं सदा आलोकयंती सततं त्रिदशान्स्वकटाक्ष
कैः ८० निरीक्षितास्तया देव्या धन्यास्ते सततं शिवाः तत्र देवा विमानस्थाः सिद्धचारणकिंन
राः ८१ गायंति सततं देवीमानंदाश्रुपरिप्लुताः। दैत्यैर्वै बाध्यमानैस्तु ब्रह्मरुद्रादिदेवतैः। ८७
८२ संस्तूयमानस्तत्रेशो देवानामभयं ददौ। देवानामभयं दत्वा स वै देवेश्वरो हरिः। ८३
राक्षसान्हंतुमारेभे जगत्संरक्षणाय च एवं तदर्थं बहुहेतुं हरेः प्रोक्तं तवानघ ८४ किम

वैन्याद्रुविष्णुमनीषिणी ५२ दास्यस्त्वेताश्रियः प्रोक्ताः सर्वत्र कार्यकारिकाः अनंतवैनतेयादि
देवता नित्यकिंकराः ५३ साध्यामरुद्गणाश्चात्रवसंते नित्यदेवताः प्रासादेषु विमानेषु विमाने
षु नगरेषु च ५४ तत्प्रसादोपलब्धेषु भोगेश्वैत्रानुरंजिताः। क्रीडंति सततं नित्या हेयानिष्पद्व
श्री र्जिताः ५५ ये विष्णुमंत्रजप्तारः सततं श्रद्धयान्विताः। ये द्वादशीव्रते युक्तास्तत्पदं यांति ते ध्रुवं
५६ न वेदैर्न च दानैश्च न यज्ञैर्न व्रतैरपि प्राप्तुं न शक्यं गिरिजे विष्णुलोकं सनातनं ५७ भक्त्या त्व
नन्यया प्राप्तुं शक्यं विष्णुपदं नृणां तस्मात्संपूजयेन्नित्यं भक्त्या देवं जनार्द्दनं ५८ कीर्त्तनं नाम
मात्रेण ध्यायन्मंत्रं जपेत्सदा। जुहुयात्तर्पयेद्भक्त्या सर्वे प्रीकामदं ५९ एवमुक्तं तृतीयं तु व्यू सर्वे ७
हं तु परमात्मनः। स्वरूपं तव सुश्रोणि यथा प्रोक्तं पुरातनैः ६० अतः परं प्रवक्ष्यामि चतुर्थं व्यूहमुत्त
मं दिवौकसां रक्षणार्थं दुग्धाब्धौ परमेश्वरः। ६१ सुधांशुकोटिसंकाशे सहस्रफणशोभिते पुरंदर
सयूथे स्फटिकाद्रिते दुग्धवारिधौ ६२ तस्मिन्ननंतपर्यंके शेते विस्तृतोच्छ्रिते। दिव्यासने समासीनः
पद्मनाभोच्युतो हरिः ६३ नीलजीमूतसंकाशः पद्मपत्रायतेक्षणः। विकसत्कोटिसंकाशकिरी ६७
टेन विराजितः ६४ नानारत्नोज्वलाहिकुंडलाभ्यां विराजितः। बालार्कसदृशज्योत्स्नापीतवस्त्रेण
शोभितः ६५ स्फुरद्रत्नारविंदाभहस्तांघ्रितलशोभितः। हारकेयूरकटकैरंगुलीयैर्विराजितः ६६ शंख
चक्रगदाशार्ङ्गखड्गहस्तैर्विभूषितः। सुपुष्पफलशाखाढ्यकल्पवृक्षैर्विराजितः ६७ विश्वस्य जन्म
मरणनाभिपंकजशोभितः। हरिचंदनलिप्तांगः सर्वाभरणभूषितः ६८ मंदारपारिजाताद्यैर्दिव्य

नि.

यतेपुमान् स्नानं मानसमेतत्स्यात्स्नातश्च हरिमर्च्चयेत् १२ आजानुपादौ प्रक्षाल्य ह
स्तौ चमणिबंधनात्। आचम्य च द्वारपार्श्वे गत्वां गन्यासपूर्वकं १३ तालत्रयं च हस्ताभ्यां
कृत्वाभिवलये स्थितः। कपाटमुद्घाट्य ततिवाद्यु मंत्रेण पश्यज १४ साम्ना देवव्रतेनातः प्र
विशेद्दक्षिणांघ्रिणा। प्रणमेच्छिरसा देवं पुंडरीकाक्षविद्यया १५ आरोपितेषु दीपेषु मा
ल्येपि च निराशिते वेद्यांपात्रेषु विवेषु शोधितेषु यथातथं १६ द्वारपूजामुखे सर्वपरिवारस
मर्चने। कृते शिष्येणवान्येन परिवारवरेण वा १७ पूजको लंकृतः स्रग्वी शुक्लांवरधरः
शुचिः। शुक्लोपवीतोत्तरीयश्चंदनाद्यनुलेपनैः। १८ चंदनश्वेतमृत्स्नाबुकल्पितागू
पु.सं. ९८ र्ध्वपुंड्रकः। देवपार्श्वे समासाद्य पार्श्वे सव्येतरे स्वयं १९ आसीत विष्टरे शुद्धे वध्यादौ स्वस्ति
कासने। वध्यापद्मासनं वापि तूर्यघोषप्रवर्त्तिते २० तिरस्करिण्या च द्वारे निच्छिद्रकारि राम
ते ततः अस्त्रमंत्रेण कुर्मोव ध्याधूमध्वजं वहिः २१ प्राकारवस्थिते ध्यायेत्तत्तेजो मंत्रेण मं
त्रमित् चक्रमुद्रां च विन्यस्य चक्रमंत्रेण साधकः २२ गोपयन्नित्यमात्मानं प्राणायामैस्त्रि
भिः क्रमात् युक्तं कृत्वा योगमुद्रां नाभिकंदे स्थितं पुनः २३ वेद्याकारं वायुवीजं ध्यात्वा तज्जनवा ९८
युना धूम्रेण देहपाप्मानं शोषयित्वा निरन्त्वहं २४ त्रिकोणमग्निवीजं च रक्तं वर्हिहृदंबुजे।
ध्यात्वा तदुत्थसज्वालाच्छिखाभिः [illegible] दहेत् २५ माहेंद्रवीजं विन्यस्य पीताभं चतुरस्रकं।

न्यष्टोत्तु मिलद्भुवीभिवरानने इति श्रीपद्मपुराणे उत्तरखंडे उमामाहेश्वरसंवादे विष्णुभू
षणेद्ववाणिं नामाध्यायः ।। अथ नित्यपूजाप्रकारः । पंचरात्रे पद्मतंत्रे । श्रीभगवानुवा
च ।। श्रूयतामभिधास्यामि वृत्तं न्नाराधनं हरेः । येन विष्णोः पदं मर्त्याः प्राप्नोत्यमरदुर्लभं १
स्नानमूलाः क्रियाः सर्वाः स्नानं च बहुधा स्मृतं वारुणं दिव्यमाग्नेयं वायव्यं पार्थिवं तथा २
मांत्रं मानसमित्येवं स्नानं सप्तविधं भवेत् निरीक्ष्य चात्मनं शक्तिं समयं देशमेव च ३ एते
ष्वेकतरं कुर्यात्समाराधनतत्परः अवगाहनमप्स्वंतः वारुणं स्नानमिष्यते ४ सहातपे
न वर्षेण स्नानं दिव्यमनंतरं समिधां दीपितानां च गोमयस्य घृतस्य च ५ सितेन भस्मनां
गोषु ललाटादिषु चक्रमात् यदूर्ध्वपुंड्रकरणं मंत्रोच्चारणपूर्वकं ६ तदाग्नेयं भवेत्स्नानं शो
धनं परमं स्मृतं गच्छत्सु गोषु वातोत्थैः रजोभिर्भूमिसंभवैः ७ दर्शनं वपुषा स्नानं वायव्यं त
दुदाहृतं प्रसस्ते पर्वताग्राद्यो जातया श्वेतमृत्स्नया ८ उच्चार्य केशवादीनि नामान्यंगेय
थाक्रमं ललाटादिषु यद्विधानमूर्ध्वपुंड्रस्य तद्भवेत् ९ पार्थिवं स्नानं मल्लिंगैर्मंत्रैर्विध
कैरितैः अंभोभिः प्रोक्षणं ब्रह्मं तन्मांत्रं स्नानमिष्यते १० त्रिराचम्याहतं वासः परिधाय सु
खासनं प्राणानायम्य मां ध्यायेद्धृदयांभोरुहे स्थितं ११ ध्यानेनानेन निर्धूतकल्मषो जा

बनिधौतेजोपांडुरपंकजे ४२ अोजीवंसमुत्पन्नंसकाशाद्गुणाःसदा जीवात्प्रधानंतस्मात्तुबुद्धि
नि॰ बुद्धिरहंकृतिं ४३ ततोमनस्ततःशब्दतन्मात्रारवंततःसह। वाक्श्रोत्राभ्यांशब्दगुणास्तन्मात्रास्पर्शलक्ष
णः ४४ वायुःस्पर्शगुणोसाद्धंत्वचहस्तेनचस्मरेत। तन्मात्रांस्पर्शरूपांतांततोग्निंसहचक्षुषा ४५
पद्भ्यांरूपगुणंस्मरेत्तन्मात्रंचततःपुनः आपोरसगुणाःपायुरसनाभ्यांसहाबुजे ४६ रसंचतन्मात्रा
त्मासहगंधगुणोभुवं गंधंचतन्मात्रात्मानंघ्राणोपस्थयुतंतथा ४७ इत्थंशरीरमात्मीयंसंहृत्यमहा
दिश्तजे विचिंत्यपंकजंबुध्याप्रबुद्धंहृदिनिर्गते ४८ ज्ञातकुंभमयैःकुंभैःपूर्णैरमृतवारिभिः।स्ना
पितंस्मरेन्मनसेचिंतयित्वानिजंवपुः ४९ आराधनेहरेर्योग्यंपरस्यपरमात्मनः ध्यायन्न
ष्टाक्षरंमंत्रंद्वादशाक्षरमेववा ५० सृष्टिस्थितिलयन्यासैर्हस्तन्यासपुरःसरं न्यसेदंगेषुमूर्द्धा
पु॰से॰ दिपादांतेषुयथायथं ५१ तलंपृष्ठंचकरयोःशोधयित्वास्त्रविद्यया। अंगुलीनांचसर्वासांप
९६ र्वस्वाद्यंतवर्तिषु ५२ इष्यतेप्राणवन्न्यासोमध्यमेष्टसुपर्वसु। मंत्राक्षराणिविन्यस्यदेव राम
न्यासःसनातनः ५३ पर्वदक्षिणतर्जन्याःप्रक्रम्यांगुलिपर्वसु दक्षिणेतरतर्ज्जन्याःप
र्वांतंसाधकोत्तमः ५४ सृष्टिन्यासमिदंकुर्याद्व्यत्यासेनतुसंहृतिः।प्रक्रम्यतर्जनीपर्वक
निष्ठापर्वविश्रमः ५५ स्थितावष्टाक्षरस्यैषमंत्रस्यन्यासईदृशः द्वादशाक्षरमंत्रस्यन्यासः ९६
प्रतिकथ्यते ५६ न्यासकालेमध्यमयातर्जन्यांगुष्ठपर्वणि कृत्वाप्रदक्षिणंपर्वस्वंगुष्ठेने
तरेणतु ५७ सव्येतलेतुविश्रांतिस्तथावपरथालये।तलयोःप्रक्रमस्यानेदक्षिणेतरयो

रो

केवसहस्रशीनेनस्तंभयेदग्निमुत्थितं। २६ वायुनाकुंभकेनैववृत्तंस्फटिकसंनिभं विन्यस्यवास
णंबीजंमूर्द्धितज्जातमंदांभसा २७ क्षालयेत्सर्वतोदेहमापादतलमस्तकं पृथिव्यादीनितत्वानि
समाधिपरयाधिया २८। परमात्मनिःसंहृत्यप्रलयक्रममास्थितः। पृथिवीपंचगुणाकांपी
ताभांचतुरस्रकां २९ घ्राणेणस्येंद्रिययुतस्तन्मात्रालक्षणांततः गंधेसंहृत्ययोगेनगहने
नविचक्षणः ३० रसनापाणींद्रियाभ्यांसहापश्चचतुर्गुणा। अर्द्धचंद्राकृतिश्वेतास्तन्मात्राल
क्षणेरसे ३१ गंधंचतन्मात्रात्मानस्ततोग्निंत्र्यस्रपाटलं त्रिगुणंदृष्टिचरणस्वेतोभ्यांसुसमा
हितः ३२ तन्मात्रालक्षणेरूपेरसतन्मात्रयासह। संहरेद्द्विगुणंवायुंस्त्वसेतन्मात्रलक्षणे ३३
धूम्रंवृत्तंत्वक्शस्याभ्यांरूपतन्मात्रयासह। वायुनासंहरेद्योगीखंचशब्दगुणंपुनः ३४
तन्मात्रालक्षणेशब्देनीलोत्पलदलप्रभं। स्पर्शंचतन्मात्रात्मानंश्रुतिवाक्सहितंततः ३५ सं
हृत्यशब्देतन्मात्रंखांतेस्थातमहंकृतौ। अहंकृतिंबुद्धितत्वेबुद्धिंचप्रकृतिपुनः ३६ जीवेन
प्रकृतिंजीववासनाविवशंपुनः। सुसूक्ष्मेनाभिचक्रेस्वेभास्कराभमवस्थितं ३७ सुषुम्नया
नाडिकयापद्मसूत्रसुसूक्ष्मया उपर्यारोहयेद्देहंकुंभकेनविचक्षणः ३८ मिलाचब्रह्मरंध्रंध्रुवं
देहाद्विनिर्गतं प्रविश्यभास्करस्यापिमंडलान्निर्गतंवहिः ३९ अशरीरंतयाजीवंपरस्मिन्ब्रह्मणिध्रु
वे स्थितंध्यायेत्स्थितंतत्रस्वदेहेयोनिजंदहेत् ४० न्यस्तेनशिखिबीजेनपादाग्रेज्वलनात्मना। ९६
पादादिमूर्द्धपर्यंतदग्धेदेहेनिजेततः ४१ निवृत्तिबीजंवैध्यायेत्पूर्णचंद्रामृतोपमं तदुत्थपीयू

स्फटिकाभं च शंखाभं रक्तं मुक्तं च लोहितं। तमोरूपं पीतवर्णं ध्यात्वा मंत्रं द्वयोर्हरे ७४ स्था
नि॰ ने यथोक्ते विन्यस्य षडंगन्यासमाचरेत्। हृदयं च शिरश्चैव शिखा कवचमेव च ७५ अस्त्रं ने
त्रं षडेतानि हृदयं मस्तके तथा शिखायामनुपूर्वेण स्कंधयोर्भयपार्श्वयोः ७६ नेत्रयोर्दिक्षु
सर्वासु न्यसनीयानि भूमिषु रूपाणि षंमिकुमुद्वं धूकमभितोखलं ७७ अब्जकेशरमंभोजत
मसीरूपसंपदं दिव्यायुधधरं दिव्यवस्त्रमाल्यानुलेपनं ७८ कौस्तुभं वनमालां च श्रीवत्सं दिव्य
लक्ष्मणं विभ्राणं भावयेत्साक्षादात्मनं परमेश्वरं ७९ अर्चयन्न्यासबीजानि गंधपुष्पादिभिः
क्रमात् मानसैरुपचारैश्च हृदयांभोरुहस्थितं ८० हेमांते अर्चयेत्पूर्वं वासुदेवं सनातनं। आत्म
शुद्धिरियं प्रोक्ता मंत्रशुद्धिस्तु वक्ष्यते ८१ षड्विंशेनार्णवीजेन मंत्रबीजानि शोधयेत्। सप्तविं
पु॰ सं॰ शेनबीजेन दहेद्देतानि वर्णांशः ८२ अष्टाविंशेनबीजेन रक्षं च स्तंभनमाचरेत् एकोनत्रिंशबीजे
१०० नतान्येव क्षालयेत्पुनः ८३ हुंकारेण प्रबुद्धानि फट्कारेण विचक्षणः। कुर्यादभिमुखान्यन्य राम
त्वाणवेण विशोधयेत् ८४ तमस्तमालया शुद्धं जपेन्मंत्रं समाहितः अष्टोत्तरशतं वारानष्ट
विंशतिमेव वा ८५ अष्टौ वा मंत्रवित्मंत्रबीजात्यंतपुटीकृतं। पूजाद्रव्याणि सर्वाणि क्षालयेदं
बुपूरितं ८६ दक्षिणे वामपार्श्वे तु विनिवेश्य गलंतिकं। अर्घादिपात्राण्यादाय गायत्र्याभि १००
क्षुपर्वया ८७ प्रक्षाल्य पादयोर्दद्यादद्ध्यस्याग्रेयपद्मज। पाद्यं मध्ये दक्षिणे घ्राणे चाचमनी
यकं ८८ पूर्णानि गालितांभोभिः पात्राणि निगमादिना। संस्थाप्यार्घादिपात्रेषु द्रव्याणि विनवेश

ना

द्वयोः ५८ कनिष्ठयोस्तु विन्यस्तिः पर्वणोरुभयोरपि। द्वादशाक्षरमंत्रस्य न्यासोऽयं कम
लासन ५९ हृदयादीनि चांगानि ध्यात्वांगुष्ठादिपंचसु। न्यसेन्नखमुखेष्वेते तले सव्यगदा
धरो ६० सव्येतरे पद्मचक्रे न्यसेन्न्यासः करद्वयोः ईरितः स्तलयोर्मध्ये ध्यात्वा तेजोभिरुज्ज्व
ले ६१ ताभ्यां मूर्द्धादिपादांतं देहे न्यसेत्समंततः व्यापकं कंचुकं यद्वा मंत्रस्त्वक्षरशस्ततः
६२ मूर्द्ध्नि नेत्रे मुखे चित्ते नाभ्यां गुह्ये च जानुनि। चरणौ क्रमशः स्पृष्ट्वा न्यासो मंत्रस्य इष्य
ते ६३ विपरीतक्रमोज्ञेयः संहृतौ पालने पुनः नाभ्यादिहृदयांतेषु न्यासोंगेषु प्रकीर्तितः
६५ अष्टाक्षरस्य मंत्रस्य स्थानान्येतानि च क्रमात् शिरसः पश्चिमं पूर्वं दक्षिणं चोत्तरं ततः
६६ चत्वारि च चतुर्वक्त्रस्थानानि द्वादशाक्षरे मूर्द्ध्नि मध्यमयांगुल्या तर्ज्जन्यासा च चक्षुषि
६७ न्यसेन्मुखेनामिकयासांगुष्ठेन च मंत्रवित्। अंगुष्ठतर्ज्जनीभ्यां तु हृदये न्यसनं भवेत्
६८ तथांगुष्ठकनिष्ठाभ्यां नाभौ न्यासः प्रशस्यते विनांगुष्ठेन शेषाभिर्गुह्ये जानुनि चोभ
योः ६९ समस्ताभिश्चरणयोरित्यष्टाक्षरमूर्तिमयः प्रागग्रागे शिरसांगुल्या न्यासोंगुष्ठेन द
क्षिणे ७० तर्ज्जन्या पश्चिमे भागे न्यासो नामिकयोत्तरे कनिष्ठया तदंतासु द्वादशाक्षरम
मयः ७१ नूपक्रमेणाक्षराणां न्यासकाले विचिंतयेत् शुक्लं हिरण्मयं रक्तं कुंकुमसन्निभं
७२ पद्मकिंजल्कनीलं च सर्ववर्णाकिमप्येकं सितं कृष्णं च धूम्राभं श्यामं तारनिभं तथा ७३

सिताः पूर्वरूपिणः परा १०६ हस्ताभ्यामपि मुख्याभ्यां रचितांजलिसंपुटाः अपराभ्यां च बिभ्राणे हस्ता
नि॰ भ्यां योगपीठकां १०७ मध्ये सदाशिवो देवस्तद्देवप्रतिष्ठिताः। अथवा पुरुहूताद्याः दिक्षु प्रागादिषु
क्रमात् १०८ अष्टावष्टसु पीठस्य पारूपेणाधा — — — ईशान्यन्तस्ततः पूर्वो व्यासस्तस्य वेदचतुष्टयं
१०९ अहंकारस्ततः पाशा गुणास्त्वाद्या गुणाः तूलिका पंचभूतात्मा जीवात्मास्तरास्तथा ११०
अग्नेः सोमस्य सूर्यस्य मंडलान्युपरि क्रमात् अंभोजं मुपरिष्टाद्धवलं द्वादशाङ्कुरं १११ स्मर
केशरसंपूर्णमध्ये विपुलकर्णिकं भद्रासनं कल्पयित्वा यथोक्तेनैव वर्त्मना ११२ अर्चयेद्धूप
ष्पाद्यैः पीठपार्श्वे तु दक्षिणे वृषभं विष्णुमीशं च समाराध्य तथोत्तरे ११३ सनत्कुमारं सनकं स
पु॰स॰ नंदं च सभाजयेत्। पार्श्वे च पश्चिमे दुर्गां विघ्नेशं नारदं तथा ११४ आत्मनश्च गुरुं ध्यात्वा प्रारभे
१०१ ताञ्जुतार्चनं आवाहनपदं पात्रं प्रक्षालितमथांबुभिः ११५ पूरयेन्मूलमंत्रेण हस्ताभ्यां च समु
द्धरेत्। ललाटसमये तस्मिन्नन्तरा वाह्य केशवं ११६ मूलबिंबाद्यथा दीपं दीपादधिकृतं तथा चै च
तुरुच्चारयेन्मंत्रं आगच्छ पदसंयुतं ११७ तेन तोयेन कूर्माख्यां सिंचेत्कूर्चेन मूर्द्धनि तत्र संनिहि राम
तं देवं कूर्माचीयां विचिंतयेत् ११८ प्रणाम्य किंचिदुत्थाय स्वागतेत्यनंतरं दर्शयेत्प्रतिमामुद्रां
कल्पयित्वा च संनिधिं ११९ यागावसानिकं तत्र प्रार्थयेत हृदि स्थितं। संमुखीकरणं कुर्यात्तुंड १०१
दीका ह्यविद्यया १२० दद्याच्च मूलमंत्रेण पर्यासनमादितः यथा देहे तथा चीयां मंत्रन्यासं समा
चरेत् १२१ हस्तन्यासं विना शंखचक्रमुद्रां प्रदर्शयेत् नाराययेदेकवेरे सुरसिद्धावतारिते १२२

येत् ८९ कुशाग्रमक्षतं पुष्पं फलं मलयजं तथा। तिलान्सिद्धार्थसहितान्यवानर्घ्यभाजने ९०
तिलान्दूर्वां विष्णुपर्णीं श्यामाकं पद्ममक्षतं। पाद्यपात्रे षडेतानि द्रव्याणि विनिवेशयेत् ९१ एलालवंगक
र्पूरजातीतक्कोलचंदनं पुष्पान्याचमनीयत्पात्रे द्रव्याणि कल्पयेत् ९२ द्वादशार्कं भासमानं चक्र
मध्यगभास्करं हस्ते वामेतरे ध्यात्वा दीप्ततद्रश्मिभिः पुनः ९३ द्रव्याणि दग्ध्वा निःशेषं भस्मीभूतानि ता
नि च। दक्षिणेतरहस्तस्थे सितपद्मे विकस्वरे ९४ दलैः षोडशभिर्युक्ते चंद्रपीयूषरश्मिभिः द्रावयंतं सि
तं ध्यात्वा तदुत्थैरमृतांबुभिः ९५ सिक्तानि जातानि पुनर्द्रव्याण्यग्र्याणि भावयेत् हस्तयोरुभयोरेवं ध्याये
न्नारायणं प्रभुं ९६ ताभ्यामर्घ्यादिपात्रेषु स्पृष्ट्वा द्रव्याणि विष्वतः सकलत्वकृत्स्नं तानि गायत्र्या वि
ष्णुपूर्वया ९७ अभिमंत्र्य ततो मुद्रां सौरभेयीं प्रदर्शयेत्। तद्गंधेन च पात्राणि पूरितानि विचिंतयेत्
९८ अमर्घ्यमित्यादिपूर्वकल्पयामि वदेच्चरन्। स्पृशत्पात्राणि हस्तेन पात्रेऽन्यस्मिन्नंतरे ९९ अ
र्घ्यपात्राज्जलं किंचिद्गृहीत्वा विनिवेशयेत्। दक्षिणेतरहस्तेन तत्पात्रे स्थाप्य मंत्रयेत् १०० मंत्रेण मू
लमंत्रेण वारान्सप्त तद्वत्पुना फडंतेनास्त्रमंत्रेण द्रव्याण्यात्मानमेव च। १०१ प्रोक्ष्य कूर्चेन देवस्य याग
पीठं प्रकल्पयेत्। अस्मिन्सहजे पीठप्रतिमायां चतुर्मुख १०२ आधारं प्रथमं कूर्मं कालाग्निं ततद
नंतरं। उपरिष्टाच्च भोगीन्द्रफणाभिर्भूमिमंडलं १०३ चतुरस्रं सहस्रेण विभ्राणं बलवत्तरं भुवस्योपरि
धर्माद्याः कल्प्या योगासनोपयः १०४ आग्नेयादिषु चत्वार चतस्रश्चैव पद्मज। अधर्माद्याश्च ता
वंतं प्रागादिषु यथाक्रमं १०५ आत्मानस्तावतीश्चैव पुरुषाकृतयः स्थिताः। चतुर्भुजाः सिंहवक्त्राः

नि॰ वरणो वा यदि दिक्षु प्रागादिषु क्रमात् १३८ व्याप्तिं कान्तिं च तद्वृत्तिं च श्रद्धां विद्यां जयां क्षमां
शान्तिं च शक्तिरेताः स्तुत्वा चामरधारिणीः १३९ ततो द्वितीयावरणे शंखाद्यायुधधारिणः।
पुरुषानष्ट पूर्वादिदिक्ष्वानुपूर्व्येण कल्पयेत् १४० तृतीयावरणे प्रास्य दिक्षु इन्द्रादीन् प्रकल्पये
त् बहिरावरणे लक्ष्मीं भगवत्सम्मुखं तथा १४१ विष्वक्सेनं तथैशान्यां द्वितीयावरणाद्बहिः। परि
वारं निरीक्ष्येनं सर्वं प्रांजलयो हरिं १४२ दद्यात् स्वपादुके स्नातुमुत्थानसमये हरेः। इदं विष्णु
रिति ह्याभ्यां पादुकारोहणं हरेः १४३ उद्धरेद्ब्रह्म हरिं स्नातुमुत्तिष्ठ ब्रह्मणस्पते इति मन्त्रेण देवेशं
प्रापयेत् स्नानपीठिकां १४४ मन्त्रस्तु भद्रं कर्णेभिरिति स्नानासने स्मृतं। सावित्र्या चितरे दद्यात्
पाद्यं त्रीणि पदेति च ४५ आपः पुनन्त्वित्ययमन्त्रेणाचमनं क्रिया। दन्तधावनकाष्ठं च तद्विष्णो
पु॰ सं॰ १०२ रिति निर्वपेत् १४६ अन्येजं वामदेवेन कुर्याद्गृहदर्तनं पुनः। कार्यं विष्णोर्नुकं मन्त्रेण मलकादिकं
१४७ नते विष्णुरिति स्यात् अयमाभिषेकविधिस्ततः आपो हि ष्ठेति तिसृभिरतो देवा अवन्त्विति १४८ रम
कंकतेन प्रमार्जेत तेषां कलशैः स्नापनं ततः हिरण्यवर्णां हरिणीमित्यालेपो हरिद्रया १४९ हि
रण्यवर्णाः शुचयः पावका उच्चलु स्तभिः। क्षाल्यो गंधांबुना देहः पुनस्तं कुंकुमेन तु १५० आ
दित्यविष्णुगायत्र्या क्षालयेत्पवमानिभिः ब्रह्मयज्ञानमिति च कुर्यान् शिरस्त्र आभुवत् १५१ १०२
इत्येवमर्घ्यपाद्याद्यैः यजेता दामहे महेश्वरं। परिषिञ्चन्तु सावित्र्या सर्वे नपुरुषात्मना १५२ सह
स्वधारया स्नानं यद्दा कुंभेन तद्भवेत् अग्निमीळे इति मन्त्रेण होतेनां गाम्बुनिहृतिः १५३ विष्णु

ऋषिभिर्मुनुजैर्वापि स्थापिते निश्चले हरौ संस्थिरे भीमुखी भावतद्देवावाहनं हरेः १२३ यथाग्नि
माहितं कुंडे यथा वा पुरुषं स्थितं । काले प्रबोधयत्येवमर्चनेनैव बोधयेद्धरिं १२४ कल्पनं योगपीठस्य
मंत्रन्यस्तनुमेव च । बिंबे स्थिते कार्यं तस्मात् द्वारंभे चतुर्मुख १२५ अर्घ्यवस्त्रांबुरकल्पपुष्प
गंधानुलेपने चादिक स्थितेस्थितं ध्यायेत्पाद्याचमनयोः पुनः १२६ आसीनं स्नानकाले च
पद्मासनसुखासनं निवेद्यधूपदीपाद्यावासीनं स्वस्तिकासने १२७ उपचारेषु चान्यत्र तत्त
त्कर्मानुसारतः स्थितमासीनमथवा देवं ध्यायीत पूजकः २८ अर्चीयामितु साम्नात् क्षिपेत्पु
ष्पांजलिं हरिं । विभो सकललोकेश त्वावि भो जिष्णो प्रभो हरे १२९ त्वां भक्त्या पूजयाम्यद्य भोगै
र्घ्यादिभिः क्रमात् भक्तिनम्रेण शिरसा दद्यादर्घ्यं लघुर्द्ध्वनि १३० पादारविंदयोर्दद्यात्पाद्यं च
द्यप्रतिगृह्य ध्यायेदाचमनीयस्य प्रदानकाले जगद्गुरुं १३१ आचामंतमिमं भोगैः साक्षाद
भः प्रतिगृह्य । उपचार्योपचारेण मधुपर्कादिना हरिं १३२ हस्ताभ्यां शिरसा पद्भ्यां मनसा च
पा धियातथा अहंकारेण चात्मानं निवेद्य धरणीतले १३३ अनेन प्रणिपातेन प्रणिपत्य जनार्द
नं । दासोहं ते जगन्नाथ सपुत्रादि परिग्रहः १३४ प्रपन्नं प्रसाधिकर्तव्यं मां नियुंक्ष्व हितेस्वाद
इति विज्ञाप्य देवेशं परिवारान् प्रकल्पयेत् १३५ योगासनान्यपत्रेषु पूर्वादिषु यथाक्रमं । द्वाद
शाद्यादशस्वेव शक्तीः श्रीवत्सपूर्विकाः १३६ श्रीवत्सवनमालां च माया योगात्मिका तथा । वेस
वीविमलां स्पष्टिं शक्तिमुत्कर्षिणीमपि १३७ प्रज्ञां सत्यां तथेशानानामनुकंपां पितामही प्रथम

ऋषिभिर्मनुजैर्वापि स्थापिते निश्चले हरौ संस्थिरे भीमुखी भावतद्देवा वाहनं हरेः १२३ यथाग्नि
माहितं कुंडे यथावा पुरुषं स्थितं। कालेप्रबोधयत्येवमर्चने बोधयेद्धरिं १२४ कल्पनं योगपीठस्य
मंत्रन्यस्य तनैव चा। विंवे स्थिते कार्यं तस्मात्पूजारंभे चतुर्मुख १२५ अर्घ्यवस्त्रांबुरकल्पयुग्म
गंधानुलेपने प्रादक्षि स्थितेस्थितं ध्यायेत्पाद्याचमनयोः पुनः १२६ आसीनं स्नानकाले च
पद्मासनसुखासनं निवेद्य धूपदीपादावासीनं स्वस्तिकासने १२७ उपचारेषु चान्यत्र तत्
त्कर्मानुसारतः स्थितमासीनमथवा देवं ध्यायीत पूजकः २८ अर्चायामित्तु सान्नात् दीपेत्पु
ष्पांजलिं हरिं। विभो सकललोकेश विभो जिष्णो प्रभो हरे १२९ त्वां भक्त्या पूजयाम्यद्य भोगै
र्घ्यादिभिः क्रमात् भक्तिनम्रेण शिरसा दद्यादर्घ्यं मुहुर्मुहुः १३० पादारविंदयोर्दद्यात्पाद्यं च
द्यप्रतिग्रहे ध्यायेदाचमनीयस्य दानकाले जगद्गुरुं १३१ आचामंतमिमांभोभिः साक्षाद
भः प्रतिग्रहे। उपचार्योपचारेण मधुपर्कादिना हरिं १३२ हस्ताभ्यां शिरसा पद्भ्यां मनसा च
पा धिया तथा अहंकारेण चात्मानं निवेद्यात्य धरणीतले १३३ अनेन प्रणिपातेन प्रणिपत्य जनार्द
नं। दासोहं ते जगन्नाथ सपुत्रादिपरिग्रहः १३४ ध्रुवं प्रसाधिकर्त्तव्यो नान्यं युक्त्वा हितेसाद
इति विज्ञाप्य देवेशं परिवारान्प्रकल्पयेत् १३५ योगासनात्वपत्रेषु पूर्वादिषु यथाक्रमं। द्वाद
शद्वादश स्वेव शक्तीः श्रीवत्सपूर्विका १३६ श्रीवत्सवनमालां च मायायोगात्मिकां तथा। वेस
वीं विमलां सृष्टिं शक्तिमुत्कर्षिणीमपि १३७ प्रज्ञां सत्यां तथेशानामनुकंपां पितामहीं प्रथम

१७० अन्यारम्भेण सत्वेन पाणिना दक्षिणेन तु। प्रगृहीतार्घमुख्येण दर्शितग्रासमुद्रया १७१ देव
नि स्यत्वेति मंत्रेण निवेदयेत् तथोदितं देवस्य दक्षिणे हस्ते निर्वपेत्साधकः स्वयं १७२ दत्तेन पानके
शास्तेपानाद्ये च संस्कृते स्ते चाचमनेदद्यात्तांबूलीनास्यशोधनी १७३ क्रियाकलापपूजादिके
ष्मा चीयं यतीरितं। तत्सर्वं मुववेराद्ये यथासंभवमाचरेत् १७४ अर्घ्यादिषूपचारेषु कर्तव्येषु य
थातथं मंत्र पूर्वेषु सर्वेषु वाचमेनामुदीरयेत् १७५ दिव्येनार्घ्योपचारेण यथाशक्ति यथाविधि।
अर्चयिष्याभिसमये भगवंतं जनार्दनं १७६ इत्यादिनाभवितयो पूजकः सुसमाहितः। चतुर्भिरेव
गंधाद्यैः परिवारार्चनं मतं १७७ सर्वस्मिन्नुपचारे च सत्यंते तिष्ठते पुनः। जपेच्च पूजको मंत्रं यथो
दितसमाख्यया १७८ द्वादशाक्षरमन्यद्वातदंते जुहुयाद्धविः॥ स्तोभ्यो वलिदानं च कुर्यान्नित्यं म
होत्सवं १७९ विज्ञाप्य देवदेवेशं पूजकः प्रणतः स्वयं। आदद्यीत तावशिष्टानि पूजावस्तूनि सत्वशः।
पु॰सं॰ १८० तैरात्मपोषणं कुर्यात्स्तुष्यत्ते नापि केशवः मंत्रैर्यैर्यैश्च केराराधयस्तेन पुरुषेणवा १८१ अथ
१०३ वाद्वादशार्णेन मंत्रेविवमुखे हरिं प्रपद्यते परं श्रेयो निःकामो यदि पूजकः॥ १८२ कामनानां तु का राम
म्यानि फलानि प्रतिपद्यते॥ इति श्रीपंचरात्रे पाद्मोत्तरे महोपनिषदि। एवमन्यत्रापि पुराणादौ
विष्णवाराधनां स्थितानि तद्वाक्यानि प्रसिद्धत्वात् तंत्र यत्नस्थिष्ट भयाच्च न लिख्यंते। तत्र सर्वथा शालग्राम
पूजायां केषांचिदस्ति विवादः। कुतः स्त्रीशूद्रयोः करस्पर्शाविष्णोरप्यधिको मत इत्यादि वाक्यामास १०३
दर्शनात् चेतभगवद्धि मुखाउपेक्षणीयावेसवेस्तु वाक्यानां सर्ववर्णैः नरमात्रैश्च शालग्रामपूजाप्र

गायत्र्या दद्याद्वस्त्रे धौतनिर्मले प्रणवेन ब्रह्मसूत्रमुत्तरीयं च कल्पयेत् १५४ आचांतमन्न
धिष्ठाय पादुके निर्मलासने सुखासीनाय प्राग्वदर्घादि निर्वपेत् १५५ धूपेनागुरुजेनाढ्या मूर्द्धानं
वहस्य च केशसंशोधं प्रसुविनाचंदनेन सुगंधिना १५६ इदं विष्णुरिति कृत्वा लेपनं वपुषि स्मृतं
जितंते इति मंत्रेण मंडनैरपि मंडयेत्। पुष्पाणि दद्यात द्विक्षारिति मंत्रेण पंचविंशति इरावतीति मंत्रे
णपादयोरक्षतं क्षिपेत् १५८ अंजनं विष्णुगायत्र्या व्याहृत्या दर्पणं जितंते इति धूपयेद्गु
रुस्थितैः ५९ उद्दीप्यस्वेति मंत्रेण दीपारोपणमिष्यते। तिलाश्च स्वं तथा हेमं तांबूलं तंडुलानपि १६०
फलानि गव्यमाहारगास्त्र धान्यं यथावसु गोग्रासं दक्षिणा काये वदद्याद्देवस्य संनिधौ १६१ अधिपस्य
तदाराज्ञो राष्ट्रस्य सकलस्य च। यज्ञानां ब्राह्मणादीनां दानमभ्युदयावहं १६२ अपनीतो यवनिका
पटे भक्तानुकंपया घोषयेत्तूर्यघोषेण नृत्यं गेयं तथाचरेत् १६३ स्तोत्राणि च कथाश्रुत्वा वेदां
गानि च षट् तथा पठेत्पुरस्ते देवस्य सर्वमन्यच्च मंगलं १६४ आचरेत्पदुके दत्वा गमयेद्भोजना
सनं दत्वार्घ्यपाद्यमाचम्य मधुपर्कं न्यवेदयेत् १६५ प्रणवेन ततो दद्यात्तांबूलं मास्यशोधनं ह
विर्निवेदयेत्सिद्धं भोज्यभक्ष्यादिकं तथा १६६ मधुरादिरसोपेतं विष्णुक्तं सुसमाहितः सुसंस्कृते
श्च निष्पन्नैः युक्तमन्यैः फलादिभिः १६७ अपक्वैरतिपक्वैश्च यथायोगं प्रकल्पयेत् राज्ञोपचारा
त्पूर्वमनुपचारं प्रकल्पते १६८ प्रोक्षणं चास्त्रमंत्रेण परिषिच्य च वर्मणा प्राणादेनाहूतो देत्ते दहनाह्वा
वनादिके १६९ कृते च सुरभीमुद्रां दर्शयित्वा च देशिकः। न्यसेर्द्द पुष्पे संस्पृष्टे विष्णुहस्ते समाधिना

नं चरेत्र पूजितं तु जगत्सर्वं येन तु विष्णुः प्रपूजितः १३ पितरः संवदंत्यस्मिन्कुले जातास्तु वै
पू० वाः। तत्कुलं तारितं तैस्तु याबदाहूतसंप्लवं १४ स एव दिवसो धन्यो धन्यानामथवा ध्रुवाः पि
तातस्य च वै धन्यः धन्यानि सुहृदस्तथा १५ सर्वधन्यतमा ज्ञेया विष्णुभक्तिपरायणाः तेषां
दर्शनमात्रेण महापापात्प्रमुच्यते १६ पाद्मे माघमाहात्म्ये कुंडलविकुंडलयमदूतसंवादे य
मदूतवाक्यं। शालग्रामशिला चक्रे वज्रकीटविनिर्मिते। अधिष्ठानं हि तद्विष्णोः सर्वपापप्र
णाशनं १७ सर्वपुण्यप्रदं वैश्यं सर्वेषां मुक्तिदं शुभं। यः पूजयेद्धरिं चक्रे शालग्रामस
मुद्भवे १८ राजसूयसहस्रेण तेनेष्टं प्रतिवासरं यदामनंति वेदांता ब्रह्म निर्गुणमच्युतं
पु.से. १९ तत्प्रसादो भवेन्नृणां शालिग्रामशिलार्चनात् महत्काष्ठस्थितो वह्निर्मथ्यमानेप्रका
श्यते २० यथा तथा हरिर्व्यापी शालग्रामे प्रकाशते २१ अपि पापसमाचाराः कर्मण्यन
१०४ धिकारिणः २१ शालग्रामार्चका वैश्य नैव यांति यमालयं न तथा रमते लक्ष्म्यां न तथा स्व राम
पुरे हरिः २२ शालग्रामशिला चक्रे तथासौ रमते सदा अग्निहोत्रं हुतं तेन दत्ता पृथ्वी स
सागरा २३ येनार्चितो हरिश्चक्रे शालग्रामसमुद्भवे शिला द्वादश भो वैश्य शालग्रामसमुद्भ
वाः विधिवत्पूजितं येन तस्य पुण्यं वदामि ते २४ कोटिद्वादशलिंगैस्तु पूजितैः स्वर्णपंकजैः यत्स्या १०४
द्द्वादशकल्पेषु दिनेनैकेन तद्भवेत् २५ यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतं उषित्वा स ह
रेर्लोके चक्रवर्ती स जायते २६ कामैः क्रोधैश्च लोभैश्च व्याप्तो यो पि नराधमः सो पि याति

तिपादकैः वाक्यैः बाधितत्वात्। तानि वाक्यानि उदाहृयंते तथा वाक्ये च स्मृत्यंश्रवणां वैश्यवानां शूद्रत्व
भावश्रवणादपि उपेक्षणीया एव। तत्र पाद्मे उत्तरखंडे रुद्रपार्वतीसंवादे प्रश्नोत्तराभ्यां निर्णीतं। पार्वत्यु
वाच॥ शालग्रामशिलारूपा मूर्त्तयः संति भूतले तासां चैव तु मूर्त्तीनां पूजनं कति धा स्मृतं। ब्राह्म
णैः कति पूज्यास्तां क्षत्रियैर्वा सुरेश्वर। वैश्यैर्वाथ शूद्रैर्वा तन्मे वद महेश्वर २ श्रीमहादेव उवाच। इ
यं सा महती पुण्या पवित्रा धर्मकारिणी। यस्या दर्शनमात्रेण ब्रह्महत्या प्रणश्यते सदा ३ तदहं सर्वती
र्थानां प्रवरं श्रुतिनोदितं यत्रेयं सर्वदा मूर्त्तिः शालग्रामशिलाशुभा ४ ब्राह्मणैः पंच पूज्यश्च चत्वा
रि क्षत्रियैस्तथा वैश्यैश्च त्रयः पूज्या च एका शूद्रैः प्रयत्नतः ५ तस्याः पूजनमात्रेण शूद्रा मुक्ति
मवाप्नुयात्। अनेन विधिना देवि ये नराः पूजयंति वै ६ गौणभोगान्वै सर्वान् भुक्त्वा यांति विष्णोः स
नातनं इयं सा महती मूर्त्तिः सर्वदा पापहारिणी ७ कलौ सद्यः फलं देवि जायते पूजनाद्यतः।
तत्र गंगा च यमुना गोदावरी सरस्वती तिष्ठते च शिलायत्र सर्वे तत्र न संशयः ८ किमत्र ब
या हुनोक्तेन भद्रे योषितां नैव पूजनं मनुजैः सम्यक कर्त्तव्यं मुक्तिमिच्छुभिः ९ भक्तिभावेन देवे
शि येर्च्चयंति जनार्द्दनं तेषां दर्शनमात्रेण ब्रह्महत्या प्रणश्यते नरः १० दासभावेन यः शूद्रः पूज
नं कुरुते सदा तेषां पुण्यं न जानामि कृतिजातं सुरेश्वरि ११ भक्तिभावेन यो [illegible] हरिमर्च
यते यदि। एकविंशति कुलं तेन तारितं तेन कुत्स्नं १२ [illegible] चक्रांकितं तत् न [illegible] विप्रः पूज

णं ४३ पीतं येन सदा मेध्यं शालग्रामशिलाजलं। शालग्रामशिला यत्र तत्तीर्थं योजनत्रयं ४४
शालिग्रामसमीपे तु क्रोशमात्रं समंततः कीटकोपि मृतो याति वैकुंठभवनं परं ४५ शालिग्रामशिला
चक्रं यो दद्याद्दानमुत्तमं भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं ४६ शालिग्रामशिलायां यो मूल्यमु
द्धारयेन्नरः विक्रेता चानुमंता च यः परीक्षानुमोदकः। सर्वे ते नरकं यांति यावदाहूतसंप्लवं ४७
अतः संवर्जयेद्विप्र चक्रस्य क्रयविक्रयं बहुनात्र किं वैश्यकर्तव्यं भयभीरुणा ४८ स्मरणं वासु
देवस्य सर्वपापहरं हि तत् इति गारुडे प्रेतखंडे विष्णुवाक्यं। शालिग्रामशिला यत्र पापदोषक्षया
वहा तत्संनिधानमरणान्मुक्तिर्जंतोः सुनिश्चिता इति ४९ पंचरात्रे पाद्मसंहितायां। सर्वाः स्वायं
भुवास्तेयाः शिलाश्चक्रैः समुद्भवाः नित्यं संनिधिरेतासु परस्य परमात्मनः ५० नप्रतिष्ठा विधातव्या
सटीक न चैवावाहनादिकं। शालिग्रामशिला यत्र पूज्यते भगवन्मयैः ५१ तद्देशयोजनार्द्धं वा भवंतो नि
पु॰सं॰ वीणमश्नुते। द्वारवत्या शिला वापि शालिग्रामशिलासमाः ५२ काशीखंडे ध्रुववक्तौ। शालिग्रा राम
२०५ मशिला येन पूजिता तुलसीदलैः। सपारिजातमालाभिः पूज्यते स्वः सद्मनि। अत्यहं द्वादशशिलाः
शालिग्रामस्य योर्चयेत्। द्वारवत्या शिलायुक्तः स वैकुंठे महीयते ५४ गारुडे स्त्रीलक्षणकथना
नंतरं भगवद्वाक्यं। निर्लक्षणाः शुभाः स्याच्च चक्रांकितशिलार्चनात् ५५ तत्रैव चक्रांकितस्य भे २०५
दाः। आदौ सुदर्शनो मूर्तिः लक्ष्मीनारायणोपरः ५६ त्रिचक्रोच्युतः मूर्तिः स्याच्चतुश्चक्रः चतुर्भु
जः। वासुदेवश्च प्रद्युम्नस्ततः संकर्षणास्मृतः ५७ पुरुषोत्तमोष्टमः स्यान्नवव्यूहो दशात्मकः ए

हरेर्लोकं शालग्रामशिलार्चनात् २७ यः पूजयति गोविंदं शालग्रामे सदा नरः। आभूतसंप्लवं य
वत्न स प्रच्यवते दिवः २८ विना तीर्थैर्विना दानैर्विना यज्ञैर्विना जपैः मुक्तिं यांति नरा वैश्य शाल
ग्रामशिलार्चनात् २९ नरकं गर्भवासं च तिर्यक्त्वं कृमियोनितां न याति वैश्य पापोपि शालग्राम
शिलार्चकः ३० दीक्षाविधानमंत्रज्ञश्चक्रे यो बलिमाहरेत् स याति वैष्णवं धाम सत्यं सत्यं वदाम्यहं
३१ शालिग्रामशिलातोयैर्योभिषेकं समाचरेत्। गंगागोदावरीनद्यो नर्मदामुक्तिप्रदास्तु या ३२ व
संति सर्वतीर्थानि शालग्रामशिलाजले नैवेद्यैर्विविधैः पुष्पैस्तथा गंधानुलेपनैः ३३ कुरुते मान
वो यस्तु कलौ भक्तिपरायणः कल्पकोटिसहस्राणि रमते हरिसंनिधौ ३४ लिंगैस्तु कोटिभिर्दृष्टैर्य
त्फलं पूजितैस्तु तैः शालिग्रामशिलायां एकेनापीह तत्फलं ३५ सकृदभ्यर्चिते लिंगे शालग्रा
मशिलोद्भवे मुक्तिं प्रयांति मनुजाः नूनं सांख्येन वर्जिताः ३६ शालग्रामशिलारूपी यत्र तिष्ठति
केशवः तत्र देवासुरा यक्षा भुवनानि चतुर्दश ३७ शालग्रामशिलाग्रे तु यः श्राद्धं कुरुते नरः पि
पितरस्तस्य तिष्ठंति तृप्ताः कल्पशतं दिवि ३८ ये पिबंति नरा नित्यं शालग्रामशिलाजलं पंचगव्य
सहस्रैस्तु सेवितैः किं प्रयोजनं ३९ शालग्रामशिलायत्र तत्तीर्थं पावनं स्मृतं। तत्र दाने च होमं
श्च सर्वं कोटिगुणं भवेत् ४० शालग्रामशिलातोयं यः पिबेद् बिंदुना समं। मातुः स्तनं पुनर्नैव स पि
बेन्मुक्तिभाग् नरः ४१ तीर्थतोयाद्भवेत्पुण्यं शालग्रामशिलाजलं शालग्रामशिलायत्र तत्तीर्थ
यो जनत्रयं ४२ हत्याकोटिविनाशाय कुरुते नात्र संशयः दहते नरकान्सर्वान् गर्भवासं च दारु

दाध्ययनसंपन्नः सवैश्यइतिसंज्ञितः ७४ सर्वभक्षरतिर्नित्यंसर्वकर्मकरोऽशुचिः त्यक्तवेदस्त्वनाचा
पू० रः सवैशूद्रइतिस्मृतः ७५ शूद्रेचैतद्भवेल्लक्ष्यंद्विजेतच्चनविद्यते नवैशूद्रोभवेच्छूद्रोब्राह्मणोनचब्राह्म
णः ७६ भारतारण्यकेपर्वणिचसर्पेन्द्रयुधिष्ठिरसंवादेब्राह्मणलक्षणमुक्तं। सत्यंदानंक्षमाशीलं
आनृशंस्यंतपोघृणा दृश्यतेयत्रसर्पेन्द्रसब्राह्मणइतिस्मृतः ७७। सर्प उ। चातुर्वर्ण्यंप्रमाणंचसत्यंच
ब्रह्मचैवहि। शूद्रेष्वपिचसत्यानिदानमक्रोधएवच ७८ आनृशंस्यमहिंसाचघृणाचैवयुधिष्ठिर
युधि० शूद्रेचैवंतद्भवेल्लक्ष्यंद्विजेतच्चनविद्यते ७९ नवैशूद्रोभवेच्छूद्रोब्राह्मणोवापिवैद्विजः। यत्रै
तल्लक्ष्यतेवृत्तंमयसब्राह्मणस्मृतः ८० यत्रैतन्नभवेत्सर्वतंशूद्रमितिनिर्दिशेत सर्प उ०। यदितेवृत्तो
राजन्ब्राह्मणः प्रसमीक्षितः ८१ वृथाजातिस्तदायुष्मन्कृतिर्यस्मान्नदृश्यते। युधि० जातिरत्रमहास
पु.सं. र्पमनुष्यत्वेविधीयते ८२ संकरात्सर्ववर्णानांदुःपरीक्ष्यइतिस्मृतः। सर्वेसर्वास्वपत्यानिजनयंतियद
१०६ नराः ८३ वाङ्मैथुनमथोजन्ममरणंचसमंनृणां। इदमार्षप्रमाणंचयेयजामहइत्यपि ८४ तस्मा राम
च्छीलंप्रधानेष्टंविदुर्येतत्त्वदर्शिनः। प्राङ्नाभिवर्द्धनात्पुंसोजातकर्मविधीयते ८५ तत्रास्यमातास
वित्रीपिताचाचार्यउच्यते। वृत्त्याशूद्रसमोह्येषयावद्वेदेनजायते ८६ तस्मिन्नेवमतिद्वैधंमनुः
स्वायंभुवोऽब्रवीत्। कृतकृत्यांपुनर्वर्णायदिवृत्तंनविद्यते ८७ संकरस्तत्रनागेंद्रबलवान्प्रसमी
क्षितः। यस्त्विदानींमहासर्पसंस्कृतंवृत्तमिष्यते ८८ तंब्राह्मणमहंपूर्वमुक्तवान्भुजगोत्तम। तत्रैवब्रा १०६
ह्मणव्याधसंवादेब्राह्मणवाक्यं ८९ सांप्रतंचमतोमेसिब्राह्मणोनात्रसंशयः। ब्राह्मणः पतनीयेषु व

कादशो निरुद्धः स्याद्वादशो द्वादशात्मकः ५८ अतऊर्ध्वमनंतः स्याच्चक्रैरेकादिकंक्रमात् सुदर्श
नाद्याल्लक्षिताश्च पूजिताः सर्वकामदाः ५९ शालग्रामशिलायत्र देवो द्वारवतीभवः उभयोः संग
मोयत्र तत्र मुक्तिर्न संशयः ६० किंच। शूद्राणां नाधिकार इत्यत्र शूद्रत्वं किमिति नियत्वं न शक्यं
यतः नारदोसंस्कारविशिष्टस्यैव ब्रह्मत्वं तद्रहितस्य शूद्रत्वं प्रतिपाद्यते। तथा च संस्कारहीन इ
वसत्ते नन कर्तव्याप्रियमेव व्यवस्था। तथा भारते दान धर्मे उक्तं। शूद्रोप्यागमसंपन्नो द्विजो भवति
संस्कृतः। ब्राह्मणो वाप्यसद्वृत्तः सर्वसंकरभोजनः ६४ ब्राह्मण्यं स समुत्सृज्य शूद्रो भवति तादृशः।
कर्मभिः शुचिभिर्देवि शुद्धात्मा विजितेंद्रियः ६५ शूद्रोपि द्विजवत्सेव्य इति ब्रह्माब्रवीत्स्वयं। स्वभा
व कर्म च शुभं यत्र शूद्रेभितिष्ठति ६६ विशुद्धः स द्विजातिर्वै विज्ञेय इति मे मतिः। नयोनिर्नापि सं
स्कारो न श्रुतं न च संततिः ६७ कारणानि द्विजत्वस्य वृत्तमेव हि कारणं। सर्वोयं ब्राह्मणो लोके वृ
त्तेन तु विधीयते ६८ वृत्ते स्थितस्तु शूद्रस्तु ब्राह्मणत्वं निगच्छति। ब्रह्मस्वभावः सुश्रोणि समः
सर्वत्र मे मतिः ६९ निर्गुणं निर्मलं ब्रह्म समं हि यत्र तिष्ठति। मोक्षधर्मे च॥ सत्यं दानं मथाद्रोह आ
नृशंस्यं त्रपा घृणा। ७० तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः। जातकर्मादिभिर्यस्तु संस्का
रैः संस्कृतः शुचिः ७१ वेदाध्ययनसंपन्नः षट्सु कर्मस्ववस्थितः। शौचाचारस्थितः सम्यग्विघ हु
सशी गुरुप्रियः ७२ नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते। क्षत्रजं सेवते कर्म वेदाध्ययनसंगतः
७३ दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते। विशत्याशु पशुभ्यश्च कृष्यादानरतिः शुचिः वे

गंगा० सद्विवेदांतविद्योगी ब्रह्मचर्यव्रती सदा १४ कलौ कलुषचित्तानां पापद्रव्यरतात्मनां विधिहीनक्रि
याणां च गतिर्गंगां विना नहि १५ अलक्ष्मीः कालकर्णी च दुःस्वप्नो दुर्विचिंतितं। गंगा गंगेति जपतां फ
लं नोपदिशंति हि १६ गंगा हि सर्वभूतानामिहामुत्र फलप्रदा भावानुरूपतो विप्रा सा सदा सर्वजगद्धिता
१७ यज्ञदानतपोयोगजपाः सनियमा यमाः। गंगासेवासहस्रांशं न लभंते कलौ हरे १८ किमष्टांगेन योगे
ना किं तपोभिः किमध्वरैः। वास एव हि गंगायां ब्रह्मज्ञानस्य कारणं १९ सर्व एव शुभः कालः सर्वो देशस्तथा
शुभः। सर्वो जनो दानपात्रं श्रीमती जाह्नवीतटे २० सर्वेषामेव पात्राणां विष्णुभक्तो यथावरः। तथा सर्वेषु
तीर्थेषु गंगातीर्थं विशिष्यत इति २१ कूर्मे च प्रयागमाहात्म्य। स्वल्पमल्पतरं पापं सरहस्यं नराधिप।
पु·सं० प्रयागं स्मरमाणस्य सर्वं प्रायाति संक्षयं २२ दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि मत्तुकालेपियद्वा
पि नरः पापात्प्रमुच्यते २३ योजनानां सहस्रे गंगां यः स्मरते नरः। अपि दुष्कृतकर्मासौ लभते परमां गतिं
१०७ २४ कीर्त्तिनान्मुच्यते पापाद्दृष्ट्वा भद्राणि पश्यति। तथोपस्पृश्य राजेंद्र स्वर्गलोके महीयते २५ व्याधितो य
दि वा दीनः क्रुद्धो वा पि भवेन्नरः। यत्र गंगा महाभाग बहुतीर्थतपोधनाः २६ सिद्धक्षेत्रं हि तज्ज्ञेयं नात्र कार्या राम
विचारणा यावदस्थीनि गंगायां तिष्ठंति पुरुषस्य तु २७ तावद्वर्षसहस्राणि स्वर्गलोके महीयते। ती
र्थानां परमं तीर्थं नदीनां परमा नदी २८ मोक्षदा सर्वभूतानां महापातकिनामपि सर्वत्र सुलभा गंगा त्रि
षु स्थानेषु दुर्लभा गंगाद्वारे प्रयागे च गंगासागरसंगमे २९ सर्वेषामेव भूतानां पापोपहतचेतसां। गतिमन्वे १०७
षमाणानां नास्ति गंगासमा गतिः ३० पवित्राणां पवित्रं यन्मंगलानां च मंगलं। महेश्वरात्परिभ्रष्टा सर्व

र्तमानो विकर्मस्थः ९० दांभिको दुःकृतिप्रज्ञः शूद्रेण सदृशो भवेत् यस्तु शूद्रो दमे धर्मे सत्ये च सततोत्थि
तः ९१ तं ब्राह्मणमहं मन्ये वृत्तेन च भवेद्द्विजः इति श्रीमत्पुराणसंग्रहाख्ये भिनवप्रकरणे नित्यपूजाव
र्णनोनुगुणो सकलपुराणवाक्यग्रथनरूपो अष्टमः परिच्छेदः समाप्तिमगमत् शुभमस्तु ८ अथ गंगा
माहात्म्यं स्कांदे काशीखंडे पूर्वार्द्धे रुद्रवाक्यं ममैव सा परा मूर्त्तिस्तोयरूपा शिवात्मिका। ब्रह्मांडानाम
नेकानामाधारः प्रकृतिः पुरा १ शुद्धविद्यास्वरूपा च त्रिशक्तिः कारणात्मिका। आनंदामलरूपा च शु
द्धधर्मस्वरूपिणी २ त्वं। तामेतां जगतो धात्रीं धारयामि स्वलीलया। विश्वस्य रक्षार्थाय परब्रह्मस्वरूपि
णी ३ त्रैलोक्ये यानि तीर्थानि पुण्यक्षेत्राणि यानि च। सर्वत्र सर्वे ये धर्माः सर्वे यज्ञाः सदक्षिणाः ४
तपांसि विविधा सद्वीणि श्रुतिः सांगा चतुर्मिता। अहं च त्वं च कमलापि देवतानां गणाश्च ये ५ पुरुषा
र्थाश्च सर्वे वै शक्तयो विविधाश्च याः। गंगायां सर्व एवैते सूक्ष्मरूपेण संस्थिताः ६ सस्नातः सर्वती
र्थेषु सर्वक्रतुदीक्षितः। चीर्णसर्वव्रतः सोपि यस्तु गंगां निषेवते ७ तपांसि तेन तप्तानि सर्वदानप्र
दः स च। सप्राप्तयोगनियमो यस्तु गंगां निषेवते ८ सर्ववर्णाश्रमिभ्यश्च वेदविद्भ्यस्तथैव तथा। शास्त्रार्थ
पारगेभ्यश्च गंगास्नायी विशिष्यते ९ मनोवाक्कायजैर्दोषैर्दुष्टो बहुविधैरपि। वीक्ष्य गंगां भवेत्पूतः पु
रुषो नात्र संशयः १० कृते सर्वत्र तीर्थानि त्रेतायां पुष्करं परं। द्वापरे तु कुरुक्षेत्रं कलौ गंगैव केवला ११
ध्यानं कृते मोक्षहेतुः त्रेतायां तच्च वै तपः। द्वापरे तु द्वयं यज्ञाः कलौ गंगैव केवलं १२ पूर्वजन्मांतराभ्या
सनावसतो हरेः गंगातीरे निवासः स्यात् मदनुग्रहतः परात् १३ यो देहपतनाद्यावद्गंगातीरं न मुंचति

कष्टैः स्पृष्टैर्ग्रस्तानन्यैरनेकैः पुरुषाधमान् पततो नरके गंगा संश्रितान्प्रेत्य तारयेत् ४७ विनयाचा
गंगा॰ रहीनाश्च अशिवाश्च नराधमाः । ते भवंति शिवा विप्र ये वै गंगामुपाश्रिताः ४८ उपासते यथा बाला मात
रं क्षुधयार्दिताः । श्रेयस्कामास्तथा गंगामुपासंतीह देहिनः ४९ जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बि
भर्त्ति यः । बिभर्त्ति बिंबसोर्कस्य तमोनाशाय केवलं ५० वसनैरभिभूतस्य नरस्याविनशिष्यतः । गंगा
दर्शनजा प्रीतिर्व्यसनान्यपकर्षति ५१ वाङ्मनःकर्मजैर्ग्रस्तः पापैरिह पुमानिह । वीक्ष्य गंगां भवेत्पू
तोऽत्र मे नास्ति संशयः ५२ सप्तावरान्सप्त परान्पितॄंस्तेभ्यश्च ये परे पुमांस्तारयते गंगां वीक्ष्य स्पृ
ष्ट्वावगाह्य च ५३ दर्शनात्स्पर्शनात्पानात्तथा गंगेति कीर्त्तनात् पुनात्यपुण्यान्पुरुषाञ्शतशोऽथ
सहस्रशः ५४ जात्यंधैरिह तुल्यास्ते मृतैः पंगुभिरेव च । समर्था ये न पश्यंति गंगां पुण्यजलां शिवां ५५
पु॰सं॰ वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः । विद्यावद्भिः श्रितां गंगां पुमान्को नाम नाश्रयेत् ५६
१०२ उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसंमतः । चिंतयेन्मनसा गंगां स गतिं परमां लभेत् ५७ तद्भावस्त
द्गतमनास्तन्निष्ठस्तत्परायणः । गंगायां योऽनुगतो भक्त्या स तस्याः प्रियतां व्रजेत् ५८ त्रिषु लोकेषु पुण्या रम्य
त्वाद्गंगायाः प्रथितं यशः यत्पुत्रान्सगरस्यैतान्भस्माख्याननयद्दिवं ५९ ख्यातिर्यस्याः स्वर्दिवं गं
च नित्यं पुरा दिशो विदिशश्चावतस्थे तस्या जलं सेव्य सरिद्वरायाः मर्त्याः सर्वे कृतकृत्या भवंति ६०
लोकान्तर्यद्या जननीव पुत्रान्सर्वात्मना सर्वगुणोपपन्नान् । तस्या नकं ब्रह्मणमभीप्समानैर्गंगा १०२
सदेवात्मवशैरुपास्या ६१ पाद्मे च जगन्नाथमाहात्म्ये व्यासवाक्यं । गंगानिरीक्षणस्पर्शकीर्तनस्म

पापहरास्तुभाः ३१ कृते तु नैमिषं तीर्थं त्रेतायां पुष्करं वरं द्वापरे कुरुक्षेत्रं च कलौ गंगा विशिष्यते ३२
गंगामेव विशिष्येति प्रयागे तु विशेषतः नान्यत् कलियुगे रौद्रे भेषजं नृप विद्यते ३३ अकामो वा स
कामो वा गंगायां योऽपपद्यते स मृतो जायते स्वर्गे नरकं न च पश्यति ३४ तिस्रः कोट्योऽर्द्धकोटिश्च ती
र्थानां वायुरब्रवीत् दिवि भूम्यंतरिक्षे च तत्सर्वं जाह्नवी स्मृतं ३५ यत्र गंगा महाभाग स देशस्तत्तपो
वनं सिद्धक्षेत्रं तु तज्ज्ञेयं गंगातीरसमाश्रितः ३६ श्रीभारते दानधर्मे च। ते देशास्ते जनप
दास्ते श्रमाः स्ते च पर्वताः। येषां भागीरथी गंगा मध्ये नेति सरिद्वरा ३७ तपसा ब्रह्मचर्येण यज्ञै गच्छति
स्त्यागेन वा पुनः। गतिं तां न लभेज्जंतुः गंगां सेव्य यां लभेत्। ३८ स्पृष्टानि येषां गांगेयैस्तोयैर्गात्रा
देहिनां णि वा पुनः न्यस्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते ३९ पूर्वे वयसि कर्माणि कृत्वा पापानि ये
नराः। पश्चाद् गंगां निषेवंते तेऽपि यांत्युत्तमां गतिं ४० यावदस्थि मनुष्याणां गंगातोयेषु तिष्ठति।
व तावद्वर्षसहस्राणि स्वर्गलोके महीयते ४१ अपहत्य तमस्तीव्रं यथा भात्युदये रविः। तथापहृत्य पाप्मा
नं भाति गंगाजलोक्षितः ४२ त्रिषु लोकेषु ये केचित् प्राणिनः सर्व एव ते तर्प्यमाणाः परां तृप्तिं यांति गं
गाजलैः शुभैः ४३ लंवेतावीक्षितायस्तु युगानामयुतं पुमान् तिष्ठेद्यथेष्टं यश्चापि गंगायां
स विशिष्यते ४४ भूतानामिह सर्वेषां दुःखोपहतचेतसां। गतिमन्वेषमाणानां न गंगासदृशी गतिः
४५ भवंति निर्विषाः सर्पाः यथा तार्क्ष्यस्य दर्शनात् गंगाया दर्शनात्तद्वत् सर्वपापैः प्रमुच्यते ४६ प्र

स्यत्वा

गं० णः सदा। सर्वतीर्थमयी गंगा सर्वदेवमयो हरिः ७८ त्रयस्त्रिंशत्कोटीनां पूजा च क्रियते हरे हे
त्रे वाराणसी त्वं तु गंगा च परमेश्वरी। ७९ गंगा या मुक्तिदे क्षेत्रे च गंगा किल्विषनाशिनी संसारता
रिणी गंगा हरिगंगे नमोस्तु ते इति ८० वृहन्नैवर्त्ते पुण्यकीर्तिवाक्यं। सर्वशास्त्रेण गंगैव महद्भिः प्र
तिपाद्यते गंगैव पुरुषार्थो हि सर्वाचारविचारिणां ८१ मनुष्यदेहं संप्राप्य यदि गंगां न सेवते ग
र्भवासादिशमनो न तेषां जायते क्वचित ८२ गंगैव धर्मः खलु मोक्षोपि गंगा गंगा सुखं चार्थरूपा
पि गंगा। चतुर्विधस्यापि सुखस्य दात्री गंगां भजे हि प्रभु शिवप्रियाय इति ८३ भागवते पंचम
स्कंधे च। यस्यां स्नानार्थं पानार्थं वागच्छतः पुंसः। पदे पदे श्वमेधराजसूयादीनां फलं न दुर्लभ
पु० सं० मिति ८४ पाद्मे पातालखंडे आवाहनमंत्रः। विष्णुपादप्रसूतासि वैष्णवी विष्णुदेवता। त्राहि
१०९ नस्त्वेनसस्तस्मादाजन्ममरणांतिकात ८५ तिस्रः कोट्योर्द्धकोटी च तीर्थानां वायुरब्रवीत्। दि राम
वि भूम्यंतरिक्षे च तानि ते संति जाह्नवि ८६ वैष्णवे द्वितीयांशे॥ स्नातस्य सलिले यस्याः सद्यः पा
पं प्रणश्यति। अपूर्वपुण्यप्राप्तिश्च सद्यो मैत्रेय जायते ८७ दत्ता पितृभ्यो यत्रापस्तनयैः श्रद्धया
न्वितैः। समा त्रयं प्रयच्छंति तृप्तिं मैत्रेय दुर्लभां ८८ यस्यामिष्ट्वा महायज्ञैर्यज्ञेशं पुरुषोत्तमं द्विज
भूपाः परां सिद्धिमवापुर्दिवि चेह च ८९ स्नानाद्विधूतपापाश्च यज्जले ज्ञंतवस्तथा केशवास १०९
क्तमनसः प्राप्ता निर्वाणमुत्तमं ९० श्रुताभिलषिता दृष्टा स्पृष्टा पीतावगाहिता। या पाव
यति भूतानि कीर्तिता च दिने दिने ९१ गंगा गंगेति यैर्नाम योजनानां शतेष्वपि स्थितै

वणादनु। विलयंयांतिपापौघाःसिंहंदृष्ट्वायथामृगाः ६२ यदानरायांतिकदापिजाह्नवीं।हरंति
पापानिवदंतिचाप्रियं। अहोकृतघ्नाःपुरुषानराधमाःस्वयंकृतानीहनिहंतुमुद्यताः ६३ ब्रह्म
हत्यासुरापानंस्तेयंगुर्वंगनागमः।स्नानमात्राद्विनश्यंतिविधिनामुनिसत्तम। ६४ गंगास्नानान्न
रःकामाद्ब्रह्मणःसदनंव्रजेत् अकामाद्विष्णुसालोक्यंपुनरावृत्तिवर्जितं ६५ देहावसानेभगवाननुप
देष्टाशिवःस्वयं। तद्वशान्मुक्तिमायांतिसर्ववर्णायथाक्रमं ६६ आजन्मप्रारभ्यपापानियत्करोति
नराधमः।तादृशंकश्मलंदृष्ट्वागंगापापंगारवाहिनी ६७ गंगांप्राप्यजलंप्राप्यत्रयोदशविवर्जये
त् शौचमाचमनंकामंनिर्माल्यंमलकर्षणं ६८ गात्रसंवाहनंक्रीडांपरस्परमिथ्यारति अन्यतीर्थ
रतिंचैवान्यतीर्थप्रशंसनं ६९ वस्त्रत्यागमथाघातंसंतारंचविशेषतः।तस्मादवहितात्मानो
गंगांयांतिमहर्षयः ७० भविष्यकलिधर्मवर्णने।।पृथ्वीमरफलायातिकुटिलाउत्तमाजनाः।ध
र्मोरसातलेमग्नस्तारितंगंगयाजगत् ७१ प्रच्छन्नाश्चगतादेवाःगंगयाप्रकटीकृता नास्तिगं
गासमोदेवोनास्तिगंगासमप्रभुः ७२ प्रच्छन्नप्रकटेपापेस्नानतोऽस्त्रैवमुच्यते कायिकोवा
चिकश्चैवमानसाश्चप्रमादिकं ७३ अगम्यागमनंचैवयेचान्येकूटरत्नयः पापकर्मकृयाही
नामहापातकदूषिताः ७४ भस्मीभवंतिपापानिपावकेसमिधोयथा ७५ गंगातीरेवसेन्नित्यंगं
गातोयंसदापिबेत् ७५ दीक्षितःसर्वयज्ञेषुसामपानंदिनेदिने ७६ फलंधेनुसहस्रेषुकन्याद
नेषुयत्फलं राजसूयाश्वमेधेषुगंगास्नानेषुतत्फलं ७७ गंगास्नानंकृतंयेनधैर्यानाराय

स्तापघ्नश्च सुरापश्च चौरो भग्नव्रतस्तथा मथुरां प्राप्य मनुजो मुच्यते सर्वकिल्बिषैः १०४ तिष्ठेद्युग
गंगा· सहस्रं तु पादेनैकेन यः पुमान्। तस्माधिकं भवेत्पुण्यं मथुरायां निवासिनः १०५ परदाररताये
चये नराश्चाजितेंद्रियाः। मथुरावासिनः सर्वेते देवा नरविग्रहाः १०६ बालभिक्षाप्रदातारः स्नानता
क्रोधविवर्जिताः। तीर्थस्नानपरा ये च देवास्ते नरमूर्तयः १०७ यदन्येषां सहस्रेण ब्राह्मणानां महा
त्मनां एकेन पूजितेनस्यान्माथुरेण विलंहितत् १०८ अन्यश्च माथुरो यत्र चतुर्वेदीस्तथाप
रः चतुर्वेदीपिनैवस्यान्माथुरेणसमः क्वचित् १०९ भवंति सर्वे तीर्थानि पुण्यान्यायतनानि च
मंगलानि च सर्वाणि यत्र तिष्ठंति माथुराः ११० चतुर्वेदं परित्यज्य माथुरं पूजयेन्नरः। सिद्धभूत
पु·सं· गणाः सर्वेये च देवगणा भुवि १११। मथुरावासिनो लोकास्ते पश्यंति चतुर्भुजान्। मथुरायां येव राम
११० संति विष्णुरूपा च ते खलु ११२ अज्ञानास्ते न पश्यंति पश्यंति ज्ञानचक्षुषः। मथुरायाः परं
क्षेत्रं त्रैलोक्ये न च विद्यते ११३ तस्यां वसाम्यहं देवि मथुरायां हि सर्वदा। सर्वेषां देवि तीर्थानां
माथुरं परमं महत् ११४ कृष्णेन क्रीडितं तत्र तत्कुंडं तिपदे पदे चक्रं स्थितं हितत्सर्वं लसस्येवप
देन तु ११५ तत्र मध्ये तु तत्स्थानं अर्द्धचंद्रं व्यवस्थितं। तत्रैव वासिनो लोकाः मुक्तिं यांति न संश ११०
यः ११६ कुब्जाबके शुकेरे देवि मथुरायां विशेषतः विना सांख्येन योगेन मुच्यते नात्र संशयः
११७ या गति योगयुक्तस्य वृद्धस्य च मनीषिणः। सा गतिस्त्यजतः प्राणान्मथुरायां नरस्य च ११८

सञ्चारितं हंति पापं जन्मत्रयार्जितं ९२ पाद्मे माघमाहात्म्ये प्रयागमहिमा। मकरस्थे रवौ
माघे गंगायमुनसंगमे स्नानमात्रेण विप्रेंद्राः सर्वपापात्प्रमुच्यते ९३ सितासिते नरः स्ना
त्वा माघे मासि दिनत्रयं न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ९४ महदादिषु लोके
२य षु भुक्त्वा भोगान्यथेप्सितान्। अंते चक्रिणि लीयंते प्रयागे माघमज्जनात् ९५ किं का
शीमरणेनैव किं कुरुक्षेत्रदानतः। गोमतीस्नानतः किं वा प्रयागे मज्जनं यदि ९६ पश्चिमा
भिमुखी गंगा यत्रास्ति यमुनान्विता। हंति कल्पकृतान्पापान्त्र्यहं त्वाह्निकान्यपि ९७ ब्रह्म
वैवर्ते द्वारकादिपुरीमहिमा। द्वारकायां मृता ये च वसंतीह महाधियः तेषां मोक्षो भवत्येव महा
पापप्रणाशनः ९८ महापातकयुक्ता ये महादानरताश्च ये तेषां समा गतिः प्रोक्ता मथुरा
यां वपुः त्यजेत् ९९ या गतिर्योगयुक्तानां मुनीनामूर्ध्वरेतसां। सा गतिर्विष्णुकांच्यां हि
कांतिमत्यां परार्थिनां १०० अयोध्यायां मृता जीवा भवंति हरिरूपिणः। गंगाद्वारे मृता
नो नु निर्वाणं निर्विकल्पितं भवत्येव न संदेहो ह्यनंतस्य प्रसादतः १०१ अवंतिकापुरीं श्रु
त्वा महाकालस्य शाश्वती यस्यां विपन्ना विश्वात्मन विलीयंते महाजनाः १०२ वाराहे
मथुरामाहात्म्यमद्भुतमुक्तं। तत्राप्या। एषा पुरी महापुण्या यस्यां पापं न विद्यते १०३

कोट्यंशतगुणाप्रोक्ता गंगायमुनसंगमे सहस्रगुणितासापि भवेत्पश्चिमवाहिनी १३४ सा राज
ग्रं.मा. न्दर्शनादेव ब्रह्महत्यापहारिणी पश्चिमवाहिनी गंगा कालिंद्या सह संगताः १३५ हंतिकल्पकों
पापं सा माघे नृपपुंगव । असितं कथ्यते राजन्सा वेणीभूविकीर्तिताः । तस्यां माघे मुहूर्तेस्मिन्देवा
नामपि दुर्लभः १३६ ब्रह्माविष्णुर्महादेवा इंद्रादित्यामरुद्गणाः गंधर्वालोकपालाश्च यक्षगुह्य
क किंनराः १३७ घृताचीमेनकारंभाउर्वशीचतिलोत्तमाः । अप्सरसां गणाः सर्वे पितॄणां च गणास्त
था १३८ स्नातुमायांति ते सर्वे माघे वेण्यां नराधिप । विनास्नानं प्रयागेस्मिन्मुच्यते सर्वजंतवः ।
१३९ नवमेस्तु कृतावाक्ये यज्जलस्पर्शमात्रेण ब्रह्मदंडहता अपि सगरात्मजा दिवं जग्मुः केवलं
पु.सं. देहभस्मभिः १४० भस्मीभूता गसंगेन स्वर्याताः सगरात्मजाः किंपुनः श्रद्धया देवीं ये सेवंते धृत राम
१११ व्रताः १४१ न ह्येतत्परमाश्चर्यं स्वधुन्या यदिहोदितं । अनंतचरणांभोजप्रसूताया भवच्छिदः
१४२ सन्निवेश्य मनो यस्मिन्श्रद्धया मुनयामलाः । त्रैगुण्यं दुस्त्यजं हित्वा स द्यो याता स्तदात्म
तां १४३ अगस्तिसंहितायां ब्रह्मविद्यादृष्टांतत्वेनोक्तं । यथा भागीरथी गंगा सागरेण समागता ।
पुनाति पतितान्ब्रह्मविद्यापि भुवनत्रयं १४४ मात्स्ये मार्कंडेयेन युधिष्ठिरं प्रति । प्रयागमाहा
त्म्ये । अल्पमल्पतरं पापं यदा तस्य नराधिप प्रयागं स्मरमाणस्य सर्वमायाति संक्षयं १४५ दर्शनात्त १११
स्य तीर्थस्य नामसंकीर्तनादपि मृत्तिकालभमानो वा नरः पापात्प्रमुच्यते १४६ योयनानांसह
स्रेषु यो गंगां स्मरेन्नरः । अपि दुष्कृतकर्माणो लभते परमां गतिं १४७ कीर्तनान्मुच्यते पापात्

काशीखंडे। आद्यंभागवतःस्थानंतत्पुण्यंहरिमेधसः। आयोपिज्ञंतुतत्स्नात्वामुनिःपापोज्ञायते
ध्रुवं ११९ गिल्लिकामहात्म्यं। पाद्मेउत्तरखंडेरुद्रवाक्येननारदंप्रति १२० गिल्लिकानसमंतीर्थं
नव्रतंद्वादशीसमंनदेवःकेशवात्परोभूयोभूयोवरानने १२१ मासोपवासविधिनास्नात्वातत्रक
रोम्यहंतारकंतत्रविशादंजपामितुनिरंतरं १२२ अतोहवैक्षेत्रेवाज्ञातोविष्णुदेवेयतेअगः। विष्णु
नानिर्मितंपूर्वंक्षेत्रंतत्तुमहत्तरं १२३ पाद्मेप्रयागमहात्म्यं। पापोघभूरिभारस्यदाहदेशंप्रजाप
तिः। प्रयागेविदधेभूपप्रजानांचहृदिस्थितः। १२४ स्नानस्थानमिदंसम्यक् सितासितजलेकिल
पापरूपपशूनांहिब्रह्मणानिर्मितंपुरा १२५ सितासितेतुजाधारासरस्वत्याविनिःसृता। तंमार्गं
ब्रह्मलोकस्यसृष्टिकर्त्तासमसृजत्वै १२६ सितासितेतुयामज्जेदपिपापशतैर्वृतः मकरस्थेरवौमा
घेनसगर्भेषुमज्जति १२७ दुस्तरांवैष्णवीमायायादेवैरपिदुरत्यजा तरणंभवतितस्याश्चप्रयागे
माघमज्जनात् १२८ आपस्पृशंतियेमाघेमकरस्थेसितासिते। तस्यपुण्यस्यसंख्यानंचित्रगुप्ते
नवेत्त्यलं १२९ संवत्सरशतेसाग्रेनिराहारस्ययत्फलं। प्रयागेमाघमासेतुत्र्यहंस्नातस्यतत्फलं
१३० योगाभ्यासेनयत्पुण्यंसंवत्सरशतत्रये। प्रयागेमाघमासेतुत्र्यहंस्नातस्यतत्फलं १३१
प्रयागेमाघमासेयःत्र्यहंस्नातिसमानवः। पापंत्यक्त्वादिवंयातिजीर्णांत्वचमिवोरगः १३२
कुरुक्षेत्रसमागंगायत्रकुत्रावगाहिता। तस्माद्दशगुणागंगाकाश्यामुत्तरवाहिनी १३३।

सि.सि.ते प्र.ग.जे [illegible] म.पो ५

चिदहेति १६३ यत्र गंगा महाभागा स देशस्तत्तपोवनं। सिद्धक्षेत्रं हि तज्ज्ञेयं गंगातीरसमाश्रितं १६४
इति श्रीमत्पुराणसंग्रहाख्येऽस्मिन्नवप्रकरणेऽस्मिन्श्रीविष्णोश्चरणजामाहात्म्यानुवर्णने सकलपु
ग॰ राणवाक्यग्रथनपो नवमोपरिच्छेदः समाप्तिमगमत्तैवस्नवानो ९ अथ विष्णुनैवेद्यमेव वैष्णवैः भोक्त
व्यं तस्य महिमा पुराणेषु दर्शनात्। तथाहि। पाद्मे उत्तरखंडे जगन्नाथमाहात्म्ये वासववाक्यं विष्णोर्निवे
दितं दिव्यं भुंजते मानवा यदि। सर्वपापक्षयात्तेषां सालोक्यं हरिणा विदुः १ तावत्पापानि गर्जंति महान्त्य
पि बहून्यपि यावन्न जायते विष्णोर्नैवेद्यान्नस्य भोजनं २ स्नानं दानं तपो होमं प्रायश्चित्तं वहिर्विदुः
अंतर्मलविशुद्धिस्तु नैवेद्यभक्षणाद्धरेः ३ यथाल्पतागदे पुंसां चिकित्सा कृतात्मनां। महौषधं कि
मपि तदान्नमात्रं शिवायते ४ प्रायश्चित्तानि पापानां महर्षिभिर्विहितान्यपि अतिगुह्यमिदं ज्ञेयं विष्णो
र्नैवेद्यभक्षणं ५ शुष्कं वा पतितं वापि स्पृष्टं वा येन केनचित्। पुरुषोत्तमान्नं मतिमानद्यान्विष्णुप्रियो
पु॰सं॰ भवेत् ६ यत्पुण्यं यज्ञदानाभ्यां यत्पुण्यं तीर्थसेवनात्। तत्पुण्यं समवाप्नोति भुक्त्वा विष्णोर्निवेदितं ७
११२ यथाग्निकणसंयोगाद्दहेदेधांसि लीलया तथा सर्वाणि पापानि जगन्नाथान्नभक्षणं ८ यथारण्या
दकान्येव पुनाति जाह्नवीजलं। तथा पातकिनः सर्वान् जगन्नाथान्नभक्षणं ९ नदीनां च यथा गंगा
सरसां सागरो यथा। यथेंदुर्ग्रहताराणां भास्करस्तपतां यथा १० वर्णानां ब्राह्मणो यद्वद्देवानां ब्रह्मभ ११२
वनः। पावनानां च सर्वेषां तदान्नं परमं विदुः ११ कर्मणा मनसा वाचा जगन्नाथान्नसेवनं। किं तस्य
दानैः किं तीर्थैः किं तपोभिः किमध्वरैः १२ सकृन्निषेवितं येन जगन्नाथान्नभक्षणं। जगन्नाथान्नसत्तमा

रुद्राभद्राणिपश्यति अवगाह्यचपीत्वाच पुनात्यासप्तमंकुलं १४८ व्याधितोयदिवादीनः क्रुद्धोवा
पिभवेन्नरः। गंगायमुनमासाद्यप्राणान्यः परित्यजेत् १४९ दीप्तकांचनवर्णाभैर्विमानैः सूर्यवर्चसैः
गंधर्वाप्सरसांमध्येनस्वर्गेमोदतिमानवः १५० ईप्सितांल्लभतेकामांवदंतिऋषिपुंगवाः। प्रयागंस्म
रमाणोस्तुप्राणान्यः परित्यजेत् १५१ ब्रह्मलोकमवाप्नोतिवदंतिऋषिपुंगवाः नतेजीवंतिलोके
स्मिन्कुंतीपुत्रयुधिष्ठिरः। येप्रयागंनसंप्राप्तास्त्रिषुलोकेषुवंचिताः १५२ एवंदृष्ट्वातुतत्तीर्थंप्रयागं
परमंपदं। मुच्यतेसर्वपापेभ्यःशशांकइवराहुतः १५३ स्थितोत्तारयतेमर्त्यांश्चागांस्तारयतेप्यधः। दिवि
तारयतेदेवांस्तेनत्रिपथगास्मृता १५४ यावदस्थीनितिष्ठंतिगंगायांयस्यदेहिनः। तावद्युगस
हस्राणिस्वर्गलोकेमहीयते १५५ तीर्थानांपरमंतीर्थंनदीनांपरमानदी। मोक्षदासर्वभूतानांमहाप
तकिनामपि १५६ सर्वेषामेवभूतानांपापोपहतचेतसां। गतिमन्वेषमाणानांनास्तिगंगासमाग
तिः १५७ पवित्राणांपवित्रातुमंगलानांतुमंगला। महेश्वरशिरोभ्रष्टासर्वपापहराशुभा १५८ पं
चयोजनविस्तीर्णंप्रयागस्यतुमंडलं। प्रविष्टमात्रेतद्भूमावश्वमेधः पदेपदे १५९ व्यतीतान्पुरुषान्स
प्तभविष्यांश्चतुर्दश। नरस्तारयतेसर्वान्यस्तुप्राणान्परित्यजेत् १६० एवंज्ञात्वातुराजेंद्रसदाश्रद्धाप
रोभवेत्। अश्रद्दधानाःपुरुषाःपापोपहतचेतसः १६१ नाप्नुवंतितत्स्थानंप्रयागंदेवरक्षितं प्रयागस्
त्रिषुलोकेषुब्रह्माद्यैःसर्वत्रपूज्यते तथासर्वेषुतेषुप्रयागःपूज्यतेबुधैः। प्रयागस्तीर्थराजश्चस

त्यमेवयुधिष्ठिर १६२ ब्रह्मापिस्मरतेनित्यंप्रयागंतीर्थमुत्तमं तीर्थराजमनुप्राप्यनचान्यल्लिं

प्रा० इच्छेत मम भक्तिपरायणः। विरक्तो गृहकृत्येषु सदा वै मत्परायणः २८ तस्यान्नं तु मया ग्राह्यं सत्यं स
त्यं वदाम्यहं। तुलसीदलसंयुक्तं तदन्नं मम वल्लभं २९ भावभक्त्या तथा दत्तमनंतं भवति ध्रुवं। अ
वैष्णवोपि यो विष्णुनैवेद्यं यदि कारयेत् ३० तदन्नं मांससतुल्यमुदकं मद्यवद्भवेत्। हीनजातिषु
उत्पन्नो यदि चेद्वैष्णवो भवेत्। ३१ नैवेद्यं सममनुग्राह्यं तदन्नं ह्यमृतोपमं यदि चेद्ब्राह्मणो विह
नदन्यासक्तो ह्यवैष्णवः ३२ नैवेद्यं किंचिद्दत्तं वृथा भवति निश्चितं। मम भक्तो न वैश्यो शूद्रो न विप्रो
न धरापतिः ३३ नैव वैश्यस्तु विज्ञेयः सर्वदा विष्णुरूपधृक्। रुद्रवाक्यं। अकिंचनो महादेवि
यः कश्चिदपि वैष्णवः। विष्णुभक्तिसुतो यो सौ देवि स ब्राह्मणः स्मृतः ३४ यस्मिन्काले च यत्राष्ट्रे
पु.सं. तत्र नैवेद्यमाचरेत्। न कर्तव्यं न कर्तव्यमिति वा नैव संवदेत् ३५ प्रभुणा चैव यद्दत्तं दातव्यं हरये स
११२ दा। उच्छिष्टमुच्छिष्टतां याति हरेर्नैवेद्यकारणात्। ३६ पाद्मे। उत्तरखंडे अनिवेदितभक्षणे निषेधात् राम
अवश्यं नैवेद्यमेव भक्षणीयं। तत्र। अवैष्णवानां पक्वान्नं पतितानां तथैव च। अनर्पितं तथा विष्णो
र्मांससदृशं भवेत् ३७ पंचरात्रे पाद्मसंहितायां। विष्णोर्निवेदितं शुद्धं पावनानां च पावनं। त्र
प्राणिनां याणां दुर्लभं नोज्ञ्यं न त्याज्यं स्यात्कदाचन ३८ भुंजाना नामधेयं श्रीस्त्यजतां परिहीयते व्रतोपवास
लुलितमश्नन्तं तस्य पावनं ३९ मुनाभिव पुरोडाशानलनीचेषु तद्दिष्यते। विष्णोर्निवेदितान्नेन यष्टव्यं
देवतांतरं ४० पितृभ्यश्चापि तद्देयं तदानंत्याय कल्पते। धारितं विष्णुनिर्माल्यं चंदनाद्यानुलेपनं ११२
४१ अहर्निशं धारयतो पुनर्जन्म न संभवेत् [illegible] विष्णोस्त्रिपथगाजलं ४२ पु

सुनानुविद्यानिषेव्यातां १३ पीयूषभक्षणाज्जन्मपुनरापद्यते पुमान् जगन्नाथान्नसेवातुजन्ममृत्यू
पद्यातिनी १४ येनकेनाप्यन्नेदत्तंयत्रकुत्रापिवान्नभिः भोक्तव्यं तत्प्रयत्नेननात्रकार्यविचारणा १५
जगन्नाथान्नपानाभ्यां यष्टव्याः पितृदेवताः तद्वशाद्रक्षयात्पित्रिहमेयारपिजायते १६ नयाम्रा
ऊनयत्सुतृप्यंगंगापिंडुदानतः। ततोनंतफलंश्राद्धेजगन्नाथान्नतोनरणां १७ पाद्मेभूमिखंडेसुव
त्तवेच नैवेद्यमात्रेणसुभक्षितेनसुचक्रिणास्तस्यमहात्मनस्तु। श्रीवाजपेयस्यफलंलभंतेसर्वार्थ
युक्ताःसुनराभवंति १८ गारुडेव्रतप्रकरणेतेच। पंचरात्रविदोमुख्यानैवेद्यंभुंजतेस्वयमिति। वारा
हे। अन्नाद्यपानभक्ष्याणिचोष्यलेह्यानियानिच औषधानिचवासांसियत्किंचित्तुस्वसंचये २०
सर्वंनैवेद्यगत्तीयान्मद्भक्तेनप्रयत्नतः। मद्भुक्तोच्छिष्टशेषंतुपितृणांचदिवौकसां २१ देयंसंपूज्य
विधिवच्चान्यथापतितोभवेत् मासोपवासकर्तारोतथाह्यनशनस्यच २२ राजसूयाश्वमेधानांभु
क्तातत्फलमश्नुते मद्भुक्तमन्नंनीरंचदेवतेभ्योयशस्विनि। देयंपितृभ्यश्चतथातदनंतफलंस्मृतं।
२३ योऽश्वमेधेनयजतेवाजिपेयशतेनच। मदन्नप्राशनाद्देवि सममेतत्त्वचक्षते २४ अन्यदेव
निवेदितंविष्णोर्ननिवेद्यं। तत्र वराहवाक्यं। विपक्षेदोषः। अनिवेद्यचयोश्नातिदेवितत्क्षणमेवच।
सप्तजन्मनिपच्येतनरकेभृशदारुणे २५ पितृणांचऋषीणांचदेवतानांतथैवच ददातिममभु
क्तान्नंसभुक्तेलिहतेसदा २६ हरेर्निवेदितंसम्यक्देवेभ्योजुहुयाद्धविः पितृभ्यश्चैवतद्दद्यात्स
र्वमानंत्यमाप्नुयात् २७ विष्णुभक्तस्यान्नंविष्णुनागृहीतेनान्यस्येति पाद्मे। विष्णुभक्तस्यमू

नाति सिद्धदेवर्षिसंघानहो बिघातकं अत्रैव भगवत्पादोदकसेवनं वैष्णवैरवश्यकर्तव्यं पुराण
वाक्यैः प्रतिपाद्यते । तत्र पंचरात्रे पाद्मसंहितायां । पादोदकं च देवस्य पवित्रं परमं मतं । पाद्यं दत्व
जलं विष्णोर्मूलमंत्रेण देशिकः ४४ गृहीत्वा शतधारेण मूर्द्ध्नि धार्यं विशुद्धये शोधनं सर्वपापा
नां सर्वदुःकृतनाशनं ४५ लक्ष्मीविवर्द्धनं नित्यमायुर्वृद्धिकरं परं । भ्रयमाणः स्वयं विष्णोश्च
रणस्पर्शितं जलं ४६ पीत्वा सकृत् तिमाप्नोति किमु पुनर्जन्मतः । पितॄणां तर्पणं शस्तं वारिणा
तेन तर्पिताः ४७ ऋणेभ्यः पितरो मुक्ताः वसंति दिवि देववत् । भक्त्या यद्देयपादोत्थं शांताय सु
भक्तिमते ४८ पंचकालविधिज्ञाय तदनुष्ठानशालिने न नास्तिकाय यद्दातव्यं नाभिसूयते ।
पाखंडिने न दातव्यं ते भ्यो रक्षेत्प्रयत्नतः ४९ पाद्मे भूखंडे । पादोदकेनाप्यभिषिच्यमाना ह्य
घौघपापैः परिलिप्तदेहाः तेयांति मुक्तिं परमेश्वरस्य तस्यैव पादौ सततं नमामि ५० काशीखंडे
कृवसन्ते । रोगाः प्रशममायांति त्वत्पादोदकसेवनात् अयमेव परो धर्मस्त्विदमेव परं तपः ५१
इदमेव परं तीर्थं विष्णुपादांबु यत्पिबेत् । सर्वैवाव भ यस्नातः स च गंगाजले प्लुतः ५२ विष्णुपादो
दकं कृत्वा शंखे यः स्नाति मानवः । चक्रं शालग्रामस्य शंखेन स्नापितस्य च ५३ अंघ्रिः पादोदक जलैः
स्यांबु पिबन्नमतत्तां व्रजेत् । नारसिंहे । तीर्थप्रकरणे । प्रयागगयानैमिषपुष्कराणि पुन्यानि तियानि
कुरुजांगलयामुनानि । कालेन तीर्थसलिलानि पुनंति यानि पादोदकं भगवतस्तु पुनाति सद्यः ५४

प्रा० अएमेश्रुकवाक्यं तत्पादशौचं कुलकल्मखापहं सधर्मी विमूर्द्ध्ना दधात्तु मंगलं ।यद्देवदेवो गि
रिशश्चंद्रमौलिर्द्दधार मूर्द्ध्ना परया च भक्त्या ५५ इतीमेषु युधिष्ठिर राजसूये द्विजानां वाक्यं स्ववि
नफलं राजन्सर्वदा नफलं तथा ५६ यदीक्षितं दामूर्द्ध्नि कृष्णपादोदके कुरु। कृष्णपादोदकं चै
व शिरसा श्रद्धया धृतं वंद्योसौ देवतानां च मनुष्याणां च का कथा ५७ श्रुत्वाहं गीरितं राजा आकाश
ज्ञात्वाहं सभासदां समर्हयन्हृषीकेशप्रीतः प्राणयविह्वलः ५८ तत्पादावनिज्यापः शिरसा ग
लोकपावनीः ।सभार्यः सानुजोमात्यः सकुटुंबो वहन्मुदा ५९ सनत्कुमारसंहितायां बदरीमाहा
त्म्ये। श्रोत्रियत्वाभिमानेन यस्त्यजेद्बदरीगतः नारायणस्य नैवेद्यं स महापातकी भवेत् ६०
पु·सं· ब्रह्मादिस्यापि मप्यतन्महापातकनाशनं। बदरीनाथनैवेद्यं विष्णुभक्तिप्रदाप्यपि ६१ लक्ष्मीपच
२१४ ति नैवेद्यं भवान्यनिवेदकः। स्वीकरोति महाविष्णुः दोषः कथमिहोच्यते ६२ वाराहे सुखदुःख राम
कथने। भोजयित्वा द्विजान्श्रेष्ठानयस्त्वमामुपकल्पयेत् शेषमन्नं च यो भुंक्ते स सुखी योप
पद्यते ६३ ममैव मर्चनं कृत्वा तत्र प्रायेणमुत्तमं शेषमन्नं समश्नीति ततः सोख्यं परं नु किं ६४
इति श्रीमत्पुराणसंग्रहाख्ये ऽभिनव प्रकरणे स्मिन्प्रसाद माहात्म्यवर्णानानु गुणपुराणवाक्य
ग्रथनरूपो दशमः परिच्छेदः समाप्तः अथ तुलस्यादिमालाधारणे वैष्णवानां सर्वपुराण प्रतिपा २१४
द्यं तथा च वाराहे तुलसीकाष्ठसंभूता धात्रीफलसमुद्भवा पद्मवीजकृता माला कंठस्या समुद्रा

तुलमा तुलसीकाष्ठवह्निना। सिक्थे सिक्थे तिलेवापि अग्निष्टोमफलं लभेत १६ योददातिहरेर्धूपं तु
लसीकाष्ठसंभवं। शतक्रतुसमं पुण्यं लभते गोशतं फलं १७ नैवेद्यं पचते यस्तु तुलसीकाष्ठव ते
ह्निना। मेरुतुल्यं भवेदन्नं तदन्नं केशवस्य हि १८ नतेन शदृशो लोके वैष्णवो भुवि दृश्यते। यः प्र
यच्छति कृष्णस्य तुलसीकाष्ठसंभवं तुलसीदारुजातेन चंदनेन कलौ हरेः विलयं भक्तितो विलु
रमते हरिसंनिधौ २०। तुलसीदललिप्तांगो कुरुते विष्णुपूजनं। पूजाशत दिनेकेन लभते गोशतंफ
लं २१ विलेपार्थं तु कृष्णस्य तुलसीकाष्ठचंदनं मंदिरे तिष्ठते यावत्तावत्पुण्यफलं शृणु २२ तिल
प्रस्थाष्टकं दत्वा यत्पुण्यं प्राप्नुयान्नरः। तत्फलं जायते पुंसां प्रसादाच्चक्रपाणिनः २३ योददा
पु॰सं॰ तिपितृणां तु तुलसीकाष्ठवनानि च। तेषां जायते तृप्तिः श्राद्धकाले शताब्दिकाः २४ तुलसी राम
११५ मूलमृदा चैव स्नानं कुर्याद्विशेषतः। तेन कृतं शतस्नानं यावच्चांगेषु मृत्तिका २५ नवीनया
मंजर्या पूजनं च करोति यः। नानापुष्पैः कृता पूजा यावच्चंद्रदिवाकरौ २६ यस्मिन्गेहे च तिष्ठति
रमाख्या मनोरमाः। दर्शनात्स्पर्शनाच्चैव ब्रह्महत्यादिपातकं २७ तत्सर्वं विलयं यातिस्पर्शनान्ने
वसेशयः। पुष्करादीनि तीर्थानि गंगाद्याः सरितस्तथा २८ वासुदेवादयो देवा वसंति तुलसीद ११५
ले। गारुडे प्रेतखंडे विष्णुवाक्यं। विप्रैरेकादशीगीता तुलसीविप्रधेनवः। असारे दुर्गसंसारे ष
ट्पदी मुक्तिदायिनी २९ रोपणात्पालनात्सेकात् ध्यानस्पर्शनकीर्तनात्। तुलसी हरते पापं

हृता तुलसीकाष्टसंभूतां मालां यो वहते नरः। सर्वतीर्थमयं देहे तस्य विद्धि वसुंधरे २ तुलसीका
ष्टसंभूता धात्रीफलसमुद्भवां दृशाश्वमेधजं पुण्यं तस्य विद्धि वसुंधरे ३ एतां न जानते कश्चित् देवे
वानामपि दुर्लभं। त्रयो मी च विजानीमो ऽस्यहं ब्रह्मा महेश्वरः। ४ तुलसीकाष्टसंभूतां पद्मधात्री
फलोद्भवां। भक्तानामपि कंठस्य भूषणार्थं धृता मया ५ वहेन्नारदीये च। कर्णे न धारयेद्यस्तु
तुलसीसततं नरः। तत्काष्टं वापि राजेंद्र तस्य नास्त्युपपातकं ६ पाद्मे उत्तरखंडे रुद्रवाक्यं। तुलसी
वनमाला वा तुलसीकाष्टसंभवा धृता वै ब्राह्मणानाथ मुक्तिभागी भवेन्नरः ७ विष्णुरूपाय ते
वैसः वैष्णवस्तु उदाहृतः। कंठे तु तुलसीजां मालां धृत्वा हि यः पठेन्नरः। स च वैष्णवो ज्ञेयो विष्णुलो
कं स गच्छति ८ कंठे माला धृता येन शंखचक्रादिचिह्नितः। वैष्णवः सोच्यते विप्र स्तोत्रं चैव पठन्मा
न ९ अथ तुलसीमाहात्म्यं। चांडालानां गृहे यत्र तुलसीपत्रं दृश्यते। तत्र त्याज्ये तुलसी ग्राह्या
भक्तिभावेन चेतसा १० स्वगृहे वपिता चैव तुलसी पापप्रणाशिनी दर्शनात् ब्रह्महत्यादि नश्यंते
नात्र संशयः ११ कार्त्तिके चैव माघे तु तुलस्या पूजयेद्धरिं। वैशाखे तु विशेषेण पूजनं तु हरेः स्म
तः १२ शालग्रामशिला येन पूजिता तुलसीदलैः सपारिजातमालाभिः पूज्यते सुरसद्मनि १३
कीर्तनं यदि संप्राप्तं कीर्त्तनं स्मरणं हरेः। तुलसीकाष्टदग्धोपि न तस्य पुनरागतिः १४ यद्येकं तुलसी
काष्टं मध्ये काष्टस्य तस्य हि। दाहकाले भवेन्मुक्तिः कोटिपापयुतस्य च १५ होमं कुर्वंति ये विप्रा

द्धिमत्सुखं १० भवत्यशेषदुष्टानां नाशायालं नरोत्तम । काशीखंडे ध्रुवस्तौ । गोपीमृत्तुल
मा० सीशंखः शालग्रामस चक्रकः गृहेपि यत्र पेचैते तस्य पापभयं कुतः ११ पाद्मे उत्तरखंडे नारदं प्रति
रुद्रः । अध्यात्मं संप्रवक्ष्यामि शृणु देवर्षिसत्तम । गोपीचंदनमाहात्म्यं यथादृष्टं श्रुतं मया १२
ब्राह्मणो वाथ वैश्यो वा शूद्रो स्त्रियः स्नात्वा वा पुनः गोपीचंदनलिप्तांगो मुच्यते ब्रह्महत्यया १३ तिल
कं कुरुते यस्तु गोपीचंदनसंभवं । मद्यपानादिदोषैस्तु मुच्यते नात्र संशयः । १४ ब्रह्महा मद्यपा
नी च सुवर्णस्तेयी तथैव च । गुरुतल्पगामी वाथ शूद्रो वाथ वै द्विजातिः सर्वे मुच्यते पापाज्ज
न्मशतकारणात् १५ द्वादश तिलकं प्रोक्तं सर्वेषां वै विशेषतः । वैष्णवानां ब्राह्मणानां च कर्तव्यं भ
पु·सं० क्तिमिच्छता १६ आचांडालादपि शूद्रात् तिलकस्यैव तु धारणात् । चांडालादधिकं मन्ये वैष्ण
११६ वानां हि निंदकं १७ पंचलेय यदा विद्वान् तिलकं गोपिसंभवं । विमानेन समारुह्य याति विष्णोः प राम
रं सदा १८ कलौ नारद वक्ष्यामि तिलकं गोपिसंभवं । ये कुर्वंति नराः श्रेष्ठा न तेषां दुर्गतिः क्वचित्
१९ शंखं चैव तथा चक्रं दक्षिणे चापि सव्यके । हसौ धृति विशेषेण महापापैः प्रमुच्यते २० शं
ख चिह्नं तु वामे वै दक्षिणे चक्रचिह्नितं । द्विजानां मुक्तिदं प्रोक्तं धारितव्यं प्रयत्नतः २१ ब्राह्म
णोस्य विशेषेण शंखचक्रादिधारणं । ध्वतेसति महादेवि वैष्णवास्ते हि मानवाः २२ चक्रादि ११६
धारमंत्राणि तत्रैवोक्तानि । गंगाविंदायनमो मंत्रेण धारणं च गदोदितं पं पद्मनाभाइति पद्मे वै
धारयेत्सुधीः २३ चं चक्रस्वरूपेणो विष्णोः धारणं च के नंतरं । पं शंखकारिणे नमः मंत्रेणानेन

नराणां जन्मार्जितंस्वर्ग ३० स्कांदे काशीखंडे यमवाक्यं। तुलसीसंस्कृता येयेतुलसीना
मयापका:। तुलसीवनपालायेतेत्याज्यादूरतोभटा: ३१ काशीखंडे ध्रुववक्त्तं। तुलसीव
स्यभवने यत्यहं परिपूज्यते तद्गृहं नोपसर्पंतिकदाचिद्यमकिंकरा: ३२ इतिपुराणसं
ग्रहेतुलसीप्रकरणं॥ अथगोपीचंदनादिमाहात्म्यं। स्कांदे काशीखंडेयमवाक्यं। अं
तक: शिक्षयन्नेवंनिजदूतान्मुहुर्मुहु: तेत्याज्याद्वारवत्यायेनामानिपरिगृह्णते १ श्री
खंडेकस्तूरीआमोद: स्वर्गसिवर्णै: क्वतादृशा:। तत्पवित्रंकवेतीर्थंतद्गोपीचंदनेयथा २ हृत
श्रुणुतयद्भालेगोपीचंदनलांछितं। ज्वलदंगलवत्सोपिदूरंत्याज्य: प्रयत्नत: ३ युगेयु
गेद्वारवत्यांरत्नानिपरितोमुखात्। अब्धीरत्नाकरोप्यापिलोकेषुपरिगीयते ४ द्वारवत्यां
मन्यतेयज्जंतव: कालनोदिता:। चतुर्भुजास्युर्वैकुंठेतेपीतांबरधारिण: ५ स्कांदे रेवाखंडे
नीराजनंस्यवंदनंनेत्रेमार्जनादिकं उक्तं। तत्र। नीराजनंतुदेवस्यप्रातर्मध्यदिनेतथा ६ सायं
चनियतोनित्यंय: पश्येत्पूजयेद्धरिं। सतीर्त्वीहत्यापरांदुर्गांनेवार्त्तिसमवाप्नुयात। आयु:
श्रीवर्द्धनंपुंसांचक्षुषामपिपूरकं। ७। उपपापहरंचैवसदानीराजनंहरे: तद्वत्नीराजनाकाले
योहरे: पठतिस्तवं ८ सधन्योदेवदेवस्यप्रसन्नेनांतरात्मनो:। हरेर्नीराजनाशेषं पाणिभ्यां
य: प्रयच्छति ९ संगृह्य चक्षुषीमर्त्यो योजयेन्मार्जयेत्स्वके तिमिरादीनक्षिरोगान्नाशये

देवर्षि धारणां शंखचक्रं स्मृतं २४ चक्राणि आयुधानां तु धारणां वै विशेषेण वा ब्राह्मणैर्वेदपारगैः। चांडालो जायते मूढो धारणाच्च न संशयः। २५ ॐ ह्रीं पुं ह्रूं मंत्रेणैषो मंत्रयेनायुधेन सहधृतं। चांडालोपि मुक्तात्मा पूज्य एव सदा द्विज २६ तत्रैव ब्रह्मवाक्यं। गोपिकाचंदनं यत्र तिष्ठते च द्विजोत्तम तद्गृहं तीर्थरूपं च विष्णुना सेवितं किल २७ शोकमोहो न तत्रास्ति न भवत्यशुभं क्वचित्। गोपिकाचंदनं यस्य वर्त्तताहर्निशं गृहे २८ गोपीपुष्करजं पुण्यं पवित्रं कायशोधनं उद्वर्तेनादेव नश्यंति व्याधयो ह्याधयश्च ये २९ अहो देहे धृतं पूर्वं मुक्तिदं सर्वकामिकं तावद्गर्जंति तीर्थानि तावत्क्षेत्राणि सर्वदा ३० गोपिकाचंदनं यावन्न दृष्टं न श्रुतं यदा। इदं धार्यमिदं पूर्वं मलदोषविनाशनं ३१ यस्य संस्पर्शनादेव पूतो भवति मानवः। अंतकाले तु मर्त्यानां मुक्तिदं पावनं परं ३२ किं वदामि श्रुणु श्रेष्ठं मुक्तिदं गोपिचंदनं। विष्णोस्तुलसी काष्ठं च तथा च मूलमृत्तिका ३३ गोपिकाचंदनं चैव तथा वै हरिचंदनं। चत्वारि स्थितानि संमील्य अंगमुत्सृज्य येत्सुधी ३४ तेन तीर्थफलं सर्वं जंबूद्वीपेषु सर्वदा। तिलकं कुरुते यस्तु गोपिकाचंदनोद्भवं ३५ सर्वपापविनिर्मुक्तो याति विष्णोः परं पदं पितुः श्राद्धादिकं तेन गयां गत्वा तु वै कृतं ३६ येन वा पुरुषेणापि तिलकं गोपिचंदनं। ब्रह्महा मद्यपश्चैव

देवर्षे धारणं शंखचक्रसमन्वितं २४ चत्वारि आयुधानां तु धारणं वै विशेषेण वा ब्राह्मणो वेदपारगः। चांडा
लो जायते मूढो धारणाच्च न संशयः। २५ ऊर्ध्वपुंड्रं मृदा शुभ्रं ललाटे यस्य दृश्यते। चांडालोपि स शु
द्धात्मा पूज्य एव सदा द्विज २६ तत्रैव ब्रह्म वाक्यं। गोपिकाचंदनं यत्र तिष्ठते च द्विजोत्तम तद्गृ
हं तीर्थरूपं च विष्णुना सेवितं किल २७ शोक मोहो न तत्रास्ति न भवत्यशुभं क्वचित। गोपिका
चंदनं यस्य वर्तताहर्निशं गृहे २८ गोपीपुष्कर जं पुण्यं पवित्रं कायशोधनं ड्हन्ते नादेव न
श्यंति व्याधयो ह्याधयस्त्वये २९ अहो देहे धृतं पूर्वं मुक्तिदं सर्वकामिकं तावद्गर्जंति
तीर्थानि तावत्क्षेत्राणि सर्वदा ३० गोपिकाचंदनं यावन्न दृष्टं न स्मृतं यदा। इदं धार्यमिदं
पूर्वं मलदोषविनाशनं ३१ यस्य संस्पर्शनादेव पूतो भवति मानवः। अंतकाले तु मर्त्यानां
मुक्तिसंपावनं परं ३२ किं वदामि श्रुतश्रेष्ठ मुक्तिदं गोपिचंदनं। विष्णोस्तुलसीकाष्ठं च त
था च मूलमृत्तिका ३३ गोपिकाचंदनं चैव तथा वै हरिचंदनं। चत्वारि ह्येतानि संमील्य
अंगमुल्लुद्धयेत्सुधी ३४ तेन तीर्थकृतं सर्वं जंबूद्वीपेषु सर्वदा। तिलकं कुरुते यस्तु
गोपिकाचंदनोद्भवं ३५ सर्वपापविनिर्मुक्तो याति विष्णोः परं पदं पितुः श्राद्धादिकं तेन
गयां गत्वा तु वै कृतं ३६ येन वा पुरुषेणापि तिलकं गोपिचंदनं। ब्रह्महा मद्यपश्चैव

८ वाप्नोत्यप्सरोभिस्सुमोदते २५ आषाढे मासि द्वादश्यां वामनं च प्रपूजयेत्। नरमेधमवा
प्नोति पुण्यं च लभते महत् २६ अहोरात्रेण द्वादश्यां श्रावणे मासि श्रीधरं। पंचयज्ञानवा
प्नोति विमानस्थः समोदते २७ तथा भाद्रपदे मासि हृषीकेशं च पूजयन्। सौत्रामणिमवाप्नो
ति पूतात्मा भवते चाहि २८ द्वादश्यामश्विने मासि पद्मनाभेति चार्चयेत्। गोसहस्रफलं पुण्यं
प्राप्नोति नात्र संशयः २९ द्वादश्यां कार्तिके मासि पूज्य दामोदरेति च गवामयुतमवाप्नोति पु
मान्स्त्री वा न संशयः ३० अर्चयेत्पुंडरीकाक्षं एवं संवत्सरेण यः जातिस्मरत्वं चाप्नोति वि
पु॰ सं॰ द्याह्निकुसुवर्णकं ३१ अहन्यहनि तद्भावमुपेंद्रं योधिगच्छति समाप्ते भोजयेद्विप्रान् अर्थ
१२८ वादापयेद्घृतं ३२ अतः परं नोपवासो भवतीति विनिश्चयः। उक्तं च भगवान्विष्णुः स्वय
मेव पितामहं ३३ गारुडे। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। दशम्येकादशीयुक्ता राम
गांधार्या समुपोषिता। ३४ तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् द्वादश्येकादशी य
त्र तत्र संनिहितो हरिः ३५ दशम्येकादशी यत्र तत्र संनिहितोसुरः। वृद्धवाक्यविरोधेन सं
देहो जायते यदा ३६ द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणं एकादशीकलापि स्या
दुपोष्या द्वादशी तदा ३७ एकादशी द्वादशी च विशेषेण त्रयोदशी त्रिमिश्रा सा तिथिः १२
प्रोक्ता सर्वपापहरा शुभा ३८ एकादशीमुपोष्यैव द्वादशीमथवा द्विजाः त्रिमिश्रां वापि कु

नात्मघातिना १२ एकादश्यां विशालाक्षि भुंक्ते येन विजानता न शक्नोति तदा मुक्तामेका
दश्यामुपोषिता १३ तदाशक्ते न कर्तव्यं तथैव याचितेन वा। एकाभक्तेन दानेन कर्तव्यं द्वा
दशीव्रतं १४ न करोति यदा भ्रमेव्रतं वा दानमेव वा। महापातकभागी स्यात्सुगतिं नैव प्राप्नुया
त् १५ गारुडे च। एकादशीव्रतं नित्यं क्रियते पक्षयोर्द्वयोः। अघौघनरकं हन्यात्सर्वं दंवि
भुलोकदं १६ एकादशी द्वादशी च निशांते च त्रयोदशी नित्यमेकादशी यत्र तत्र सन्नि
हितो हरिः १७ दशम्येकादशी यत्र तत्र स्युस्सुरादयः। महाभारते शांतिपर्वणि दानधर्मे च
युधि० सर्वेषामुपवासानां यत्कुर्यः सुमहत्फलं। यच्चाप्याशंशयं लोके तन्मे त्वं वक्तुमर्हसि
१८। भीष्म उ०। शृणु राजन्यथा गीतं स्वयमेव स्वयंभुवा। यत्कृत्वा निर्वृतो भूयात्पुरुषो
नात्र संशयः १९ द्वादश्यां मार्गशीर्षे तु अहोरात्रेण केशवं अर्च्याश्वमेधमाप्नोति दुःकृ
तं चास्य नश्यति २० तथैव पौषमासे तु पूज्य नारायणेति च वाजपेयमवाप्नोति सिद्धिं च
परमां व्रजेत् २१ अहोरात्रेण द्वादश्यां माघमासे तु माधवं। राजसूयमवाप्नोति कुलं चैव
समुद्धरेत् २२ तथैव फाल्गुने मासि गोविंदेति च पूजयन्। अतिरात्रमवाप्नोति सोमलो
कं च गच्छति २३ अहोरात्रेण द्वादश्यां पूजयेन्मधुसूदनं। अग्निष्टोममवाप्नोति
अप्सरोभिश्च मोदते २४ ज्येष्ठे मासि त्रिविक्रमं तु पूजयेत पुष्पादिभिः गवामयनम

१० ते द्वादशी दिने द्वादशी च त्रयोदश्यां नास्ति विद्यते यथा ५१ विद्धाप्येकादशी तत्र पूर्वा स
ग्रहणी तथा। यतिभिश्चापि तत्राज्ञा ह्याश्रवीराभिस्तथैव च ५२ संपूर्णैकादशी यत्र द्वा
दश्यां नास्ति किंचन द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवेत् ५३ पूर्वा गृहस्थैः का
र्या तु तापतिभिस्तथा उपोष्ये च द्विती येति केचिदाहुर्मनीषिणः ५४ एकादश्यदावि
द्धा द्वादश्यां न प्रतीयते। द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवेत् ५५ उपोष्या द्वादशी
शुद्धा सर्वैरेव न संशयः केचिदाहुश्च पूर्वा तु तन्मतं ह्यसमंजसं ५६ पाद्मे उत्तर
पु॰सं॰ ११९ कांडे रुद्रः। अश्वमेधसहस्राणि वाजपेयशतानि च। एकादश्युपवासस्य कलां न
र्हन्ति षोडशीं ५७ एकादशीसमं किंचित्पापत्राणं न विद्यते एकादशीसमं किंचित्
तं नास्ति उमेकृणे ५८ एकादशी परित्यज्य र्नन्यद्व्रतमाचरेत् स्कंदंतीह पुराणानि भूयो भू
यो वरानने ५९ न भोक्तव्यं न भोक्तव्यं भूयो भूयो वरानने वर्णानामाश्रमाणां च सर्वेषां वरवर्णि
नि ६० एकादश्युपवासस्तु कर्तव्यो नात्र संशयः एकादश्यां तु प्राप्तायां मातापित्रोर्मृतेऽह
नि द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित् ६२ गर्हितान्नं न चाश्नंति पितरश्च दिवौकस
अरुणोदयवेलायां दशमी मिश्रिता भवेत् ६३ तां त्यक्त्वा द्वादशीं शुद्धां उपोष्य द्विवासयन्

राम
११९

वीतनोदशम्यायुक्ताक्वचित् ३९ विस्पष्टालक्षणं विष्णुधर्मोत्तरे परशुरामं रुद्रवाक्यं। दि
वाऽर्धनिशायां त्र्यतीतास्यान्तेथ्यां द्विज । त्रिशेषतथैवेष्याद्वविष्यास्वशतेतिथिः ४०
तिथित्रितयसंस्पर्शी दह्यारात्रेभ्यः ... ज्ञेयः स एक विनिर्दिष्टः पुण्यः परमपावनः ४१
वृहन्नारदीये च सर्वैरेकादशी ग्राह्या द्वादशीपरिवर्जिता। दशमीसंयुता हन्ति पुण्यं
जन्मत्रयार्जितं ४२ एकादशी कलामात्रा द्वादशी तु प्रतीयते। द्वादशी च त्रयोदश्या
मस्ति चेत्सा परा स्मृता ४३ संपूर्णैकादशी मुक्त्वा द्वादश्यां च प्रतीयते त्रयोदशी च रा
च्यते तत्र वक्ष्यामि सुव्रताः ४४ पूर्वा गृहस्थैः कार्या स्यादुत्तरा यतिभिस्तथा गृहस्थाः सिद्धि
मिच्छन्ति यतयो मोक्षं यतीश्वराः ४५ द्वादश्यां तु कलायां वा यद्य लभ्येत पारणं तदा तु
दशमीविद्धाप्युपोष्यैकादशी तिथिः ४६ शुक्ला वा यदि वा कृष्णा भवेदेकादशीद्वयं।
गृहस्थानां तु पूर्वोक्ता यतीनामुत्तरा स्मृता ४७ द्वादश्यां विद्यते किंचित् दशीसंयु
ता यदि दिनद्वयं द्वितीये च सर्वेषां परिकीर्तिता ४८ विद्धाप्येकादशी ग्राह्या परतो द्वा
दशी न चेत्। अविद्धापि निषिद्धैव परतो द्वादशी यदि एकादशी द्वादशी च रात्रिशेषे
त्रयोदशी। द्वादश द्वादशानां पुण्यं त्रयोदश्यां तु पारणं ५० एकादशी कलामात्रा विद्

दश्यां तु पारणं ८२ यां करोति नरो भक्त्या एकादशी विष्णुवल्लभां। ऐहिकं च फलं प्राप्य अंते मोक्षम
१० वाप्नुयात् ८३ एकादशी च द्वादशी रात्रिशेषे त्रयोदशी तस्य शास्त्रात्तु विज्ञेया दशमी सहिता नहि।
८४ भुक्तं हालाहलं तेन स्वविष्टा भक्षणं कृतं दशमी मिश्रितं येन कृतमेकादशीव्रतं ८५ इति मत्
त्वा न कर्तव्यं मद्दिनं दशमीयुतं। जन्म कोटिकृतं पुण्यं सततं नयाति संक्षयं ८६ संबद्धे तु विशेषेण
संदेहे समुपस्थिते ममाज्ञया च कर्तव्या द्वादशी विष्णुवल्लभा ८७ त्रेतत्वैतेसमुक्तौ विना श्रद्धैर्वि
नाघ्नुतैः कृता ये त्रिस्पृशा विद्वन्सत्प्रापकलौ युगे ८८ प्राह यमदूतान्वा च उपोष्येकादशी ए
कां प्रसंगेनापि मानवः न याति याता यामी मिति नो यमतः स्मृते ८९ न गंगा न गया वेश्य न काशी
न च पुष्करं। नवापि वैष्णवं क्षेत्रं तुल्यं हरिदिनेन च ९० यमुना चंद्रभागा च न तुल्या हरिदिनेन च
पु०सं० अनायासेन येनात्र प्राप्यते वैष्णवं पदं ९१ रात्रौ जागरणं कृत्वा समुपोष्य हरेर्दिने। दश वै पैतृके रा०म
१२० पक्षे मातृके दश पूर्वजाः ९२ प्रियाया दश वै वेश्य तानुद्धरति निश्चितं बालत्वे यौवने वापि वृद्धत्वे
वा विशांवर उपोष्येकादशीं नूनं नैति पापो हि दुर्गतिं ९३ सनत्कुमारसंहितायां वदरीमाहात्म्ये
एकादश्यां न सर्वत्र भोक्तव्यं मनुजेह। ऋषिगंगा तटे तीरे पानीयमिति संत्यजेत् ९४ वृद्धवै
वर्ते। गंगाजलसंपूर्णो यथा त्याज्यो घटो भवेत्। सुराबिंदुसमायुक्तो तत्सर्वमघतां व्रजेत् ९५ १२०
हलाहलं विषं रौद्रं कः पिबेन्मूढधीर्नरः। दशमीशेषसंयुक्तां कः उपोष्यति सद्व्रती ९६ विष्णुधर्मो
त्तरे। नारदवचनं। भगवान् श्रोतुमिच्छामि पूर्णाविद्धस्य कारणं कथयस्व प्रसादेन कृपां कुरु जगत्पते ९७

कलायामनुसंप्राप्ते सूर्यस्योदयनं प्रति ६४ त्रयोदश्यां तथा देवि द्वादशी परिविद्यते तथापि द्वा
दशी शुद्धा उपवासो विधीयते ६५ अरुणोदयवेलायां कृत्यं सर्वं समारभेत् । कलायामपि द्वादश्या पार
णं तत्र नोदितं ६६ शुद्धामेकादशीं वा त्यजेत्तत्र न संशयः । कलाप्येकादशी यत्र द्वादश्यामुदिते रवौ
६७ सर्वामेकादशीं त्यक्त्वा तत्रैवोपवसेद्द्विजः पाद्मे पातालखंडे । एकादश्यां च विधिवदुपवासपराय
णाः ६८ मुक्ते सितेतरपक्षे ते नराः स्वर्गगामिनः । मातेव सर्वलोकानां औषधं रोगिणामपि ७० रक्षार्थं
सर्वलोकानां निर्मितैकादशी तिथिः । एकादशीसमं किंचित्पापत्राणं न विद्यते ७१ तामुपोष्य विधा
नेन पुरुषाः स्वर्गगामिनः एकादशीद्वये पापं यत्कृतं भवति द्विजाः ७२ नरा निर्दूय तत्तूर्णं प्रीतः स्व
र्गमवाप्नुयात् अश्वमेधसहस्राणि राजसूयशतानि च ७३ एकादश्युपवासस्य कलां नार्हंति षो
डशीं । एकतः क्रतवः सर्वे सर्वतीर्थं तपांसि च ७४ महादानानि सर्वाणि व्रतं वैष्णवमेकतः । वैष्ण
वव्रतजो धर्मो धर्मो यज्ञादिसंभवः । एकत्र तुलितो धात्रा तत्पूर्वो ह्यभवद्गुरुः ७५ पुनरुत्तरखंडे । वा
राणस्यां यथा पार्थ षष्टिवर्षसहस्रकैः । एकादश्युपवासस्य कलां नार्हंति षोडशीं ७६ वैधृते यानि स
निलहममेकेन यत्फलं । एकादश्युपवासस्य कलां ना० ७७ व्यतीपाते च यद्दानं ग्रहणे चंद्रसूर्ययोः
एकादश्यु० ७८ कुरुक्षेत्रे च यद्दानं यद्दानं चंद्रसूर्ययोः । एकादश्यु० ७९ प्रभासक्षेत्रे यद्दानं सोम
पर्वसहस्रकैः । एकादश्यु० । ८० एकादशी त्वहोरात्रं दशमी घटिकापि चेत् सा तिथिः परिहर्तव्या
उपोष्या द्वादशी शुभा ८१ एकादशी तु संपूर्णा द्वादशी वृद्धिगामिनी तस्याः शतगुणं पुण्यं त्रयो